वेदवेदिका

(श्रीपण्डितवर्येण वेदमार्तण्डेन गोकर्णस्थब्रह्मचर्याश्रमप्रतिष्ठापनाचार्येण दैवरातेन गजानन्दशर्मणा लिखिता ।)

ईशशासनरूपं ऋगादिशास्त्रम्

विदितमस्तु तत्रभवताम्, यदिह प्रपञ्चे परिदृश्यमानायामस्यामीशसृष्टौ सदसद्विवेकशालिनीं मनुष्यजातिमधिकृत्य, सदसदात्मकेषु कर्तव्याकर्तव्यावबोधादिविषयेषु प्रवृत्तं हितशासनात्मकं विधि-निषेध-अध्यात्मविचारादिविषयकं नियतप्रवृत्ति-निवृत्ति-आत्मनिष्ठादिप्रयोजकं ईशशासनरूपं चेति सर्वत्र सुप्रसिद्धं ऋग्वेदादिशास्त्रम्। तदेव ऋगादिशास्त्रमनुसृत्य पूर्वे महर्षयः ज्ञानोपासना-कर्मयोगात्मकेन तपसा, यज्ञरूपेण, धर्मेण, विश्वस्यापि जगतः प्रतिष्ठया, स्वतन्त्रं शाश्वतं सुखं तत्परमं पदमुपप्रापुः । तथैव पुनरिदानीमपि तत्प्राप्तुं शक्यमिति शास्त्रसिद्धं वस्तुतत्त्वम् । तदर्थमेवास्माकं उपनयनसंस्कारपूर्वकं ऋगादिवेदाध्ययनं, तदर्थज्ञानं, तथैवाचरणं तत्प्रचारणं च अवश्यकर्तव्यतया विहितम् । तच्च प्राचामृषीणामाचार्याणां च सद्विद्याशिक्षणाचारादिपरम्परया अद्यापि समागतमित्यत्र भारतीयानामस्माकं बीजक्षेत्रादिनिसर्गसिद्धा वैदिकसद्विद्यात्मकसत्य-धर्मपरायणतैव प्रत्यक्षं प्रमाणम् ।

तच्च ऋग्वेदादिशास्त्रं ईशशासनात्मकं सर्वविद्यानिधिरूपं, प्रदीपवत् स्वतन्त्रेण सर्वार्थज्ञानप्रकाशकं, सर्वेषामपि विषयाणां, विश्वस्यापि जगतः, तथा तत्कारणीभूतस्य परब्रह्मणोऽपि यथार्थतत्त्वाधिगमे प्रत्यक्षं प्रमाणभूतं चेति, तदिदं प्राचां सर्वेषां, प्रामाणिकानां अभिमतं, तथा अविरुद्धं च विद्याविनीतानां आधुनिकानां पाश्चात्यविपश्चितां चेति निर्विवादमभ्युपगन्तव्यं भवति ।

ब्राह्मणग्रन्था मन्त्रार्थानुवादकाः

अथ तादृशानां ऋगादिमन्त्राणां प्रत्यक्षब्रह्मरूपाणां गूढार्थप्रकाशनाय प्रवृत्तः, गद्यगाथाद्यात्मकः ब्राह्मणारण्यकोपनिषदादि-नामभिः प्रसिद्धः ब्राह्मणभागग्रन्थोऽपि वेदमन्त्रार्थानुवादकत्वेन क्वचित्तद्विनियोगादिविधायकत्वेन च वेदानां साक्षात् सम्बन्धात् वेदे एवान्तर्गतः, वेदः एवेत्यपि व्यवह्रियते " मन्त्रब्राह्मणयोर्वेदनामधेयम् " इत्यादिसूत्रवचनात् ।

सर्वेषां वेदाश्रयणम्

अत्र वेदानामर्थविषये तथा पौरुषेयत्वापौरुषेयत्वादिना नित्यत्वानित्यत्वादिनाऽपि हेतुना, तत्प्रामाण्ये च बहूनां बहुधा मत-भेदेऽपि, भौतिक-दैवत-अध्यात्मादितत्त्वविज्ञानाय सर्वविद्याप्रतिपत्तये च, यथाकथञ्चिद्वेदाश्रयणं तु सर्वेषामप्यावश्यकतया सम-भिलषितं तत्समानमेवेति सन्तोषास्पदम् । तद्यथा वैदिकानां समाजे वेदनास्तिकत्वेन गण्यमाना अपि जैनाः, वेदस्य ईश्वरोक्त-त्वानङ्गीकारेऽपि, सर्वज्ञमहर्षिप्रोक्तत्वादेव तत्प्रामाण्यस्वीकारेण गायत्र्यादीनां वेदमन्त्राणां अवलम्बनेन भाष्यादिमुखेन तदर्थ-प्रकाशनात् तदुपदिष्टसूर्यादिदेवतोपासनादिना च तत्त्वज्ञानोदयादिसर्वाभीष्टसिद्धिं मन्यन्ते । तथा इंग्लन्दजर्मनअमेरिकादि देशान्तरीया मतान्तरावलम्बिनोऽपि सुप्रसिद्धा भट्टमोक्षमुल्लरप्रभृतयः पाश्चात्यपण्डिता अपि स्वस्वप्रज्ञानुसारेण स्वाभि-मतानुरोधनेन भौतिकादितत्त्वविमर्शनेन च आंग्लग्रीकप्रभृतिभाषान्तरेण भाष्यादिरचनया स्वजनाङ्गेषु स्वकीयज्ञाननिधित्वाभि-मानेन वेदार्थप्रचारं चक्रुः । तथैव इदानीमपि तत्र तत्र विदेशेषु प्रायोगिकेन विधानेन च वेदानां तत्त्वसंशोधनं भौतिकऐति-हासिकादिदृष्ट्या तत्त्वविमर्शनं तद्व्याख्यानं अध्ययन-ग्रन्थप्रकाशनादिमुखेन च विशेषतः प्रचारणं च प्रचलितमिति, अत्रत्याः प्रायः सर्वेऽपि विद्वांसो जानन्ति । अत्रापि पुनः वैदिकेषु जनाङ्गेषु पौराणिकशैववैष्णवादिविषयकमतभेदेऽपि वेदे तु सर्वेषां समानतन्त्रमेव प्रचलितं प्रसिद्धम् ।

अपि च भूताद्यर्थानां दैवताद्यलौकिकतत्त्वानां चाधिगमे प्रमाणभूतेभ्यः सर्ववाङ्मयेभ्यः अतिप्राचीनानां वेदानामभावे, प्राक् च सृष्टेः स्वतःसिद्धस्य वस्तुतत्त्वस्य, तथा उत्तरत्रापि तदानीमेवाविर्भूतानां वस्तुविषयादीनां तत्त्वविशेषाणां च इदानीं अस्माकं बोधाय, तत्र प्राचां वसिष्ठादीनां महर्षीणामनुभवस्याप्यन्येषां पुनरवबोधाय च प्रमाणान्तराभावात्, तद्विषये इदानींतनानामन्धकार एवाभविष्यत् । अथवा क्वचित्तु तत्परिकल्पनेऽपि तस्य कल्पनामात्रत्वपर्यवसायित्वेन अप्रामाण्यमेव परिशिष्येत । एवं च आदिसृष्टिमारभ्य वेदाविर्भावादनन्तरं च एतावत् पर्यन्तं एकरूपेण स्थितं, तथा उपदेशपरम्पराप्रवाहेण चिरात्समागतमपि " ब्रह्मवस्तुवत् " अविकलितं सत् सुप्रतिष्ठितं अनादिसिद्धं सर्वेषामपि प्रत्यक्षप्रमाणभूतं इहलोके यत् किञ्चिदस्ति चेत्, तथा अस्तीति वक्तव्यंचेत्, वक्तुं च शक्यं चेत् "प्रत्यक्षब्रह्मरूपः स वेद एक एवेति" वक्तव्यमापतति । तस्मात् सर्वविद्यानिधिरूपः सर्वजगदादिभूतः " ब्रह्मवस्तुवत् " नित्यसिद्धः सर्वप्रमाणास्पदीभूतः " वेद एव " सर्वथा प्रतिष्ठितः इति प्रतिज्ञेयं सुतरां सम्पद्यते ।

वेदस्वरूपविचारः

अथ पुनर्वेदस्य किं स्वरूपं ? किं च तद्वास्तवं तत्त्वम् ? कथं कुतश्च तस्याविर्भावः ? किं तत्र निमित्तम् ? किं च तत्प्रयोजनं कीदृशी च तत्प्रामाण्यप्रतिष्ठा ? किं तन्महत्त्वम् ? कथं कुतश्च तदुपलब्धिरस्मिन् लोके मनुष्याणां ? कस्तत्र विशेष इतरेभ्यः सर्वेभ्यो वाङ्मयेभ्यः ? एतेषु विषयेषु प्राचामृषीणामाचार्याणां च, तथा भाष्यकृतः सायनस्यापि किमभिप्रेतम् ? तद्भाष्ये च किं नियतं तत्त्वम् ? का च तत्र वस्तुस्थितिरिति चावश्यं विवेक्तव्यम् । येन ब्राह्मणादिग्रन्थेन महता प्रबन्धेन तदङ्गोपाङ्गादिरूपैः वेदाङ्ग-दार्शनिकादिसूत्रप्रमुखैः, तद्भाष्यादिमुखेन च वेदार्थसमर्थनेन सर्वेऽप्येकमुखेन तत्प्रामाण्यमङ्गीकुर्वन्ति आस्तिकत्वेन प्रसिद्धाः, अन्यथा नास्तिकतापवादार्हा भवन्ति ।

तथा सर्वेष्वपि विषयेषु वैदिकेषु लौकिकेष्वपि वेदावलम्बेनैव प्रवर्तन्ते सर्वेऽपि लोकाः, यद्विज्ञानाय सर्वविद्यापरिशीलनप्रवृत्तिः प्रामाणिकानां श्रद्धालूनाम्; क्वचित्तु तत्प्रामाण्यानङ्गीकारेऽपि नास्तिकानामपि तत्त्वज्ञानार्थं तत्र प्राचामनुभवादिनिदर्शने वेद एव सर्वथा शरणं तदनिवार्यं भवति । एवं वेदैकशरणानां सर्वेषामपि एकमुखेन सर्वेषामपि प्रवृत्तिरनर्थायैव स्यात् इति ।

अत्रोच्यते— " ऋचो अक्षरे परमे व्योमन् । " (ऋ. मं. १।१६४।३९; अथर्व० ९।१०।१८)
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत । (ऋ० १०।९०।९)
अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचः सामानि यजूंषि । (तै० ब्रा० १।१।१०।३;४; २।१।२६; आप० श्रौ० ५।१८।२)

इत्यादि श्रुतिनिर्दिष्टाः गायत्र्यादिच्छन्दोनिबद्धाः ऋग्यजुःसामशब्दार्हाः प्रसिद्धास्ते ऋगादयो मन्त्राः छन्दःपुरुषात्मकब्रह्मवाचकत्वात् सर्वत्रापि वेदे ब्रह्मशब्देनैव निर्दिष्टाः श्रूयन्ते—

मन्त्रा ब्रह्मवाचकाः

विश्वामित्रस्य रक्षति " ब्रह्मेदं " भारतं जनम् (ऋ० ३।५३।१२)
" ब्रह्माणि " मन्दन्गृणतामृषीणाम् । (ऋ० १०।८९।१६)
" ब्रह्मणा " ते ब्रह्मयुजा युनज्मि " । (ऋ० ३।३५।४; अथ० २०।८६।१)
नि " ब्रह्मभि " रधमो दस्युमिन्द्र । (ऋ० १।३३।९)
ज्येष्ठराजं " ब्रह्मणां " ब्रह्मणस्पते " । (ऋ० २।२३।१; तै० सं० २।३।१४।३; का० १०।१३)
गूळ्हं सूर्यं तमसाऽपव्रतेन तुरीयेण " ब्रह्मणा "ऽविन्ददत्रिः ॥ इति (ऋ० ५।४०।६)

ते च ऋगादयो मन्त्राः वाग्रूपाः वाच एव प्रत्यक्षब्रह्मरूपाः परोक्षेण परमेण ब्रह्मात्मना मिथुनीभूताः, सत्याः, ब्रह्मवस्तुवत् नित्याः, सत्यधर्मयुक्ताः, परोक्षस्यापि परब्रह्मणो यथावत् स्वरूपतत्त्वावगमे प्रत्यक्षप्रमाणभूताश्च भवन्ति । तथा च ऋङ्मन्त्रवर्ण

" यावद्ब्रह्म विष्ठितं तावती वाक् " इति (ऋ० मं० १०।११४।८; ऐ० आ० १।३।८) तस्येदमुपव्याख्यानब्राह्मणम्–
" यत्र ह क्व च ब्रह्म तद् वाक्, यत्र वा वाक् तद्वा ब्रह्मेत्येतदुक्तं भवति " इति (ऐ० आ० १।३।८) वाच्यवाचकयोर-
भेदस्तादात्म्यं च कश्चित्तु तदन्यतरद्वा सर्वेषां शास्त्रचिन्तकानां शब्दप्रामाण्यवादिनामभिमतं न्यायसिद्धं प्रसिद्धतरं वस्तुतत्त्वम्।
अत एव प्रत्यक्षं ब्रह्मैव वाक्, वागेव प्रत्यक्षं ब्रह्म, परोक्षं परं ब्रह्मैव, तस्याः अधिपतिः परमः पुरुषः इति, तत्त्वदर्शनेन वाग्-
ब्रह्मणोस्तयोः, ब्रह्म-ब्रह्मणस्पतिशब्दाभ्यां, वेदेषु असकृदभिष्टुतिः सर्वथा सङ्गच्छते ।

' वाचस्पतिं विश्वकर्माणमूतये (ऋ० मं० १०।८१।७); ज्येष्ठराजं ब्रह्मणां ब्रह्मस्पते । (ऋ० मं० २।२३।१)'

' एष उ एव ब्रह्मणस्पतिः, वाग्वै ब्रह्म तस्या एष पतिः ' इति च औपनिषदं ब्राह्मणम् । (बृ० उ० १।३।२१)
अस्मिन्नेवार्थे कवीन्द्रस्य कालिदासस्य काव्यराशेः शिरोभूतं मङ्गलवचनं सुप्रसिद्धम्–

'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ । ' इति । एवं 'ऋचो अक्षरे परमे व्योमन् ।
ॐ खं ब्रह्म; ओमित्येकाक्षरं ब्रह्म । ओमित्येतदक्षरमिदं सर्वं । ओंकार आत्मैव । तस्य वाचकः प्रणवः '
इत्यादीनि श्रुतिस्मृतिवचनान्येतदेव समर्थयन्ति ।

'छन्दः । गायत्री । दैव्येकं । ' इति पिङ्गलछन्दःसूत्रात्; तथा ' प्रणवस्य ब्रह्मा ब्रह्मा दैवी गायत्री ' इति (आ०
गृ० प०) सूत्राच्च यथोक्तैकाक्षरब्रह्मरूपस्य प्रणवस्य गायत्रीछन्दोनिबन्धनसिद्धं प्रसिद्धं मन्त्रत्वम् । तस्माद् ब्रह्मात्मकः प्रणवः
प्रणवात्मकं च ब्रह्मेति सम्पद्यते । तथा च औपनिषदं वचनम्– ' ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् ।
गायत्रं छन्दं परमात्मं सरूपं सायुज्यं विनियोगम् ' इति (म० ना० उ० ३३) । एवं गायत्री छन्दोनिबद्धत्वात्
ब्रह्मवाचकस्य प्रणवाक्षरस्य, गायत्रीछन्दोमयाक्षरब्रह्मप्रणवोद्भूतत्वाच्च, ऋगादिमन्त्राणां तादृशगायत्र्यादिछन्दःशरीरं प्रत्यक्ष-
ब्रह्मरूपऋगादिमन्त्रात्मकं, तत्परं ब्रह्म, ब्रह्मात्मकं छन्दः, ब्रह्मात्मकाः छन्दोमयाः ऋगादिमन्त्राः इति च अर्थात् सिध्यति ।
वस्तुतस्तु वागात्मकस्य छन्दोमयस्य, मन्त्ररूपस्य वेदस्यैव मुख्यो ब्रह्मशब्दः प्रत्यक्षब्रह्मरूपत्वात्; निर्गुणस्य परमात्म-
वस्तुनः परब्रह्मणस्तु गौणो ब्रह्मणस्पतेस्तस्य नामरूपातीतत्वात् इत्येव वक्तुं युक्तम् इति प्रतीयते ।

' आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् । गायत्री छन्दसां मातेदं ब्रह्म जुषस्व मे । इति (म० ना० उ०)
अयं औपनिषदः गाथात्मकः याजुषो मन्त्ररूपः श्लोकः तदेव समर्थयति । तस्मात् प्रत्यक्षब्रह्मात्मकवाग्रूपाः गायत्र्यादिमन्त्राः
वाचकात्मानः, तथा परोक्षं परं ब्रह्मैव तद्वाच्यार्थात्मकं इति सामरस्ययोगेन उभयोरपि तयोः वेद-ब्रह्मरूपयोः वाक्-पुरुषयोः
तादात्म्यं ऐक्यं च नाम्ना रूपेण तत्त्वेन चेति वस्तुसिद्धं शास्त्रतत्त्वम् । अत एवाचार्येन्द्रः ' शास्त्रयोनित्वात् ' इत्यत्र ऋगा-
दिवेदस्य सर्वज्ञब्रह्मसमानत्वं प्रदीपवत् स्वातंत्र्येण सर्वार्थप्रकाशकत्वं सर्वविद्यास्पदत्वं परब्रह्मणः यथार्थतत्त्वावबोधे प्रत्यक्ष-
प्रमाणत्वं च स्पष्टं निर्वर्णयामास भाष्यमुखेन । ' महतः ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्
सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । इति । अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं
प्रमाणं अस्य ब्रह्मणो यथावत् स्वरूपाधिगमे । शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्माधिगम्यत
इत्याभिप्रायः । इति (ब्र० सू० १।१।३) तदिदं सर्वमपि प्रत्यक्षब्रह्म–परब्रह्मात्मकयोः वाचक-वाच्यार्थरूपयोः वेदवाग्-
ब्रह्मवस्तुनोः तादात्म्ये ऐक्ये एव सङ्गच्छते ।

अत एव सर्ववेदाध्ययन–तदर्थज्ञानाद्यधिकारसिध्यर्थं दिव्येन द्वितीयजन्मरूपेण स्वरूपज्ञानोदयेन द्विजत्वसिद्धये, परब्रह्मात्म-
साक्षात्कारेण शास्त्रोक्तपूर्णब्राह्मणत्वयोगाभ्युदयार्थं च वेदमातृरूपप्रत्यक्षब्रह्मात्मकब्रह्मगायत्रीमन्त्रमुखेनैव ब्रह्मोपदेशः, तथा पूर्ण
ज्ञानोदयेन ब्रह्मसाक्षात्काराय नित्यं तदुपासनायोगश्च प्राधान्येन विहितः, तदर्थज्ञानमुखेन आत्मसाक्षात्कारश्च उपदिष्टः, सोऽयं
पूर्वेषामृषीणां आचार्याणां च ब्रह्मोपदेशपरम्परया समागतः अद्यापि प्रचलतीति सर्वत्र सुप्रसिद्धम् । तथा च औपनिषदं वच-
नम्– " गायत्र्या गायत्री छन्दो विश्वामित्र ऋषिः, सविता देवता, अग्निर्मुखं, ब्रह्मा शिरो, विष्णुर्हृदयं, रुद्रः
शिखा, पृथिवी योनिः, प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री
चतुर्विंशत्यक्षरा त्रिपदा, षट् कुक्षिः, पञ्च शीर्षा उपनयने विनियोग इति । (म० ना० उ० ३५)

" गायत्र्या ब्राह्मणमुपनयीत । अहरहः सन्ध्यामुपासीत । जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् । सन्ध्यां प्राक् प्रातरेवं तिष्ठेदासूर्यदर्शनात् । " (या० स्मृ०) इति उपनयनसन्ध्योपासनयोर्गायत्र्या विनियोगः । एवं गायत्रीमुखेन ब्रह्मात्मैक्यतत्त्वज्ञानं तदनुसन्धानं च उपदिष्टं शास्त्रे प्रसिद्धम् ।

न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । सोऽहमस्मीत्युपासीत विधिना येन केन चित् । ' इति ।— एवं सर्वसंन्यासयोगेन केवलं ब्रह्मसाक्षात्कारार्थं आश्रयितव्ये सुप्रसिद्धे चतुर्थाश्रमेऽपि गायत्रीप्रवेश एवोपदिष्टः ।

' ॐ भूः तत्सवितुर्वरेण्यम् गायत्रीं प्रविशामि । ॐ भुवः भर्गो देवस्य धीमहि सावित्रीं प्रविशामि । ॐ स्वः धियो यो नः प्रचोदयात् सरस्वतीं प्रविशामि । '

इति तत्प्रयोगविधानात् तथैवाचाराच्च (बौद्धायन धर्मसूत्रे) गायत्र्याश्च ब्रह्मात्मैक्यमेव परमः प्रधानोऽर्थः इति प्राञ्चः सर्वेऽपि ऋषयः आचार्याः, तथा अर्वाचीनाश्च वेदविदः एकमुखेन अङ्गीकुर्वन्ति, समर्थयन्ति च तत्तद्भाष्यमुखेन । तस्माद् ब्रह्मणः सकाशात् सर्वेषां छन्दसामाविर्भावः; तथा छन्दोमुखेनैव विश्वतो रूपेण ब्रह्माविर्भावः; ब्रह्मतत्त्वज्ञानोदयश्च श्रुतिनिर्दिष्टः, तयोर्वेदब्रह्मणयोः वाक्-पुरुषात्मकयोः अन्योऽन्यात्मत्वे एवोपपद्यते । तथा च मन्त्रवर्णः ' यश्छन्दसामृषभो विश्वरूपः । छान्दोभ्योऽध्यमृतात्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु० । ' इति । (तै० आ ७।४।१;१०।६।१; तै० उ० १।४।१)

वेदाविर्भावः

अथेदं सर्वं जगत् नाम्ना रूपेण च व्याकृतं, पुनर्विनष्टं सत् नामशेषतां गतमिति गण्यते, नाम्नैवावशिष्टमिति यावत् । ' यथा सर्वोऽपि जन्तुर्मृतः सन् नामशेषोऽभूदित्युच्यते, ' तथैव प्राक् च सृष्टेरपि परमे ब्रह्मणि अव्यक्तबीजरूपेण शब्दात्मकेन नाम्नैवावशिष्टं सत्, सर्वमेतत् प्रथमतः नाम्नैव शब्दतन्मात्रात्मकेन आविर्भूतं, ततः नामत एवोद्भूतं सत् स्वेन स्वेन रूपेण युज्यते, साकारेण स्वरूपतः आविर्भवतीति यावत् । एवं वाग्रूपाः नामात्मकास्ते च शब्दाः स्वयं वाचकरूपाः सन्तः ज्ञानरूपेण विलीनाः, प्रज्ञानात्मकेन परेण ब्रह्मणा एकीभूताः ब्रह्मण्येव प्रतितिष्ठन्ति । वाचैव मुखेन पुनस्तज्ज्ञानं ज्ञातमर्थजातं च व्याक्रियते । यथा आत्मनः स्वं ज्ञानं स्वरूपेणैव प्रतिष्ठितं सत् वाचैव मुखेन आविर्भूतं नाम्ना शब्देनैव प्रकाशते, प्रकाशयति च स्वं सङ्गतमर्थमिति सर्वानुभूतिसिद्धम् । एवमेव प्राग् विश्वविसृष्टेरपि निर्विशेषे केवले प्रज्ञानरूपे सर्वज्ञे परमे ब्रह्मणि सर्वज्ञकल्पः प्रत्यक्षब्रह्मरूपः छन्दोमयः ऋगादिवेदराशिरपि परावाग्रूपेण उपसम्पन्नतरः सामरस्ययोगेन ब्रह्मात्मना एकीभूतः, प्रज्ञानरूपेण अवशिष्टः ब्रह्मस्वरूपेणैव प्रतितिष्ठति । तथा तत्प्रज्ञानप्रकाशनेन विश्वविकासार्थं तत एवाविर्भवति । तथा समाविर्भूतः सोऽयं वेदः सर्वं स्वं अर्थं प्रकाशयन् सर्वज्ञं तत्परं ब्रह्म, तद्वस्तुतत्त्वमपि समर्थयति ।

विश्वरूपः परमात्मा वेदरूपः

यः खलु परमात्मा स्वयं नित्यसिद्धः, अस्माकं सर्वेषामपि पितृस्थानीयः सर्वसाक्षी स्वयं यज्ञरूपः सन्, सर्वं यज्ञं यजमानः निर्विशेषः प्रत्यग्दशा आत्मन्येवान्तर्विलीनः " मौनीव " सर्वथा अनेकव्यपदेशास्पदीभूतः, इमानि इदानीं परिदृश्यमानानि सर्वाण्यपि भूतानि तदानीं तु केवलं ब्रह्मात्मना बीजरूपेणावशिष्टानि, उत्तरत्र बहिर्विसृज्यमानानि स्वीये यज्ञीये केवले प्रज्ञानरूपे तपोऽग्नौ आजुहाव; तथा अन्ततः आत्मानमपि तस्मिन्नेव तपोऽग्नौ जुहवांचकार । यज्ञमुखेनैव विश्वस्य विसृष्ट्य स्वयं यजमान इव प्रज्ञानेन स्वरूपेण प्रज्वलन्निव आस; तस्मिन् स्वीये केवले प्रज्ञाने एव विश्वं भावयामास ।

स च पुनस्तस्मिन् सर्वहुति विश्वहवनपूर्णे आत्मयज्ञे आत्मनोऽपि हवनेन नामावशेषतामुपप्राप्तोऽपि सत्तामात्रेण प्रज्ञानरूपेण स्वयं प्रकाशमानः सन्, आशीर्वागुच्चारमात्रेण आत्मविभूतियोगपूर्णं विश्वविकासमभिलषन् आदिभूतः स्वयमनादिसिद्धप्रज्ञानात्मा स छन्दःपुरुषः छन्दोमुखेन विश्वमुत्सृज्य, तत्र स्वयं प्रज्ञानात्मना आविष्टः सन्, विश्वकारणादिव्यपदेशार्हो बभूव । तथा च विश्वकर्मणः आर्षं ऋङ्मन्त्रदर्शनम् ।

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश । ' इति । (ऋ० १०।८१।१)

स परमः पुरुषः स्वयं न जातः, तथा कदाचिदपि न जायमानः, न च पुनर्जनिष्यमाणोऽपि, विश्वविभूतियोगेन सर्वज्ञान-क्रियाशक्तियोगाच्च एक एव बहुधा नामभिः रूपैश्च युक्तः सन् प्रकाशते ।

" अजायमानो बहुधा विजायते " इति च श्रुतिः (वा० य० ३१।१९; तै. आ. ३।१३।१)

तथा स विश्वतः प्राचीनतमः प्रथमः परः पुरुषः स्वीयेनैव प्रज्ञानप्रकाशशक्तिविशेषेण पूर्णः आत्मयज्ञाद् बहुधा विश्वरूपेण स्वयं आविर्भवन्, विश्वमेतदुत्सृजन्, विश्वमूलबीजभूतां छन्दोमयीं वाचं छन्दोनिबद्धं काव्यरूपं सर्वार्थवाचकस्वरूपं शब्दराशिं सन्दधार, आत्मविभवाय विश्वविभूतिविजयाय च बाणसन्धानमिव प्रज्ञानरूपेण सिद्धां सर्वज्ञानक्रियाशक्तिपूर्णां मन्त्रमयीं वाचं आत्मन्यन्तः धारयामासेति यावत् । तथा च कुत्सस्य आर्षं दर्शनम्—

' स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ॥ ' इति । (ऋ० १।९६।१)

तथा सर्वज्ञानप्रकर्षाय प्रज्ञानरूपेण सन्धृतां तां छन्दोमयीं वाचं, स परमः पुरुषः प्रथमतः सर्वहुन्नामकात्पूर्वोक्तात् आत्म-यज्ञरूपात्तपसः उच्छ्वासरूपेण बहिरुत्ससर्ज । सा परा वागेव गायत्र्यादिच्छन्दोनिबन्धनक्लृप्ता मन्त्रमयी ऋगादिरूपा आसीत् । तथा च ऋङ्मन्त्रवर्णः नारायणार्षेयः । ' तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत । ' इति (ऋ० १०।९०।९)

'उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ।' (ऋ० २।२३।२), 'प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थम् । ' इति (ऋ० १।४०।५) 'अस्य महतो भूतस्य निःश्वसितमेतद्यद् ऋग्वेदो यजुर्वेदः सामवेदोऽ-थर्ववेदः० ' इत्याद्यौपनिषदं ब्राह्मणम् । (बृ० उ० २।४।१०) तथैव स परमः पुरुषः छन्दोनिबद्धया काव्यरूपया तया आदिमया परया वाचैव देवादिमानवान्ताः स्वस्वरूपाः सचेतनाः इमाः सर्वाः प्रजाः जनयामास । तथा च कुत्सः— ' स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ' इति । (ऋ० १।९६।२) प्रज्ञानचेतनावाक्यैः सञ्चालनेन उच्छ्वासरूपेण वागुच्चारमात्रेण विश्वमेतदुत्ससर्जेति श्रूयते । अविद्यमानवद् बीजरूपेण ब्रह्मण्यन्तर्हितस्य अनुन्मिषतोऽस्य जगतः स एव प्रथमतः, सङ्घटितः आविर्भावः इति च । तथा च बृहस्पतेरार्षं दर्शनम्—

' ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत । ' इति (ऋ० १०।७२।२)

तत्तद्वाचकात् वैदिकाच्छब्दादेव सर्वजगदाविर्भावः श्रूयते । 'एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा ' इति (ऋ०. ९।६२।१; साम० ८३०); तस्येदमौपनिषदमुपव्याख्यानब्राह्मणम्—

'एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यान् इन्दव इति पितॄन् तिरः पवित्रमिति ग्रहान् आशव इति स्तोत्रं विश्वानीति शस्त्रं अभिसौभगेत्यन्याः प्रजाः । इति (म० सू० मा० १।३।२८)

'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।' इति च स्मृतिः ।

तदेतन्निर्णीतं विस्तरशश्च प्रपञ्चितमुभयत्रापि मीमांसायाम् । ' औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञान-मुपदेशश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् । ' इति. (पू० मी० सू० १।१।५)

'शब्द इति चेन्नातः प्रभावात्प्रत्यक्षानुमानाभ्याम् । अत एव च नित्यत्वम् । ' इत्यादिभिः सूत्रैः (ब्र० सू०) कथं वागुच्चारमात्रेण विश्वाविर्भावः ? इति वचनमुपपद्यते— " ऋषीणां पुनराद्यानां वाचमर्थोऽनु धावति " इति सिद्धमन्त्राणां सत्यवचनानां च तादृशसामर्थ्ययोगात् । किं पुनः सर्वेश्वरस्य सर्वज्ञस्य सर्वशक्तिमतः स्वतःसिद्धसत्यमन्त्रवचमस्य " स भूरिति व्याहरद् भुवमसृजत, तत्पृथिव्येव समपद्यत " इत्यादिश्रुतेः । " ईशानः सर्वविद्यानामीश्वरः सर्व-भूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः० " इति च स्पष्टम् । एवं संसिद्धसत्यमंत्रवचनानां ऋषीणामपि तादृशं सामर्थ्यं श्रूयते— " युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः । ऋभवो विष्ट्यक्रत । " इति (ऋ० १।२०।४)

सत्यमंत्रा ऋजुगामिनः ऋभवः—सुधन्वनः पुत्राः " ऋभुः—विभ्वा—वाजः " इत्येते त्रयःऋषयः वृद्धौ मातापितरौ कर्मणा तपसा सिद्धमंत्रसामर्थ्याच्च पुनः युवानौ चक्रुरिति वेदे प्रसिद्धम् । ' अमन्यानान् अभिमन्यमानैर्निर्ब्रह्मभिरधमो दस्यु-

मिन्द्र (ऋ० १।३३।९) इति च अर्थज्ञानरहितानपि रक्षितुं स्वकीयत्वेन अभिमन्यमानैर्मन्त्रैः इन्द्रः दस्युं निर्जघानेति । प्रसिद्धं चेदमिदानीमपि लोके तथा शास्त्रे च सिद्धमन्त्राणां सत्यवचनानां महात्मनां तपस्विनां तथा गुरुजनानां च शापेन आशिषा च तद्वचनमात्रेण निग्रहानुग्रहादिरूपः तदर्थः फलतः प्रत्यक्षं सिध्यतीति ।

तस्माद्विश्वाविर्भावकारणीभूतत्वात् परब्रह्मणः स्वतःसिद्धं सर्वशक्तिमत्त्वादिकमिव, तत एव हेतोः तदात्मकस्य प्रत्यक्षब्रह्मरूपस्य ऋगादिवेदस्यापि सर्वार्थबोधकत्वात्सर्वज्ञकल्पत्वं, सर्वकार्यकारित्वात् सर्वशक्तिरूपत्वं, सर्वप्रकाशकत्वं, तथा अनन्यसापेक्षकं प्रत्यक्षं प्रामाण्यं च स्वतःसिद्धमेवेति यथोक्तं सर्वं सम्पन्नतरम् !

अत्रायं कश्चित्पुनर्विचारप्रसङ्गः, कथमेतदुपपद्यते-तत्स्वरूपाधिगमे तद्वचनमेव प्रमाणं भवितुमर्हतीति । तथा चेत् स्वमुखेनैव स्वपाण्डित्योपवर्णनमिव, क्वचिदहङ्कारादिस्तवनमिव, क्वचिद् वृथाजल्पनमिव, क्वचिदुन्मत्ताद्युद्घोषणमिव, वेदवचनमपि प्रामाणिकानामप्रमाणार्हं आस्तिकानामश्रद्धार्हं च भवेत् । तथा आस्तिकानामपि चिरात्प्रतिष्ठिता दृढतरा वेदश्रद्धाऽपि अन्धपरम्परागतैवेति नास्तिकप्रसिद्धिरिव चिरतरप्रतिष्ठार्हा स्यात् । तथा च एतावता महता प्रबन्धेन स्वतः प्रत्यक्षं प्रमाणं इति साधितोऽपि वेदः सर्वेषामप्यश्रद्धेयवचन एव भवेत ।

तेन सदसद्विषयकयोः प्रवृत्तिनिवृत्त्योः प्रयोजकप्रमाणान्तराभावात् सर्वेषामपि सर्वत्र विषयेषु यथेच्छाचारप्रवृत्तिरनिवार्या स्यात्, तेनैव च सर्वेषामप्यनर्थपरम्परया सर्वदा सर्वथैव दुःखानुभवप्रसङ्गः समापद्येतेति अत्यन्तं शोचनीयमेवेदम् । सत्यमेवैतत्, तथापि अत्रास्ति कश्चिद्विवेकः समाधानकारणीभूतः, तत्तत्पुरुषविदितार्थानां स्वरूपप्रज्ञानानुभवादीनां अन्यस्मै वितरणेन प्रकाशने तत्तत्पुरुषवचनमेव प्रमाणमिति ब्रूमः, तदेतद्वस्तुसिद्धं तत्त्वमिदानीमपि सर्वेषां तत्समानम् । सुविदितशास्त्रतत्त्वानां विदुषामपि वचनं अहङ्कारादिप्रख्यापननिमित्तेन अप्रमाणं चेत्, एकस्यानुभूतं विदितं चार्थं को वाऽन्यो विज्ञातुं समर्थः ? तद्वचनस्याभावे तदप्रामाण्ये च तद्विज्ञातार्थादिप्रकाशे तद्वचनमन्तरेण साधनान्तरस्यासम्भवात् अशक्यत्वादयोग्यत्वाच्च ज्ञानोपदेशादेरनवकाशः, तथा आनर्थक्यप्रसङ्गश्च प्रसज्येत ।

तद्यथा मौनिनो मूकस्य च वचनाभावेन तद्विदितार्थप्रकाशः सर्वथाप्यशक्यसम्पाद एवेति प्रत्यक्षसिद्धम् । कथं तर्हि एकेन विदितस्यार्थस्य उपलब्धिरन्येषाम्, तद्वचनाभावे तदर्थं किमन्यत्साधनं भवितुमर्हति ? ततः किम् ? यदि एकस्य वचनमन्यस्य प्रमाणं न भवेत्, तर्हि सर्वैरपि स्वयम्प्रज्ञैः सर्वज्ञैरेव भवितव्यं, अज्ञैर्वा स्थातव्यमिति ज्ञानोपदेशाद्यनवकाशात् अन्धपरम्परैव समापद्येत । तद्यथा भिषग्वराणां वचनमौषधं च अप्रमाणं चेत् रुग्णैरेव स्वानुभवेन औषधं शोधनीयं, सर्वदा रोगदुःखं वा अनुभाव्यं भवेत् । तथा च औषधसेवनमन्तरेण न तदनुभवः, अनुभवं विना औषधमप्रयोजनकरमिति अनर्थ एव तत्र प्रसज्येत । एवमेव प्राग्विश्वविसृष्टेः अन्यस्याभावात् स्रष्टुर्वचनस्याभावे तदप्रामाण्ये च विश्वस्रष्टुस्तस्य वस्तुतत्त्वे सृष्ट्यादेश्च विषये अत्यन्तमप्रसिद्धेऽर्थे किमन्यत्प्रमाणं भवितुमर्हति, उत्तरत्र इदानींतनैर्यथा कथञ्चित् तत्परिकल्पनेऽपि तस्य कल्पनामात्रार्थपर्यवसायित्वेन सर्वथा अज्ञानमेव व्याप्रियेत ।

एवं प्राचामृषीणां ईशस्य वा वेदादिरूपं शास्त्रवचनं अप्रमाणमिति मन्यमानः अन्यवचनाप्रामाण्यवादेन स्ववचनस्यैव प्रामाण्यमनुवदन् अहंकारवादीव अश्रद्धेयवचन एव भवेत्, कथं तर्हि " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " (तै० उ० २।४; ब्रह्मो० २२) " मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानम् " इति च श्रुतिनिर्दिष्टं तस्य ब्रह्मणः वाचा अनिर्वचनीयत्वं तथा मौनेनैव तत्प्रकाशनीयत्वं च प्रसिद्धम् ।

कथं अनिर्वचनीयस्य निर्गुणस्यापि ब्रह्मणः श्रुत्या निर्वचनम्, कथं च वेदवाचा तदुपदेशः कर्तुं शक्यः, येन तत्प्रामाण्यमभ्युपगम्येत ? उच्यते—तस्य शब्दमुखेन श्रुतस्यापि अनुभवैकगम्यत्वोपदेशोऽयम्, नहि तावता तद्वचनस्य वेदस्याभावः, तदप्रामाण्यं वेत्युक्तं भवति । यतः निर्गुणस्यापि ब्रह्मणस्तस्य शब्दस्पर्शादिभ्यो भूतगुणेभ्यो भिन्नाः विशिष्टाः सत्यज्ञानानन्तत्वादयः स्वभावतो नित्यसिद्धाः धर्माः श्रूयन्ते ' सत्यं ज्ञानमनन्तं ब्रह्म ' इति (तै० उ० २।१।१) । ते च श्रुत्यैवोपदेष्टुं शक्या अनुभवैकगम्याश्च भवन्तीति । अन्यथा ' यतो वाचो निवर्तन्ते ' इति तदनिर्वचनीयश्रुतिवचनमपि मृषैवेति तदप्रामाण्येन च सर्वथाप्यनवस्थैव प्रसज्येत ।

अपि च वेदस्य ईशवचनाभावे कृतकत्वे च अभ्युपगम्यमाने ।—

‘ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताग्रे ।

तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । (वा० य० ३१।१७; मै० सं० २।७।१९, का० सं० ३९।२१; तै० आ० ३।१३।१)

इत्यादिकमादिसृष्टिविषयं प्रत्यक्षमेवानुवदद्वेदवचनमपि ‘ स्वयमहमद्राक्षं मम पितुर्जन्म ’ इतिवत् अप्रमाणमश्रद्धेयमेव भवेत् । तस्माद्ब्रह्मणः यथावत् स्वरूपाधिगमे तदुच्छ्वसितं ऋगादिवेदवचनमेव प्रमाणमिति सर्वथा सम्पद्यते । तथैव साक्षात्कृतात्मनामृषीणामपि वचनस्य प्रामाण्यं वेदितव्यम् ।

‘ अहं मनुरभवं सूर्यश्च । ’ इति वामदेवः (ऋ० मं० ४।२६।१)

‘ अग्निरस्मि जन्मना जातवेदाः ’ इति विश्वामित्रः । (ऋ० मं० ३।२६।७)

‘ अहं रुद्रेभिर्वसुभिश्चरामि । ’ इति वागाम्भृणी (ऋ० मं० १०।१२५।१)

इत्यादिवचनसिद्धं । वेदैकवेद्यं तत्तत्त्वं वामदेवादिमहर्षीणामनुभवसिद्धं ब्रह्मात्मैक्यं दर्शयितुमन्यथा अशक्यमेव । अत एव ‘ प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व ’ इति (कौ० ब्रा० ३।२) इन्द्रप्रतर्दनसंवादे इन्द्रस्याभिमानवचनाक्षेपेण ‘ शास्त्रदृष्ट्या तूपदेशो वामदेववत् । ’ इति (ब्र० सू० १।१) विदुषां साक्षात्कृतात्मनां तादृशानुभवोपदेशः नाभिमानादिरूपः नाप्यप्रमाणभूतः इति निर्णीतम् ब्रह्ममीमांसायाम् । ‘ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति ’ इति च औपनिषदं ब्राह्मणम् (बृ० उ० १।४।१०)

तथैव सर्वेषां विदुषां इदानींतनानामपि वचनं तद्विदितार्थावबोधे प्रमाणमेव । अज्ञानां तु ‘ अहं प्राज्ञः अहं सर्वज्ञः ’ इत्यादिकमयथार्थवचनमप्रमाणमेवेति निर्विवादम् ।

प्रत्युत अज्ञानामपि यथार्थवचनं तद्विदितार्थावबोधे प्रमाणमेव “ बालादपि सुभाषितम्, ” इति च न्यायसिद्धम्, तद्विदितार्थस्य तु सत्यत्वासत्यत्वयोरेवास्ति विवादः । तस्मात् सर्वदा समस्वरूपस्य परब्रह्मणः समुदितं प्रत्यक्षब्रह्मरूपं नित्यसिद्धं सर्वथा हिततमं यथार्थावबोधकत्वात् वेदवचनं प्रमाणम्, तद्वत् सद्विद्यापरिशीलनेन तपसा सदसद्विवेकेन सुविदितसत्यवस्तुतत्त्वानां साक्षात्कृतात्मनां ब्रह्मभावोपपन्नानां सर्वत्र समदृष्टीनां विश्वहितैषिणामृषीणां विदुषामपि श्रुतिस्मृत्याद्यविरुद्धवचनं प्रमाणार्हमिति सर्वेषां शास्त्रचिन्तकानां सिद्धान्तः ।

अत्र केचिदेवं प्रत्यवतिष्ठन्ते– विश्वस्यास्य जडप्रपञ्चस्य भौतिकादितत्त्वबोधविषये वेदवचनं प्रमाणं भवितुमर्हतीत्युच्यतां नाम, भौतिकप्रपञ्चस्य वेदकार्यत्वात् । न तु निर्विशेषस्य स्वतःसिद्धस्य चेतनात्मनः परब्रह्मणः बोधे तत्प्रमाणं भवितुमर्हति, ततोऽपि परत्वात् । तथैव सर्वेषामप्यन्तर्हृदये अहमिति स्फुरणतः प्रसिद्धस्य ब्रह्मात्मनो ज्ञानं तत्साक्षात्कारः तन्निष्ठा च येन केनचित् साधनविशेषेण तपसा वाक्यार्थविचारादिना सेत्स्यति, सुषुप्तिवत् समाधिरपि एकाग्रतातिशये सति स्वयमेव सम्पद्यते, तत्र श्रुतिरन्यथासिद्धैव भवेत्, सिद्धार्थानुवादकत्वेन वा चरितार्थेति वक्तव्यमापतति । तदा तस्य सत्यत्वादिकं वस्तुतत्त्वं तु अविदितमपि तन्निष्ठया अनुभूतमेव भवेदिति ।

अत्रेदं रहस्यम्-अन्तरात्मनः अहमिति प्रत्ययस्फुरणे वस्तुसिद्धमपि ब्रह्मतत्त्वं न विज्ञायते, नापि तत्सर्वानुभवसिद्धम्, तथा नो चेत् सर्वेऽपि कृतकृत्याः स्वतःसिद्धाः साक्षात्कृतात्मान एवेति, न तत्र साधनान्तरापेक्षा भवेत्, तत्तु विशिष्टाधिकारिणामितिचेत् यथा वामदेवस्य गर्भे एव ज्ञानोदयः प्रसिद्धः, तथास्तु तर्हि; तेषां तथा तत्परं ब्रह्मतत्त्वं स्फुरतीति कथं ज्ञायेत अन्यैः ? किं तत्र प्रमाणम् ? तेषामनुभूतिनिवेदितं वचनमेव प्रमाणमिति चेत्, नहि तत् ऋषीणामनुभवोदिताद्वेदवचनाद्विशिष्टम्, ज्ञानिनां वचनमेव तदनुभूतार्थविबोधे प्रमाणं चेत् वेदवचनमेवाप्रमाणमिति वचने को हेतुः ? अन्यानुभूतिवचनस्य वेदवचनस्य वा अप्रामाण्यवादेन स्ववचनैकप्रमाणवादी पुरुषोऽपि परेषामश्रद्धेयवचन एव भवेत् ।

अथ पुनः स्वानुभवैकतत्त्वपराणां तेषां तादृशानुभूतिज्ञानस्य परेषामलाभेऽपि, स्वसुखायालं भवति । किं तत्र अन्येषां लाभालाभादिचिन्तनानुसन्धानेन ? तदिदं स्वयं श्रुतिरेवानुश्रावयति—

'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ।' इति (बृ० उ० ४।४।१२)

तथा चेत् मौनिमूकादीनां ज्ञातार्थस्येव ज्ञानिनोऽपि ज्ञानस्य वाङ्मुखेनोपदेशाभावे तत्प्रकाशाभावात् प्रज्ञानाभिवृद्धिस्तत्सन्ततिश्च विच्छिद्येत । अथवा सर्वं वस्तुतत्त्वज्ञानं सर्वैरपि स्वयमेव सम्पादनीयं इति सर्वैरपि स्वयम्प्रज्ञैरेव भवितव्यं, नो चेत् अज्ञैर्वा स्थातव्यं भवेत् इत्यापद्येत । श्रुतिस्तु आत्मज्ञानिनां स्वभावतः सिद्धां ज्ञानतः सम्पन्नां च आत्मसुखानुभवैकतत्त्वपरतां यथा येन मुखेनानुवदति, तथा तेनैव च मुखेन ज्ञानोपदेशात् तत्प्रकाशेन ज्ञानाभिवृद्धिं तत्सन्ततिं चानुश्रावयति । तथाहि—

'ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥' इति० (मुं० उ० १।१)
भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच० ।'
इति (तै भृ० उ० १)

'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः ॥' इति (छां० उ० ७।२६।२)

'एतावदेवाहं तत्परं ब्रह्म वेद नातः परमस्तीति (प्रश्नो०६।७) अभयं वै जनक प्राप्तोऽसि । (बृ० उ० ४।२।४)

इत्यादीनि वचनान्युदाहर्तव्यानि ॥

यथा मनुष्याणां प्रसव-गर्भाधानादिकं स्त्रीत्वपुंस्त्वादिलिङ्गं, अन्यथा तयोः स्त्रीपुरुषयोः स्वात्मसुखसिद्धावपि वन्ध्यात्वनपुंसकत्वादिप्रसिद्धिरनिवार्या स्यात् तत्सन्ततिविच्छित्तिश्च । तथा स्त्रीपुरुषयोगेन आत्मप्रजासन्तत्या अमृतत्वप्रतिष्ठेव जिज्ञासोर्ज्ञानिनश्च योगेन ज्ञानसन्तत्या उत्तमामृतत्वप्रतिष्ठापि भवतीति सम्पद्यते ।

'प्रजाभिरग्ने अमृतत्वमश्याम् (ऋ० ५।४।१०); त्यागेनैके अमृतत्वमानशुः' (कै० उ० २; महानि० १०।५) इति । तथा उभयविधममृतत्वमेकस्यैव सेत्स्यति उभययोगात् ।

'त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवे दिवे
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये ॥' (ऋ० १।३१।७) इति मन्त्रवर्णात्

'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति, नास्याब्रह्मवित् कुले भवति० ॥' इति (मुं० उ० ३।२।९)

'इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्' (छां० उ० ३।११।५)

इति च उभयविधामृतत्वनिर्देशात् । अत एव ज्ञानोदयाय विद्वदविदुषोर्योगोपदेशः—

"अविद्वाँसो विदुष्टरं सपेम" (ऋ० ६।१५।१०) "अहस्तासो हस्तवन्तं सहन्ते" इति (ऋ० १०।३४।९)

यथा च परब्रह्मणः स्वतःसिद्धमपि सर्वज्ञत्वं सर्वक्रियाशक्तिमत्त्वं च सर्वज्ञानपूर्णवेदवागुद्गारेण, तथा वेदवाङ्मुखेन विश्वभूतसृष्ट्या, स्वसरूपसचेतनजीवराशिविसृष्ट्या च प्रकाश्यते । तथैव सर्वज्ञानां सर्वज्ञकल्पानां च ऋषीणामपि—

"अहं ब्रह्मास्मि" इत्यादिकं ज्ञानमपि "अहं मनुरभवं सूर्यश्च" (ऋ० ४।२६।१)

'अग्निरस्मि जन्मना जातवेदाः' (ऋ० मं० ३।२६।७)

इत्यादि वेदवागुद्गारेण प्रकाश्यं गतं सत्, सर्वेषामपि तादृशज्ञानोदयाय कारणं भवति । तस्मात् तत् सर्वज्ञं परं ब्रह्मापि स्वात्मप्रज्ञानप्रकाशायैव सर्वज्ञानपूर्णं वेदं प्रकाशयति, वेदमुखेन स्वं परं ब्रह्मरूपं तथा विश्वरूपं च तत्त्वं प्रकाशयति । अत एव वेदमुखेनैव तत्परब्रह्मप्रकाश इति सम्पद्यते, तथा च मन्त्रवर्णः—

'यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम्' इति । (तै० आ० ७।४।१;१०।६।१)

एवं प्रज्ञानात्मकपरावाग्रूपेण ब्रह्मणि नित्यसिद्धः सन् तत्प्रज्ञानप्रकाशनाय ब्रह्मणः सकाशात् प्राग्विश्वसृष्टेरपि आविर्भूतो वेदः तत्परं ज्ञानं प्रकाशयन् अद्यापि वरीवर्ति, इतः परमपि आप्रपञ्चप्रविलयं यथायथमेव चिरं प्रतिष्ठास्यति, सर्वप्रपञ्च-

प्रविलयेऽपि, स वेदो न प्रविलीयते, तदानीमपि प्रज्ञानात्मना परावाग्रूपेण तस्मिन्परमे व्योमन्यक्षरे ब्रह्मण्येवान्तर्हितः सन्, कल्पान्तरेऽपि यथापूर्वमेव पुनराविर्भविष्यति। तथा तत्परं ब्रह्म सर्वत्र पूर्णमपि वेदमुखेनैव विदुषां तपस्विनां अन्तर्हृदये स्वरूपतस्तत्त्वेन प्रकाशते।

एवं पूर्वे महर्षयः साक्षात्कृतात्मानः कीर्तिशेषा अपि स्वयममृतात्मानः सन्तः, आदिसृष्टिं वेददर्शनं चारभ्य अद्ययावत् वेदरूपेणैव प्रतितिष्ठन्ति, स्वात्मीयवेदवाङ्मुखेनैव उपदेशतः प्रत्यक्षवत् स्वं ज्ञानं प्रकाशयन्तः इदानीमपि वेदरूपेणैव जीवन्ति, इतः परमपि आप्रपञ्चप्रलयं वेदरूपेणैव चिरं प्रतिष्ठास्यन्ति। प्रत्यक्षब्रह्मरूपो वेद एव तेषामृषीणां प्रज्ञानात्मा शरीरं च, वेदवागेव तेषां सर्वापि ज्ञानक्रियादिशक्तिः। वेद एव तेषां सर्वस्वमिति च मुक्तकण्ठेनानुनिनादयन् सोऽयं चिरं विजयते दिव्यो वेददुन्दुभिः।

वेददर्शनम्

कथं ब्रह्मवचनात्मकस्य ऋगादिवेदानामुपलब्धिर्मनुष्याणाम्? न च निर्गुणं तत्परं ब्रह्म सशरीरीभूतं सत् मनुष्येभ्यो वेदानुपादिदेशेति श्रूयते वेदे, क्वचित् श्रुतमपि अर्थवाद इव न साक्षात् प्रमाणार्हं तस्मिन्नर्थे, नापि तथा लोके प्रसिद्धिरस्ति, पार्थसारथिनेराय, गीताशास्त्रमिव, न च अनवरतं वेदः उदीर्यते ब्रह्मणा, नापि तदुदीर्णोऽपि श्रूयते सर्वैः आकाशवाणीव, असामर्थ्यमेव तत्र कारणमिति चेत्, किं तत्सामर्थ्यं कीदृशं, किं तत्तादृशसामर्थ्योदये साधनं चेति निर्वक्तव्यम्। उच्यते, परस्माद्ब्रह्मणः प्रणवात्मनः ब्रह्मणस्पतेः सकाशात्, उच्छ्वासतः प्राणशक्तेरिव, वैद्युतज्योतिरात्मनः आग्नेना मुखेन समाविर्भूतानां तथा परमे व्योमन्यन्तरखण्डस्वरनादशब्दात्मनाऽन्तर्हितानां तेषामृगादिवेदानामुपलब्धिर्ऋषिमुखेनैवास्माकं भवितुमर्हति। तत्र यथा येनैव च रूपेण ब्रह्मणः सकाशादाविर्भावः वेदानां, तथा तेनैव च रूपेण ऋषीणामपि मुखाद् भवितव्यः इति सिद्धवस्तुनोऽयं तत्त्वसिद्धो न्यायः प्रसिद्धः। तेन यथोक्तेन सर्वहुन्नामकेन ब्रह्मणि सर्वहवनरूपेण आत्मयज्ञेन तपसा आविर्भूतस्वरूपाणां ऋषीणां ब्रह्मभावसम्पन्ना समाधौ प्रत्यग्दृशैव तत्तादृशं वेददर्शनं भवितुमर्हति। तथा च बृहस्पतेरार्षं ऋङ्मन्त्रदर्शनम् '**यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्**' इति (ऋ० १०।७१।३) तस्यायमर्थः-ज्ञानकामाः प्राज्ञः ऋषयः 'यज्ञेन' निर्विषयात्मविमर्शरूपेण धर्मसंज्ञकेन तपसा 'वाचः' सर्वार्थबोधकवाचकशब्दराशेः 'पदवीयं' मार्गं तदर्थरूपं मूलस्थानं 'आयन्' प्राप्तवन्तः अनुभूतवन्त इति यावत्। अतः तेषु अतीन्द्रियार्थद्रष्टृषु 'ऋषिषु प्रविष्टां' अनुभवन्तः ज्ञानरूपेण स्थितां अनुभूतार्थानुवादिनीं तां वाचं 'अन्वविन्दन्' प्राप्तवन्तः ऋषिमुखेन इतरे सर्वे जनाः लब्धवन्त इति। एतेन अतीन्द्रियार्थद्रष्टार ऋषयः तपसा यमर्थमनुदृश्य तदर्थावबोधिनीं छन्दोनिबन्धसहितां वाचं अनुश्रावयन्ति, स एव वेदो भवतीत्यर्थः सम्पद्यते।

तादृशं मन्त्रद्रष्टृत्वमेव ऋषित्वे प्रधानं लक्षणम् "**ऋषिर्विप्रः काव्येन**" इति मन्त्रवर्णात् (ऋ० ८।७९।१) विप्रः सम्यग्दर्शी काव्येन गायत्र्यादिछन्दोनिबद्धकाव्यरूपमन्त्रदर्शनेन ऋषिर्भवतीति। '**ऋषिर्दर्शनात्**' इति च यास्कनिरुक्तम्।

युगान्तेऽन्तर्हितान्मन्त्रान्सेतिहासान्महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥ इति च स्मृतिः।

अत एव गायत्र्यादीनां मन्त्राणां विश्वामित्रादयो मन्त्रद्रष्टारः ऋषयः प्रसिद्धाः श्रूयन्ते। "**गायत्र्या गायत्री छन्दो, विश्वामित्र ऋषिः, सविता देवता**" इति। (ना० उ० ३५)

एवं ब्रह्मात्मनि प्रज्ञानरूपेण नित्यसिद्धानां मन्त्राणां उच्छ्वासतः बहिरुत्स्रष्टृत्वं ब्रह्मणः, तपसा केवलं तद् द्रष्टृत्वं, श्रोतृत्वमेव ऋषीणामिति विवेकः।

"**उत नो ब्रह्मन्नविष इति शंसति श्रोत्रं वै ब्रह्म श्रोत्रेण हि ब्रह्म शृणोति**" इति च ब्राह्मणम् (ऐ० ब्रा० २।४०)
'**अथ यदतः परो दिवो ज्योतिर्दीप्यते; अथ...तद्यदिदमन्तः पुरुषे ज्योतिः; ...तदेतद् दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति**' (छां० उ० ३।१३।७-८) इत्याद्याः श्रुतय एव प्रत्यक्षं प्रमाणम्।

अथ पुनः कीदृशं तन्मन्त्रदर्शनं-विद्वद्वरेण्यकवीन्द्रादिविरचितकाव्यादेरपि तन्मन्त्रदर्शनमेव विशिष्टं प्रत्यक्षप्रमाणभूतं च मन्यन्ते शास्त्रविदः, तच्चेत्थम्भूतम्- तपसा पवित्रीकृतत्रिकरणानां साक्षात्कृतात्मनामृषीणां सन्निवृत्तशरीरेन्द्रियादिसर्व-

❀

विषयवृत्तीनां मन्तर्दशा समाधौ निर्विषयात्मस्थितौ केवलं प्रज्ञानात्मस्फूर्तिपूर्णे निर्मलेऽन्तर्हृदये ईशशक्त्यावेशेन अतीन्द्रियेष्वर्थेषु यत्तत्त्वार्थानुस्फुरणं, तथा सुषुप्तौ स्वप्ने वा अश्रुतपूर्वमन्त्रोपदेशादिश्रवणवत्, तदनुश्रवणम्। यच्च वाचापि तदनुवचनं तदेतद्दर्शनपदार्हं भवति। तत्रापि गायत्र्यादिछन्दोनिबद्धवागनुश्रवणे 'मन्त्रदर्शनं' गद्यगाथाद्यात्मके ब्राह्मणदर्शन'- मिति विवेकः। तथा तदनुश्रवणानुसारेण बुद्धिपूर्वकं तदनुस्मरणेन विरचिते 'स्मार्तं दर्शन'- मिति प्रसिद्धिः।

अत्र मन्त्रब्राह्मणयोरनुश्रवणात् तयोः 'श्रुति' संज्ञा प्रसिद्धा, कल्पसूत्रादीनां तु स्मरणेन रचितत्वात् 'स्मृति' संज्ञेति विशेषः। एवं तत्र मन्त्रदर्शने द्रष्टुर्ऋषेः वाग्बुद्ध्यादीन्द्रियकृतेरभावात् 'अपौरुषेयत्वं'; ऋषिमुखोदितत्वात् 'तदार्षेयत्वम्'; ईशावेशानूदितत्वात् 'ईशकृतित्वं' च समासेनोपपद्यन्ते। शास्त्रार्थमीमांसादौ तु एतेषामपौरुषेयत्वादीनां विभागेनापि अस्ति व्यवहारप्रसिद्धिः। तथा च बृहस्पतेरार्षं ऋङ्मन्त्रदर्शनम्—

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संजयन्ते सखायः।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ॥ इति (ऋ० १०।७१।८)

अन्तर्हृदयेन निर्णीतेषु मनसोऽपि सूक्ष्मेषु अतीन्द्रियेष्वर्थेषु समानज्ञानाः सखायः ब्राह्मणाः ब्रह्मविदः यत् संयजन्ते तद्विचारार्थं संमिलन्ति, अत्र अस्मिन्विषये त्वं एकं वेद्याभिः वेदितव्यत्वेन अवशिष्टाभिः विद्याभिः त्वं एकं विजहुः त्यक्तवन्तः त्वे एके सर्वज्ञाः ऋषयः "ओहब्रह्माणः" तपसा ऊहितमन्त्राः विचरन्ति सर्वविषयकज्ञानस्वातन्त्र्येण तिष्ठन्ति। इति "यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद् भवति" इति यास्कनिरुक्तम्।

वेदस्यापौरुषेयत्वम्

कथं तर्हि ऋषिभिर्विरचितानामपि वेदमन्त्राणां अपौरुषेयत्वं, ईशकृतित्वं च सिध्यति? "गायत्र्याः गायत्री छन्दो विश्वामित्र ऋषिः" इति गायत्र्यादीनां विश्वामित्रादयः ऋषयः श्रूयन्ते। प्रत्युत "यस्य वाक्यं स ऋषिः" इति परिभाषया वेदस्य स्पष्टं तत्तदृषिवाक्यत्वमेवेति वक्तव्यमापतति। अत्रास्ति कश्चिद्विशेषः- यथा च बालोन्मत्तदैवतपिशाचसुप्तादीनां अज्ञानोन्माददेवतावेशभूतावेशनिद्रावेशादिवशेनोच्चरितानां वचनानां तदर्थानां च, बुद्धिपूर्वकृतत्वाभावात्, तत्र गुणदोषादिकं तत्कृतित्वं च न गण्यते, नापि प्रमाणार्हता च। प्रत्युत क्वचित्तु 'बालादपि सुभाषितम्' इति न्यायेन तादृशाज्ञबालवाक्येऽपि श्रद्धागौरवाद्यनुसरणं दृश्यते, तथाभूतदेवताद्यावेशोच्चरितानां भूतदेवतादिकृतित्वमेवाङ्गीक्रियते, न तु तत्पुरुषकृतित्वम्। क्वचित्तु निधिरूपेण गुप्तानां नष्टानां च द्रव्यादीनां बोधकत्वेन भूतावेशाद्युच्चरितस्यापि प्रामाण्यमेव स्वीक्रियते, प्रत्यक्षं प्रतिपद्यते च तदर्थः। तथैव समाधौ ब्रह्मभावोपपन्नैर्ऋषिभिरीशावेशेनोच्चरितानां छन्दोवचनानामपि ऋषिकृतित्वे एवं विधैव भवितुमर्हति। ततश्च अपौरुषेयत्वेन वेदानां ऋषिदर्शनमात्रत्वमेव पर्यवस्यति। एतेन—

"यामृषयो मन्त्रकृतो ...आन्विछन् देवास्तपसा श्रमेण ॥ (तै० ब्रा० २।८।८।५)

"अहᳬ श्लोककृत्" (तै० उ० भृ० १०।६) इत्यादावपि ऋषीणां मन्त्रकृतिः केवलं दर्शनश्रवणादिरूपैव, न तु काव्यादिकृतिरिव पुरुषकृतिरूपेत्यवगन्तव्यम्।

वस्तुतस्तु परब्रह्मणोऽपि वेदकृतिः भूतादिजडवस्तूत्पत्तिरिव वा कवीनां काव्यादिकृतिरिव वा अभूतपूर्वा भवितुं नार्हति, ब्रह्मणि तादात्म्येन नित्यसिद्धस्यैव वेदस्य उच्छ्वासतः उत्सर्गश्रवणात्। 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः (बृ० उ० २।४।१०) "अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा॥" इति च कठकौथुमशाकलादीनां शाखाप्रवर्तकानामपि ऋषीणां प्रवचनमात्रेणैव वेदस्य सम्बन्ध इति निर्णीतं मीमांसायाम् "शाखा-प्रवचनात्" इत्यादि सूत्रैः। एवमेव ब्रह्मणः सकाशादाविर्भूता एतादृशाः प्रत्यक्षाः परब्रह्ममूर्तिरूपाः इन्द्रादिदेवताधिष्ठानभूता ऋगादयो वेदमन्त्राः, परमे व्योमनि परावाग्रूपेण अखण्डशब्दात्मनाऽन्तर्हिताः, अनवरतं अतिसूक्ष्मं शब्दायमानाः प्रतितिष्ठन्ति। तांश्च तदधिष्ठाता ब्रह्मणस्पतिः स परमः पुरुष एव स्वयमुच्चरतीति वेदे श्रूयते, ये खलु मन्त्राः पूर्वं ऋषिभिः श्रुताः अश्रुताश्च पुनः श्रूयन्ते तथा अनुश्राव्याश्च भवन्ति तथा च मन्त्रवर्णः—

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्। यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥
इति (ऋ० १।४०।५; वा० य० ३४।५७)

एतेन प्रसिद्धेभ्योऽपि ऋगादिमन्त्रेभ्यो भिन्ना असङ्ख्याताः मन्त्राः स्वयंसिद्धाः विद्यन्ते परमे व्योमन्यन्तर्हिता इति सिध्यति। अतएव "अनन्ता वै वेदाः" इति वचनमपि एतदेव समर्थयति। तस्मात् प्राचामृषीणां मन्त्रदर्शनश्रवणादिवत् इदानीमपि तपसा तादृशं मन्त्रदर्शनं शक्यं भवितुमिति प्रतीयते। तथा च मन्त्रवर्णः—

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति ॥ इति (ऋ० १।१।२)

अत्र 'ऋषिभिः' इति पदं देहलीदीपवन्मध्यस्थं सत् 'पूर्वेभिः नूतनैः' इत्युभयत्रापि सम्बध्यते, तेन सः अग्निः पूर्वैः नूतनैश्च ऋषिभिः ईड्यः इत्युक्तं भवति। तत्तादृशं ऋषित्वं मन्त्रदर्शनादेव भवतीत्युक्तं, तत्र नूतनर्षित्वं च नूतनमन्त्रदर्शनादेव भवितुं शक्यं नान्यथेति न पुनर्वक्तव्यम्। 'उत' इत्येतत्पदमपि यथापूर्वमेव नूतनर्षित्वं बोधयति। 'अग्निः पूर्वेभिर्ऋषिभिः' इत्येतन्मन्त्रभाष्ये 'श्रीवासिष्ठगणपतिमुनेः' भाष्यवचनमपि एतदेवोपोद्बलयति। 'पूर्वेभिः पुरातनैः नूतनैः उत नवीनैश्च ऋषिभिः मन्त्रद्रष्टृभिः ईड्यः ईडितुं शक्यः, सोऽग्निर्देवानिहावहतु'। 'ऋषिभि' रित्यनेनैतदाह-नानृषिर्यथावद् भगवन्तं स्तोतुं शक्नुयादिति। 'नूतनै'-रित्यनेनैतदाह-नर्षित्वं कालसापेक्षमिति। तस्मात् तादृशतपःसामर्थ्याभावमन्त्रदर्शनाभावे अनृषित्वे च कारणं, तादृशं मन्त्रदर्शनमेव ऋषित्वे प्रधानं साधनमिति च सम्पद्यते। 'ऋषिर्विप्रः काव्येन' इति मन्त्रवर्णात्।

अथ पुनः कुत एतदकस्माद्भूतम्- इदानीमपि यथापूर्वं तादृशं मन्त्रदर्शनं भवितुं शक्यमिति, तदेतददृष्टपूर्वं अश्रुतपूर्वं सर्वथाप्यप्रसिद्धं नूतनमेव। कथं च पुनर्मानुषकर्तृकं ऋष्यैकविषयकं च तत्तादृशं मन्त्रदर्शनं इदानीमपि भवितुं शक्यमित्युच्यते, "ब्रह्मात्मदर्शनमिवैवेति" ब्रूमः, तद्यथा "अहं मनुरभवं सूर्यश्च" इति वामदेवस्य ऋङ्मन्त्रदर्शनमुखेनोपदिष्टं ब्रह्मात्मदर्शनं प्रसिद्धम्। तच्च "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्। तथर्षीणां तथा मनुष्याणां, तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" इति (बृ० उ० १।४।१०) याज्ञवल्क्यस्य उपनिषद्वचनेनोपबृंहितं च वामदेवस्य तद् ब्रह्मात्मभावदर्शनं इदानीमपि यथोक्तसाधनेन तपसा विदुषां यथापूर्वमेव भवितुमर्हति; तथा भवतीत्यप्यभ्युपगम्यते सर्वैरपि शास्त्रज्ञैः, "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति (ब्र० सू० १।१) ब्रह्ममीमांसानिर्णयात्। अन्यथा ब्रह्मदर्शनार्थं सर्वशास्त्रानुचिन्तनं सर्वविद्याशिक्षणं तत्परिशीलनं च सर्वथानर्थकमेव स्यात्।

सुप्रसिद्धाः तदनन्तरमपि सम्भूताः श्रीशङ्करदेशिकेन्द्रप्रभृतयः साक्षात्कृतात्मानो ब्रह्मतत्त्वविदः आचार्याः, तथैव इदानीमपि विद्यन्ते केचित् चतुर्थाश्रमिणः अतिवर्णाश्रमिणश्च ब्रह्मतत्त्वज्ञाः आत्मसाक्षात्कारेण प्रसिद्धाः। तदिदं शास्त्रसिद्धं वस्तुतत्त्वं इदानींतनैरप्यभ्युपगम्यते। एवं परोक्षस्य परब्रह्मण एव दर्शनं भवतीत्यभ्युपगम्यमाने, ब्रह्मकार्यस्य प्रत्यक्षब्रह्मरूपस्य वेदस्यैव दर्शनं भवितुं न शक्यमिति को हेतुः ?

कारणैकविज्ञाने कार्यरूपसर्वविज्ञानप्रतिज्ञेव सर्वकारणीभूतपरब्रह्मात्मदर्शने तत्कार्यभूतप्रत्यक्षब्रह्मरूपवेदमन्त्रदर्शनप्रतिज्ञापि अर्थात् सिद्धैवेति न पुनर्वक्तव्यम्। भूतवस्तूनामिदं स्वभावसिद्धं तत्त्वं यत् साधनसम्पत्तौ सिद्धायां साध्यसिद्धिरपि स्वयमेव भविष्यति। प्रमाणसिद्धौ प्रमेयसिद्धिरिति यावत्। तद्यथा नेत्रार्थसन्निकर्षेण तदर्थज्ञानं सम्पद्यते। तस्मात् परब्रह्मणः प्रत्यक्षब्रह्मरूपवेदस्यापि दर्शने तत्त्वं तत् समानमेवेत्यभ्युपगन्तव्यम्।

अथ पूर्वेभ्यो वसिष्ठादिमहर्षिभ्योऽनन्तरं एतावत्पर्यन्तं ब्रह्मात्मदर्शनं वेददर्शनं यस्य कस्यचिद् ज्ञानिनोऽपि अभवदिति शास्त्रे लोके च प्रसिद्धिर्नास्ति, येन तथाऽभ्युपगम्यते। तस्मात् आदिसृष्टौ विश्वाविर्भाव इव ब्रह्मणः सकाशात् वेदानामाविर्भावः, तथा ऋषीणां मुखेन तत्प्रकाशश्च यद्बभूव, तदेव प्रधानं न च तत्पुनर्भवितुं शक्यमिति न्याय्यमिति चेत्, सत्यमेवैतत्- तथा चेत केवलं वेदान्तवाक्यार्थविचारसाध्यात् ब्रह्मदर्शनादपि वेददर्शनमेवासामान्यं परमतपःसाध्यं अनन्यसाधारणं विशिष्ट-

तरमित्यर्थादुक्तं भवति । तावता 'साधनसिद्धौ साध्यसिद्धि' रिति न्यायः कदाचिदपि न व्यभिचरति । तद्यथा—सर्ववेदमूलभूतस्य ज्ञानराशेश्चेतनात्मनः परोक्षस्य परब्रह्मणः वस्तुतत्त्वबोधकत्वात् गुरुरेव प्रत्यक्षं तत्परं ब्रह्म, तस्माद् ब्रह्मणोऽपि गुरुरेव श्रेष्ठः प्रत्यक्षत्वादिति श्रुतिस्मृतिन्यायादिसिद्धं तत्त्वम्—

"अविद्वांसो विदुष्टरं सपेम" (ऋ० ६।१५।१०)

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ इति ।

परोक्षादपि प्रत्यक्षमेव विशिष्टतरमिति न्याय्यम् । परोक्षस्य परब्रह्मणः प्रत्यक्षीकरणार्थमेव सर्वोऽपि प्रयत्नः; तद्वदेव परोक्षब्रह्मणः यथार्थतत्त्वबोधकत्वेन तत्साक्षात् कारणत्वात् प्रत्यक्षप्रमाणभूतत्वाच्च प्रत्यक्षब्रह्मरूपो वेदः 'गुरुरिव' परब्रह्मसमानः, ततोऽपि गरीयानिति पर्यवस्यति । वस्तुतस्तु गुरोरपि तद्गुरुत्वं अग्नेरिवात्मसात्करणसामर्थ्ययोगात्, वचनमुखेन ज्ञानदातृत्वाच्च । तस्मात् तत्सन्निधावसन्निधौ च क्वचिदत्यन्तं तद्वियोगेऽपि तदनुशासनवचनस्यैव प्राधान्यात् चिरस्थायित्वाच्च प्रामाण्येन तद्वचनानुसरणमेव सर्वथा शरणम् । तद्वदेव परब्रह्मनिष्ठार्थं तच्छासनरूपं ऋषिभिरनुशासितं गुरुणाऽपि पित्रादिना गायत्र्यादिमुखेनोपदिष्टं प्रत्यक्षब्रह्मरूपं वेदवचनमेव शरणम् । अतएव ईश्वरस्यापि सर्वगुरुत्वं प्रसिद्धम् ।

"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥

इति ॥ (पा० यो० सू० १।२४)

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । (मनु० स्मृ०) " उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ॥

" त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति ॥ इति च (प्रश्नोप० ६ प्रश्नः)

एवमादीनि वचनानि ब्रह्मदातृत्वेन गुरोः श्रेष्ठत्वं दर्शयन्ति । अस्मिन्वेददर्शनविषये वासिष्ठस्य गणपतिमुनेः विश्वमीमांसा श्लोकाः—

१. वेदश्छन्दोमयो मन्त्रो दिव्यदृष्ट्यनुभूतिकः । प्रत्यक्षं तत्प्रमाणं स्यात्तपसा दर्शनादृषेः ॥
२. वेदो ब्रह्मात्मविज्ञानं नित्यं तस्यानुभूतितः । तपसा तत्प्रकाशार्थमुदीर्णा वागपि श्रुतिः ॥
३. समष्टेः करणेनेव ऋषीणामात्मनीरितम् । हृदाऽनूदितमेवान्तरार्षं तद्दर्शनं श्रुतम् ॥
४. अनन्ता वै स्थिता वेदाः व्योम्न्यखण्डस्वरात्मकाः । तपसाऽन्तः समाधौ च श्रूयन्ते ते महर्षिभिः ॥
५. स्वभावः सिद्धवस्तूनां द्रष्टुर्दर्शनयोग्यता । सामर्थ्यं तादृशं यत्र तत्र स्यात्स्फुरणं स्वयम् ॥
६. ददृशुर्ऋषयो वेदं पूर्वे वै तपसा यथा । इदानीमपि तच्छक्यं तथैव द्रष्टुमन्तरे ॥
७. ब्रह्मात्मदर्शनं यद्वत् यथापूर्वं प्रमाणतः । इदानीमपि सम्पाद्यमृषीणामिव तत्त्वतः ॥
८. तपसाऽन्तर्दृशा चैव पूर्णवद्वस्तुदर्शनात् । मेरवाचामपि तथा दर्शनं हि भवेत्सताम् ॥
९. परस्यापि ब्रह्मणश्चेद्दर्शनं शाश्वतो भवेत् । किं शब्दब्रह्मरूपस्य वेदस्य नेति वाग्मतः ॥
१०. बहुधाऽपि तपस्तप्त्वा प्राप्तुं तन्मन्त्रदर्शनम् । नाशक्नवमहं पूर्णं संस्कर्तुं हृदयं तथा ॥
११. तथापि तपसैवाप्तुं शक्यं तन्मन्त्रदर्शनम् । इति मे सुदृढो यतो निश्चयोऽप्यस्ति शाश्वतः ॥
१२. इदानीमपि मन्त्राढ्यां सत्यसन्धो महायशाः । आदिशन्नात्मदृष्टम्यो देवरातः प्रदृश्यते ॥
१३. एवं यो यतते योगात् मनोवाक्कायकर्मणाम् । सोऽप्यनन्तस्तपसाऽवश्यं मन्त्रद्रष्टा भवेदृषिः ॥

वेदैकत्वविचारः

मनुष्याणां हितार्थं सर्वज्ञानप्रकाशनाय ऋगादिवेदरूपं शास्त्रं प्रवृत्तमित्युक्तम्, सोऽयं शास्त्ररूपो वेदः शब्दरूपः अर्थरूपश्चेति द्विधा प्रसिद्धः । तत्र अर्थरूपं शास्त्रं ज्ञानात्मकं अनुभवादिरूपम् । शब्दरूपं तु विदित-अनुभूताद्यर्थानुवादकं वाग्रूपमिति विवेकः । तदिदं शब्दशास्त्रमेव स्वार्थविबोधे अनन्यनिरपेक्षं स्वतःसिद्धं प्रत्यक्षं प्रमाणं प्रदीपवदेव । यदेतदुभयविधमपि शास्त्रं विद्याशब्देन व्यवह्रियते, तत्र अर्थरूपा विद्या तावत् (वेदश्च) विद्यतेऽनेन तत्त्वं जिज्ञासु-

भिरिति विद्या (वेदः) इति व्युत्पत्तिसिद्धः ज्ञानरूपः, शब्दरूपा तु वेदयति स्वं वाच्यमर्थमिति सिद्धा वाग्रूपा । एवं शब्द-तदर्थज्ञानयोरुभयोरपि सदर्थप्रापकत्वेन वेदः विद्या इति संज्ञाद्वयं शास्त्रे लोके च प्रसिद्धम् । तदिदं संज्ञाद्वयमपि अर्थ-ज्ञानरूपस्य शास्त्रस्य मुख्यया वृत्त्या प्राप्तं, शब्दरूपस्य तु गौणवृत्त्येति विशेषः । तत्र ज्ञानरूपविद्याप्रापकत्वात् शब्दविद्या-रूपस्य वेदस्य प्रधानं विद्यात्वमिति केचित् । शब्दविद्याफलरूपत्वात् ज्ञानरूपस्यैव प्रधानं विद्यात्वमित्यन्ये । वाच्यवाचकयोः साध्यसाधनभूतयोः तादात्म्यात् शब्द-तदर्थज्ञानयोरुभयोरपि तुल्यं विद्यात्वमित्यपरे ।

वस्तुतस्तु शब्द-तदर्थज्ञानरूपयोः शास्त्रयोर्विद्यात्वे तुल्येऽपि ज्ञानरूपैव परा विद्या फलरूपत्वात्; प्रधाना श्रेष्ठा च, शब्दरूपा तु अपरा विद्या तत्साधनभूतत्वात् इत्येव युक्तम् । तथा च औपनिषदं ब्राह्मणवचनम्- "**द्वे विद्ये वेदितव्ये परा चैवापरा च, तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ।**" (मुण्ड० १।१।४) इति शब्दविद्यायाः ज्ञानविद्यायाश्च परापरत्वेन पृथङ्निर्देशात् ।

यथा ज्ञानात्मा वाच्योऽर्थरूपः परब्रह्मसंज्ञकः ईश्वरः एकरूपः एक एव नित्यसिद्धः तथैव वाच्यवाचकयोस्तादात्म्यात् तदुच्छ्वासात्मकः वाचकरूपः सर्वोऽपि शब्दात्मकः सः वेदोऽपि दर्शनश्रवणादिना आविर्भूतः एकरूपः स एक एवेति प्रतीयते । "**यो वेदेन ददाश मर्तो अग्नये ।** (ऋ० ८।१९।५) इत्यविशेषेण एकवचनेन एकरूपनिर्देशानुगमात् । कथं तर्हि "**सर्वे वेदा यत्पदमामनन्ति ।**" (कठो० १।२।१५)

इति वेदस्य सर्वशब्देन सह बहुवचनेन च निर्देशः, तथा ऋग्यजुःसामाथर्वनामभेदतः चतुःसंख्याप्रसिद्धिश्च, अवान्तर-भेदापेक्षयेति ब्रूमः, तद्यथा एक एव, वृक्षः मूलं शाखा पर्णं पुष्पं फलं चेति अवान्तरभेदेन बहुधा दृश्यते, तत्र वृक्षात्मना मूलपर्णादयः एकात्मान एव पर्णाद्यात्मना तु भिन्ना इव दृश्यन्ते । फले बीजे च सर्वात्मकत्वप्रसिद्धेः । एव-मेकस्मिन्नेव वेदे अवान्तरभेदेन विशिष्टाः केचन शब्दसमूहाः 'सर्वे वेदाः' इत्युच्यन्ते, नहि तावता वेदस्य एकत्वं एकरूपत्वं च हीयते, नाप्यनेकरूपत्वं प्रतिष्ठाप्यते । एवं क्वचिद् गुणधर्मवृत्तिक्रियादिभेदेनापि अवान्तरभेदो दृष्टः, यथा प्राणः एक एव सन्नपि वृत्तिस्थानादिभेदमात्रेण भिन्ननामतः पञ्चधा प्रसिद्धाः ।

तत्र "**योऽस्य प्राङ्सुषिः स प्राणः, यः प्रत्यङ्सुषिः सोऽपानः । योऽस्य दक्षिणः सुषिः स व्यानः, य ऊर्ध्वः सुषिः स उदानः, य उदङ्सुषिः स समानः**" इति श्रुतेः (छां० उ० ३।१३।१) हृदयादिस्थानभेदेनापि "**हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे स्यात् व्यानः सर्वशरीरगः ।** इति । अत्र एतेषां प्राणादीनां वृत्तिस्थानादिभेदेन भेदव्यवहारः, एवं वेदोऽपि वस्तुतः एकरूपः एक एव सन्नपि केनचिद्विशेषेण अनेकधा व्यवह्रियते ऋगादिसंज्ञाभिः । तथा च ब्राह्मणम्-'**सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राणा एव प्राणः ऋच इत्येव विद्यात्**' इति (ऐ० आ० २।२।२) । अत्र सर्वे वेदाः इति यद् बहुधा निर्देशः तदिदं "सर्वे घोषाः" घोषरूपाः अभिव्यक्ताः शब्दसमूहाः सर्वे अनेके इति यावत् । तेषां सर्वेषां शब्दसमूहरूपाणां वेदानां "एकैव व्याहृतिः" दर्शनादिना अभिव्यक्तिरेक-रूपा एकैवेत्यर्थः । "प्राणा एव प्राणः" वृत्तिस्थानादिभेदेन पञ्चधा भिन्नाः प्रसिद्धा अपि प्राणः "प्राणः" प्राणात्मना तु एक एवेति भावः । ऋच इत्येव विद्यात् ' एवं ऋचः ऋगादेः सर्वस्यापि शब्दराशेः दर्शनादिना अभिव्यक्तिरूपेण एकत्वं वृत्ति-विषयादिभेदेन अनेकधा व्यवहारः प्राणवदिति ज्ञेयम् । अत्र "ऋचः" इत्युपलक्षणं ऋक्प्राधान्याभिप्रायम् । तेन "सर्वे वेदाः" इति वेदबहुत्वनिर्देशोऽपि स्थानवृत्तिविषयनामादिबहुत्वाभिप्रायमेव बोधयति । तथा च "यत्पदमामनन्ति" इति च अविशेषेण सर्वेषामपि वेदानां यत्पदनिर्दिष्टस्य एकस्यैव पद्वस्तुनः एकरूपेणैव बोधकत्वेन निर्देशात् । प्रत्युत "सर्वे वेदाः" इत्येतद्वचनं तथा तद्गतं बहुवचनमपि वेदैकत्वस्यैवोपोद्बलकं, न तु वेदबहुत्वस्य, तदाम्नातार्थैकत्वात् । सर्वेषामपि वेदानां साक्षात् परम्परया वा एकार्थपरत्वात् वेदैकत्वमिति भावः । अत्र "**वेदोऽखिलो धर्ममूलम्**" इति स्मृतिवचन-मप्युदाहरणीयम् ।

कथं तर्हि वेदे श्रुतानां अग्नीन्द्रसूर्याद्यनेकदेवतास्तुतीनां एकार्थपरत्वम्, येन एकार्थपरत्वेन वेदानामेकत्वमध्यवसीयेत ।

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ (ऋ० १।१६४।४६)

इति एकस्यैव सद्वस्तुनः अग्न्यादिबहुधाविभूतियोगनिर्देशात् । तस्मादीशनिःश्वासादाविर्भूतः तथा ऋषिभिश्च तपसा दृष्टः श्रुतश्च वाङ्मयः सर्वोऽपि छन्दोमयः शब्दराशिः शास्त्रसंज्ञितो वेदः एकरूपः एक एव, साक्षात् परम्परया वा एकार्थप्रतिपादनपरत्वादिति सर्वथा सम्पद्यते । अत एव सोऽयं सर्वोऽपि वेदराशिः प्राधान्येन ऋक् शब्देनैवाभिधीयते । तथा च दीर्घतमसः आर्षं ऋङ्मन्त्रदर्शनम्—

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः।यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ इति (ऋ० १।१६४।३९; अथर्व० शौ० ९।१०।१८; तै०ब्रा० ३।१०।९।१४; तै० आ० २।११।१; नि० १३।१०)

तस्यायमर्थः– 'ऋचः' वाचकात्मना सिद्धस्य ऋगादिसमग्रछन्दोराशेः 'यस्मिन्' कारणभूते वाच्यार्थरूपे 'अक्षरे' अक्षरात्मके 'परमे व्योमन्' परमाकाशाभिधे सद्वस्तुनि 'विश्वे देवाः' सर्वे देवाः ब्रह्मादिस्तम्बपर्यन्ताः प्राणिनो जीवात्मनः सर्वजगद्रूपाः, तथा तद्वाचकरूपाः शब्दसमूहाश्च 'अधि निषेदुः' प्रतितिष्ठन्ति । 'यः' मनुष्यः 'तत्' ऋगादिसर्वशब्दवाच्यं अक्षरब्रह्मरूपं परं अर्थं 'न वेद' न जानाति, 'ऋचा' केवलेन वाचकेन ऋगादिशब्दराशिना 'किं करिष्यति' न किंचित्प्रयोजनमित्यर्थः । 'य इत्तद्विदुस्त इमे समासते' ये एव तद्वाच्यं परं अर्थं जानन्ति, ते यथार्थज्ञानेन वेदफलं लब्ध्वा अमृतात्मानो भवन्तीति भावः ।

अत्र सर्वेषामपि वेदानां ऋगैकशब्देन निर्देशात्, तथा तेषां अक्षरब्रह्मैकार्थपरत्वोपदेशाच्च स्पष्टतरं वेदैकत्वं एकार्थपरत्वात् इति सिध्यति—

'प्राणा एव प्राणः ऋच इत्येव विद्यात्' इति च उदाहृतं ब्राह्मणवचनम् ।

सोऽयं शब्दरूपो वाङ्मयात्मको वेदः 'मन्त्ररूपः ब्राह्मणरूपश्चेति द्विधा प्रसिद्धः' । तत्र गायत्र्यादिच्छन्दोनिबन्धनानियतः काव्यरूपो 'मन्त्रभागः'। स च जपहोमस्तुतिकर्मादिषु प्रयोज्यत्वेन विनियुक्तः, क्वचित् वस्तुतत्त्वोपवर्णनादिविशिष्टश्च भवति। गायत्र्यादिनियतबन्धरहितः केवलं वाक्यरूपः गद्यात्मकः क्वचित् गाथात्मकश्च विधिभागः मन्त्राणां जपहोमादिषु विनियोजकः। तस्यैव विधिभागस्य 'ब्राह्मणम्' इति संज्ञा शास्त्रसिद्धा । मन्त्रब्राह्मणात्मको वेदः' इति प्राचां वैदिकानां सिद्धान्तः प्रसिद्धः ।

तत्र विधिभागस्य ब्राह्मणसंज्ञा तु ब्रह्मसंज्ञितानां मन्त्राणां विधानाद्यर्थप्रकाशनद्वारा मन्त्रोपसर्जनीभूतत्वादेव प्राप्ता । मन्त्राणां ब्रह्मसंज्ञा तु ब्रह्मैकवस्तुसम्भूतत्वात् ब्रह्मैकार्थपरत्वाच्च । तथा मन्त्रवर्णः—

'उस्रा इव सूर्यो ज्योतिषामहो विश्वेषामिज्जनिता ब्रह्मणामसि (ऋ० २।२३।२) इति गृत्समदः । हे बृहस्पते 'ज्योतिषा महः' पूजनीयः 'सूर्यः' असौ 'उस्राः' आत्मनो ज्योतिः किरणानीव त्वं 'विश्वेषां इत्' सर्वेषामेव 'ब्रह्मणां' मन्त्राणां 'जनिता' जनयिता प्रादुर्भावहेतुभूतोऽसि । तस्य परमपुरुषस्य 'ब्रह्मणस्पति' संज्ञापि ब्रह्मसंज्ञकमन्त्राविर्भावकारणत्वादेव—

"प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्" इति च (ऋ० १।४०।५)

ब्रह्मशब्दस्थाने तदर्थे च मन्त्रशब्दश्रवणात् ब्रह्मैव मन्त्रः मन्त्र एव ब्रह्मेति सिध्यति । एवं सहस्रशः श्रुतिषु ब्रह्मशब्देनैव मन्त्रो दर्शितः तथा मन्त्राणामेव निर्देशार्थं ब्रह्मशब्दः श्रुतः । न क्वचिदपि ब्रह्मशब्देन ब्राह्मणभागो निर्दिष्टः, तस्य वेदत्वे श्रुतित्वेऽपि. नापि ब्राह्मणवाक्यनिर्देशार्थं ब्रह्मशब्दः प्रयुक्तः श्रुतः । तथा च 'ब्रह्मणः इदं ब्राह्मणं' इति व्युत्पत्त्या 'ब्राह्मणं नाम' ब्रह्मसम्बन्धी अर्थात् मन्त्रसम्बन्धी कश्चिद् वेदभाग इति गम्यते । एतेन सर्वत्र वेदेषु मन्त्रभागस्यैव ब्रह्मशब्देन निर्देशात्, विधिभागस्य तु ब्राह्मणशब्देनैव निर्देशाच्च पारिशेष्यात्—

ब्रह्मसंज्ञितस्य मन्त्रभागस्यैव मुख्यं वेदत्वं, विधिभागस्य तु 'ब्रह्मणः इदं ब्राह्मणं' इति मन्त्रसम्बन्धित्वात् मन्त्राणां अर्थप्रकाशकत्वेन, क्वचिद् विनियोजकत्वेन च, तदुपसर्जनीभूतत्वात् ब्राह्मणस्य गौणं वेदत्वमिति सिध्यति । यथा वेदस्य गौणं ब्रह्मत्वं परब्रह्मवाचकत्वप्रयुक्तं तद्ब्रह्मतत्त्वावबोधकत्वात् ब्रह्मात्मरूपपरमपुरुषसंस्तुतेः मुख्यं ब्रह्मत्वं तु परब्रह्मण एव । तथैव ब्रह्मरूपस्य मन्त्रस्यैव मुख्यं वेदत्वं, मन्त्रार्थानुवादकत्वेनैव प्राप्तं विधिभागस्य ब्राह्मणस्यापि वेदत्वं, न तु स्वतः, अत गौणमिति दर्शयते—

तदिदं मन्त्रार्थानुवादकत्वं च आत्मनः ब्राह्मणभागस्य तद्ब्राह्मणवचनमेव तत्र तत्र स्वयमेवोद्घोषयति । ब्राह्मणवाक्यप्रतिपादितेऽर्थे प्रामाण्याय ऋगादिमन्त्राणामेव अवलम्बनत्वेन निर्देशात् । " तदेतदृचाभ्युक्तम्, तदप्येतदृषिणोक्तम्, तदप्येष श्लोको भवति । " इत्यादिभिरनुवचनैः । यथा च पुनः राजसम्बन्धिनः सेनापत्यादेः राजपुरुषत्वं राजत्वं च गुणभूतं राजानुसारित्वात् । एवं ब्राह्मणभागस्य गौणमेव वेदत्वं ब्रह्मरूपवेदमन्त्रानुसारित्वादिति सिद्धम् ।

अनयोर्मन्त्रब्राह्मणयोर्लक्षणं जैमिनिनाभिहितम्- " मन्त्रोऽभिधानवाची स्यात् । तच्चोदकेषु मन्त्राख्या । शेषे ब्राह्मणशब्दः " (पू०मी० २।१।३१-३३) इति एवं छन्दःशब्देनापि मन्त्रभागस्यैव प्रधानं वेदत्वम् । " यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु० ॥ " इति (तै० उ० १।४।१) यः खलु छन्दसां ऋषभः अधिपतिर्वर्षकश्च स्वयं सन् " विश्वरूपः विश्वविभूतियोगेन पूर्णः, छन्दोभ्य एव पुनः अमृतात्मनः सम्बभूव विश्वरूपेण आविर्बभूव । छन्दोमुखेनैव प्रकाश्यते इति । स इन्द्रः मां मेधया ज्ञानशक्त्या स्पृणोतु पूरयतु इति । छन्दस्त्वं च गायत्र्यादिछन्दोनिबन्धनकृतं तच्च मन्त्राणामेव भवति, न तु ब्राह्मणभागस्य ।

एवं यज्ञादिषु विनियोगादपि मन्त्राणामेव मुख्यं वेदत्वम् । " यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । " इति (ऋ० ८।१९।५) यः मर्त्यः समिधा आहुत्या वेदेन च अग्नये ददाश हविर्ददाति । तद्धविःप्रदानं च मन्त्रैरेव भवति, न तु ब्राह्मणवाक्येन । " प्रत्यृचं जुहुयात्स्वाहाकारान्तैर्मन्त्रैः " इति समन्त्रकमेव हवनादिविधानात् ।

" मन्त्रब्राह्मणयोर्वेदनामधेयम् " इति सूत्रीकरणमपि मन्त्राणां वेदत्वं स्वतःसिद्धमेव, ब्राह्मणभागस्य तु न स्वतःसिद्धमिति, मन्त्रेण सह ब्राह्मणस्यापि सङ्ग्रहेण, ब्राह्मणस्यापि तद्वेदत्वं सम्पादयितुमेवेति गम्यते । तेन मन्त्रार्थप्रकाशनेन ब्राह्मणभागस्य वेदोपजीव्यत्वेनैव वेदत्वमित्यवश्यमभ्युपगन्तव्यम् ।

मन्त्राङ्गभूतानां ऋषिच्छन्दोदैवतानामिव, ब्राह्मणभागस्यापि मन्त्रोपसर्जनीयत्वेन बोधोपदेशात्मपि मन्त्रभागस्य प्रधानं वेदत्वं, ब्राह्मणस्य तु गौणमिति गम्यते । तथाहि- " यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण यजते, याजयति वाऽध्यापयति वा, स्थाणुं वर्च्छति, गर्तं वा पात्यते, प्रमीयते वा, पापीयान्भवति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात् " इति (छ० ब्राह्मणवचनम्) ।

" ब्राह्मणार्षेयछन्दोदैवतविद्याजनाध्यापनाभ्यां श्रेयोऽधिगच्छति० । इति सर्वानुक्रमपरिभाषासूत्रम् ।

स च मन्त्रभागात्मको वेदः एकोऽपि अवान्तरभेदेन द्विधा त्रिधा क्वचित् चतुर्धा विभक्तो दृश्यते—

" तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । "
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ (ऋ० १।९०।१०)

इत्यत्र ऋग्यजुःसामनामभिः प्रसिद्धाः साक्षात् श्रुताः त्रयो वेदाः । अत्र " छन्दाँसि जज्ञिरे तस्मात् " इति केवलं छन्दःशब्देन निर्दिष्टोऽपि, तस्य ऋगादिवेदपंक्तावेव वेदत्रयात् पृथङ्निर्देशात् पारिशेष्यादथर्ववेदपरत्वाङ्गीकारेण केचित् वेदस्य चतुर्धा क्लृप्तिमभ्युपगच्छन्ति । ' अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम् । ' इति

मन्त्रे स्पष्टमनुश्रुतं वेदत्रयमेव केचित् प्रधानं मन्यन्ते, तेषां ऋग्यजुःसामाख्यानां त्रयाणां वेदानां " त्रयी " इति समष्टिसंज्ञा प्रसिद्धा । " यमृषयस्त्रयीविदाविदुः " इति शब्देन वेदत्रयाम्नानात् । " प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत् " (छां० उ० २।२३।२) इति च ब्राह्मणम् । " स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी " इत्यमरः ।

" ऋचैव हौत्रं क्रियते, यजुषाऽऽध्वर्यवं, साम्नोद्गीथम् । व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियते, त्रय्या विद्ययेति ब्रूयात् । " इति च (ऐ० ब्रा० ५-३३)

यज्ञादिषु वेदत्रयस्यैव प्राधान्येन विनियोगात् त्रय्या एव प्राधान्यं इति केचित् ।

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन् ।
सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम् ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥ (अथर्व० शौ० १०।७।२०)

इत्यादिषु अथर्वसंज्ञकश्चतुर्थो वेदोऽपि श्रुतः । तदेतत् अपरा विद्यायां स्पष्टमभिहितम्-

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः । (मुं० १।१।४)
अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः ॥ इति (बृ० उ० २।४।१०)
तस्य यजुरेव शिरः, ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः, आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । (तै० उ० २।३।२)
ऋचां प्राची महती दिगुच्यते । यजुषां दक्षिणा, साम्नामुदीची । अथर्वाङ्गिरसां प्रतीची ॥ इति (तै०ब्रा० ३।१२।९) । एवमादिषु चतुर्धा वेदविभागोऽभिहितः ।

एवं वेदार्थप्रकाशकत्वेन भारतादिपुराणग्रन्थानामपि पञ्चमवेदत्वं कल्पितं दृश्यते । " नाम वा ऋग्वेदो यजुर्वेदः सामवेदः आथर्वणश्चतुर्थः इतिहासपुराणः पञ्चमः इति (छां० उ० ७।१।४) " भारतः पञ्चमो वेदः " इति च प्रसिद्धम् ।

ऋगादिलक्षणविचारः

अथ समष्ट्यात्मकस्य एकस्यापि वेदस्य ऋगादिसंज्ञाभिः प्रसिद्धास्ते भेदाः किं नाममात्रेण प्राप्ताः, उत वस्तुसिद्धाः अथवा प्रवचनादिप्राप्ताः, केवलं ग्रन्थमर्यादादिनियताः, आहोस्वित् लाक्षणिका इति विचारः प्रस्तूयते । अत्र केषाञ्चित्पदार्थानां वस्तुतः स्वरूपाभेदेऽपि नाममात्रेण भेदव्यवहारो दृष्टः । तद्यथा "तत्तेजोऽसृजत, तदपोऽसृजत, ता अन्नमसृजन्त" इति छान्दोग्ये (छां० ६।२।३-४) श्रुतानि तेजोऽबन्नात्मकानि त्रीणि भूतानि "वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी" इति तैत्तिरीयके (तै० उ० २।१।१) श्रुतेभ्यः अग्न्यप्पृथिवीभूतेभ्यः नाममात्रेण भिन्नानीव दृश्यन्ते, तथापि वस्तुतः अर्थतः अभिन्नान्येव, एवं त्रयाणां चतुर्णां पञ्चानां वा वेदानां नाममात्रेण भेदोऽस्तु इतिचेत्, नैवं ऋगादीनां स्वरूपभेदात्, न नाममात्रेण भेद इति शक्यते वक्तुम् ।

तथा एतेषां वेदानां भेदो वस्तुतत्त्वसिद्धः इति पक्षोऽप्यसमञ्जस एवेति प्रतिभाति, ऋगादीनां वाग्विकारमात्रेण भेदा- प्रतीतः । " वाचारम्भणं विकारो नामधेयम् " (छां० ६।१।४) इतिवद्वाग्रूपत्वाविशेषात् । तथा च " स वा एष वाचः परमो विकारः यदेतन्महदुक्थं तदेतत्पञ्चविधं मितममितं स्वरः सत्यानृते " इति सर्वेषां शब्दानां वाग्विकारत्वानुश्रवणत् ।

तथा ' ऋग्गाथा कुम्ब्या तन्मितं, यजुर्निगदो वृथावाक् तदमितं सामाथो यश्च गेष्णः स स्वरः ' इति ऋग्यजुःसाम्नां मितामितस्वरादिमात्रेण भेदनिर्देशाच्च, तेन विकारमात्रेण न वस्तुभेदो युक्तः, यथा मृद्विकाराणां घटशरावा- दीनां न सर्वात्मना भेदो भवति वस्तुसिद्धः । एवं ऋगादिनामरूपभेदमात्रेण वेदानां भेद इत्यभ्युपगन्तव्यम् । अथ प्रवचन- भेदात् वेदभेदोऽस्तु, यथा शाकल-बाष्कल-तैत्तिरीय-मैत्रायणीयादिशाखाभेदः अभ्युपगतः, तत्र हि यो यः खलु यां शाखामादितः अध्यापयति, सा शाखा तस्यैव नाम्ना प्रसिद्धिमर्हति । सिद्धान्तितं चैतत् जैमिनिना " आख्या-प्रवचनात् " इति, तथैव ऋगादीनामपि प्रवचनभेद एव वेदभेदे हेतुर्भवतु, यथा अथर्वणा प्रोक्तोऽथर्ववेदः इति चेत्- नैतच्छक्यम् ऋगादिवेदप्रवक्तॄणां ऋगाद्यभिधानतः केषाञ्चिदपि ऋषीणामप्रसिद्धेः । अपि च ' अथर्वाङ्गिरसो मुखम् ' (अथर्व० शौ० १०।७।२०) इति श्रुतः अथर्वाङ्गिरसां वेदः । इति ऋषिनाम्ना प्रसिद्धोऽथर्ववेदः । ऋगादिष्वेव वेदेषु ये अवान्तरभेदाः प्रसिद्धाः शाकल-बाष्कल तैत्तिरीय-मैत्रायणी-राणायणीप्रभृतयः नाम्नाः शाखाः तत्तदृषिप्रवचननिमित्तेन प्राप्ताः सत्यः तत्तदृषिनाम्नैव प्रसिद्धाः इति, तत्तच्छाखाध्यापनेन प्रवर्तकाः शाकलादिनामभिः प्रसिद्धाः सन्ति ऋषयः, न तथा ऋगादि- नामभिः प्रसिद्धाः केचिदृषयः सन्ति, येन तत्प्रवचनेन ऋगादिवेदभेदोऽभ्युपगम्येत ।

न ग्रन्थभेदेन वेदभेदः

अथ ग्रन्थनिमित्तको वेदभेदोऽस्तु, प्रसिद्धाः खलु ऋगादिवेदग्रन्थाः नियताः यथायथं परस्परं भिन्नाः स्वाध्यायप्रवचन-परम्परासमागताः यथोपदेशमेवानुश्रूयमाणा इति, नैतदपि युक्तम्- एकग्रन्थान्तरीयमन्त्राणां अन्यत्र वेदे ग्रन्थान्तरेऽपि दर्शनात् । तद्यथा प्रसिद्धे ऋग्वेदग्रन्थे विद्यमानाः तथः अविद्यमाना अपि केचिन्मन्त्राः ' ऋचः ' यजुर्वेदेऽपि उपलभ्यन्ते । तथाहि प्रसिद्धे ऋग्वेदे श्रूयमाणाः 'अग्निमीळे (ऋ० १।१।१); तत्सवितुर्वरेण्यम् '(ऋ० ३।६२।१०; वा० य० ३।३५;२२।९; ३०।२;३६।३; सा० १४६२; तै० सं० १।५।६।४; ४।१।११।१; तै० आ० १।११।२) इत्यादयः ऋङ्मन्त्राः यजुर्वेदेऽपि विद्यन्ते । न चैतासामृचां यजुर्वेदग्रन्थान्तरे पाठमात्रेण यजुष्ट्वमिति यथा कथञ्चिदपि वक्तुं शक्यम् । एवं प्रसिद्धे ऋग्वेदग्रन्थे अविद्यमाना अपि काश्चिदृचः प्रसिद्धे यजुर्वेदग्रन्थे दृश्यन्ते । तथाहि ' **देवो वः सवितोत्पुनातु । अच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः** ॥ ' (तै० सं० १।१।५।१)

इत्येषा ऋक् ऋग्वेदे न पठिता सती यजुर्वेदे एव श्रुता । नहि एतस्या ऋचः ऋग्वेदे पाठाभावेन यजुर्वेदग्रन्थान्तः-पातित्वमात्रेण च स्वतःसिद्धं ऋक्त्वं हीयते, नापि यजुष्ट्वं प्राप्यते । अथास्य मन्त्रस्य यजुर्वेदे एव पाठाद्यजुष्ट्वमेवास्तु इति चेत्- नैवं शक्यं कल्पयितुं, तस्यैव ब्राह्मणे 'सावित्रियर्चा' इति विधिवाक्येन अस्य मन्त्रस्य ऋक्त्वानुगमात् । ' **सावित्रियर्चा । सवितृप्रसूतं मे कर्मासदिति । सवितृप्रसूतमेवास्य कर्म भवति । पच्छो गायत्रिया त्रिःषमृद्धत्वाय** ' इति (तै० ब्रा० ३।३।४।६) अथ '**सावित्रियर्चा**' इत्यनेन ऋग्वेदोक्ता सवितृदेवताका या काचिदेव ऋक् स्वीकर्तुं शक्यते, न च (सावित्रियर्चा ' इत्यनेन ' देवो वः ' इत्यस्यैव ग्रहणं युक्तं, येन तस्य ऋक्त्वमभ्युपगम्येत, इति चेत् न, तत्रैव अनुब्राह्मणे '**देवो वः सवितोत्पुनात्वित्याह । सवितृप्रसूत एवैना उत्पुनाति** । इति (तै० ब्रा० ३।२।५।२) अपामुत्पवने अस्यैव विनियोगात् । तस्मात् यजुर्वेदग्रन्थेऽपि ऋचां तत्र तत्र पाठात् ग्रन्थनिमित्तको वेदभेद इति वादोऽपि निरस्तः ।

ऋग्यजुःसाम्नां मन्त्रत्वम्

अथ लक्षणत एव प्राप्ता ऋग्यजुःसामसंज्ञाः, ताश्च ऋगादिवेदमन्त्राणामेव भवन्ति । ' **अहे बुध्निय मन्त्रं मे गोपाय । ऋचः सामानि यजूंषि** ' (तै० ब्रा० १।२।१।२६) इत्यस्मिन् मन्त्रे ऋग्यजुःसाम्नां मन्त्रशब्देनैव अनुश्रवणं स्पष्टम् । तत्र ऋचां मितत्वं, यजुषां अमितत्वं, साम्नां स्वरत्वं च प्रधानं लक्षणम् । ' **ऋग्गाथा कुम्ब्या तन्मितं, यजुर्निगदो वृथा वाक् तदमितं, सामाथो यः कश्च गेष्णः स स्वरः** ' इति । अत्र ' **अग्निमीळे** ' इत्याद्या ऋचः, ' **प्रातः प्रातरनृतं ते वदन्ति** ' इत्यादिकाः गाथाः, ' **ब्रह्मचार्यस्यपोऽशान कर्म कुरु दिवा मा स्वाप्सीः** ' इत्याद्याचारशिक्षारूपा कुम्ब्या, ' **इषे त्वोर्जे त्वा** ' इत्यादिकं यजुः, ' **अग्ने महाँ असि ब्राह्मण भारत** ' ' इत्यादिर्निगदः, ' **वायुर्वै क्षेपिष्ठा देवता** ' इत्यादिः ब्राह्मणगतोऽर्थवादो वृथा वाक् ।

लक्षणत एव वेदभेदः

तत्र ऋचां मितत्वं च गायत्र्यादिनियतछन्दोनिबन्धनकत्वं, यजुषाममितत्वं तु अनियतपादाक्षरादिछन्दोबन्धनरूपत्वं, साम्नां स्वरत्वं च गीतिविशेषरूपत्वमिति विवेकः । जैमिनिरपि तदेतदेवानुवदति -' **तेषामृग्यत्रार्थवशेन पादव्यवस्था । गीतिषु सामाख्या । शेषे यजुः शब्दः** ' इति (पू० मी० सू० १।१) तेषामयमर्थः यत्र येषु मन्त्रेषु अर्थवशेन अर्थतः गायत्र्यादिछन्दःस्वरूपात् निबन्धनेन पादव्यवस्था विद्यते, तेषां मन्त्राणां ऋक्संज्ञा शास्त्रप्रसिद्धा ।

तद्यथा- ' **अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्** इति ॥ (ऋ० १।१।१)

अत्र अष्टाक्षरनियताः त्रयः पादा भवन्ति । सोऽयं मन्त्रः त्रिपदागायत्रीछन्दोविनिबन्धनकत्वः सन् ऋगित्युच्यते । ' अष्टाक्षरा गायत्री, गायत्री चतुर्विंशत्यक्षरा त्रिपदा ' (म० ना० ३) इत्यादि श्रुतेः । अत्र अर्थवशेनेत्युपलक्षणम्—गायत्र्यादि-तत्तच्छन्दोवृत्तवशेनेति व्याख्येयम् । नियताक्षरपादोपसंहितगायत्र्यादिछन्दोवृत्तनिबद्ध एव मन्त्रः ऋक् संज्ञक इत्यर्थः । तदेतदेव ऋचां मितत्वरूपं लक्षणम् ।

एतासां ऋग्वेदे प्रसिद्धानां तथा क्वचिदप्रसिद्धानामपि ऋचामेव गीतियोगमात्रेण सामसंज्ञा भवति ।

❀

तस्मादृच्यध्यूढꣳ साम गीयते '। इति. (छां० उ० १।६।५;१।७।१) सामब्राह्मणे एवाभिहितत्वात् 'ऋक्तो नातिरिच्यते सामवेदः ।' अतएव प्रायः सर्वत्रापि वेदे ऋक्साम्नोर्मिथुनत्वेन सहैव योगः श्रुतः इति गम्यते । 'ऋचः सामानि जज्ञिरे,(।चित्यु० १२।४); ऋग् दक्षिणः पक्षः, सामोत्तरः पक्षः (तै० उ० २।३); वागेवर्क् प्राणः साम तद्वा एतन्मिथुनं यद्वाक् च प्राणश्च ऋक् च साम च' (छां० उ० १।७।१) इत्यादि श्रुतेः। यास्कस्तु-' मन्त्रा मननात्, छन्दांसि च्छादनात्, स्तोमःस्तवनात्, यजुर्यजतेः, साम सम्मितमृचा, स्यतेर्वा ऋचा समं मेने इति नैदानाः। (नि० ७।३।१२) इति ऋक्साम्नोरविशेषेण स्वरूपं दर्शयति। तस्मात् गीतिमात्रेण ऋचामेव सामसंज्ञेति सिद्धम्। 'शेषे यजुः शब्दः ' 'यथोक्तऋक्सामलक्षणव्यतिरिक्तो मन्त्रभागो 'यजुः' शब्दवाच्यो भवति। नियताक्षरपादोपहितगायत्र्यादिछन्दोनिबन्धनरहितो मन्त्रभागो यजुः संज्ञक इत्यर्थः। तदुक्तम् 'अनियताक्षरपादानि यजूꣳषि भवन्ति' इति। तद्यथा 'इषे त्वोर्जे त्वा' इत्यत्र इदं पञ्चाक्षरं एकं यजुः श्रुतं, तथा 'इषे त्वा ऊर्जे त्वा' इति च त्र्यक्षरं यजुर्द्वयं च विनियोगतः कृतम्। तथा च तद्विधानसूत्रम् 'बहुपर्णा बहुशाखाऽप्रतिशुष्काग्रा भवति तामाच्छिनत्तीषे त्वोर्जे त्वेति' (बौ० श्रौ० सू० १।१।१) 'इषे त्वोर्जे त्वेति तामाच्छिनत्त्यूर्जे त्वेति संनमयत्यनुमार्ष्टि वा इति चापस्तम्बः।

एवं अनियताक्षरपादसंहितं छन्दोबन्धनमेव यजुर्लक्षणं ज्ञेयम्। अत्र यजुर्मन्त्रे अक्षरपादयोरनियतत्वात् छन्दोनियमाभावाच्च छन्दोबन्धराहित्यमेव यजुर्लक्षणमिति केचित्। तदयुक्तं छन्दोबन्धाभावे 'शेषे ब्राह्मण-शब्दः' इति शास्त्रात् यजुषां मन्त्राणामपि ब्राह्मणवाक्यत्वप्रसङ्गः। तस्मादक्षरपादादीनामनियतत्वेऽपि, गायत्र्यादि छन्दोबन्धराहित्येऽपि, यजुषां मन्त्रत्वापादकं, अक्षर-पदादीनां नियतपूर्वापरीभावसम्बद्धं, यत् किञ्चिदलौकिकं, अपौरुषेयाकृत्रिमादिगुणविशिष्टं, साहित्यरूपमन्त्रावयवानां नियतं छन्दोनिबन्धनमवश्यमभ्युपेयं भवति। नहि 'इषे त्वोर्जे त्वा' इत्यत्र 'ऊर्जे त्वेषे त्वा' इति वा 'त्वेषे त्वोर्जे' इति वा मन्त्रः सम्भवति। नाप्यूहमन्त्रवत् परिकल्पयितुं शक्यः। यथा श्रुतमेव विनियोजनीयः। तस्माद्यजुषामपि यत्किञ्चित् छन्दोनिबन्धनं वक्तव्यमेव। तस्य च नियताक्षरपादादिप्रयुक्तगायत्रीछन्दोलक्षणासंभवात्, यजुश्छन्द इत्येवाभिधीयते। तद्विशेषास्तु पिङ्गलच्छन्दःशास्त्रे निर्दिष्टाः।

अथर्ववेदस्य न पृथग्लक्षणम्

अथर्ववेदस्य लक्षणं मीमांसाशास्त्रेऽन्यत्र यत्र कुत्रापि वा न पृथङ्निर्दिष्टम्। अतः पारिशेष्यात् तत्र गीत्याद्यभावात् ऋग्यजुर्लक्षणविशिष्टमन्त्राणां दर्शनात्, सोऽयमथर्ववेदः ऋग्यजुरूपोभयात्मक इति पर्यवस्यति। तत्र तावत् ऋग्वेदे प्रसिद्धा एव ऋचः क्वचित् किञ्चित्पाठभेदेन पठिताः सहस्रशः सन्ति। ताभ्यो भिन्नाश्च ऋचः सहस्रशो विद्यन्ते 'शं नो देवीरभिष्टये, (ऋ० १०।९।४; वा.य. ३६।१२; अथर्व० १।६।१), अम्बयो यन्त्यध्वभिः,(ऋ० १।२३।१६; अथर्व.१।४।१) अस्य वामस्य पलितस्य होतुः, (ऋ० १।१६४।१; अथर्व० ९।९।१) इति एवमाद्या ऋग्वेदस्था एव ऋचः। 'स्वस्तिदा विशां पतिः' (ऋ० १०।१५२।२; अथर्व० १।२१।१), आ त्वा हार्षमन्तरभूः (ऋ० १०।१७३।१; अथर्व० ६।८७।१), तिस्रो मातॄः० विश्वविदो वाचमविश्वविन्नाम्' (ऋ० १।१६४।१०; अथर्व० ९।९।१०) इति पाठभेदविशिष्टाः 'अत्र विशस्पतिः, अन्तरेधि, विश्वविदं, वाचमविश्वमिन्वाम्' इति ऋक् पाठः। एवं ऋग्वेदस्थानि कानिचिद् बहूनि सूक्तानि विद्यन्ते।

"ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः। (अथर्व १।१।१)

"यस्मादृचो अपातक्षन्। (अथर्व १०।७।२०) इन्द्रस्य प्रथमो रथः। (अथर्व० १०।४।१) इत्येवमाद्या ऋग्वेदे अप्रसिद्धा ऋच एव। एवं कानिचिद्यजूꣳष्यपि दृश्यन्ते—

"विराड् वा इदमग्र आसीत्।" (अथर्व० ८।१०।१)

"यो विद्याद्ब्रह्म प्रत्यक्षम्।" (अथर्व० ९।६।१)

"तस्यौदनस्य बृहस्पतिः शिरः०।" (अथर्व० ११।३।१)

"व्रात्य आसीदीयमान एव०।" (अथर्व १५।१।१)

"जितमस्माकमुद्भिन्नम्।" (अथर्व० १६।८।१)

त एते मन्त्राः यजूरूपा एव यथायथं निर्दिष्टैः छन्दोभिर्विशिष्टाः । अस्य तुरीयवेदस्य अथर्ववेदसंज्ञा तु अथर्वणा ऋषिणा सङ्गृहीतत्वात्, भृग्वङ्गिरसां अथर्वाङ्गिरसां च आथर्वणानामृषीणां मन्त्रबाहुल्यादपि वा सिद्धा । एवं वेदानां चतुष्ट्वेऽसिद्धेऽपि मन्त्रराशेः "ऋग्यजु"-रिति द्विधैव भेदो वस्तुतस्त्रसिद्धः । तस्मात् ऋगादिलक्षणप्रयुक्तमेव "ऋग्यजुःसाम्नां" स्वरूपमिति सिद्धम् ।

तदुक्तम्- "ऋषयोऽपि पदार्थानां नान्तं यन्ति पृथक्त्वशः । लक्षणेन तु सिद्धानामन्तं यन्ति विपश्चितः ।" इति ।

तस्मात् ऋग्यजुःसामशब्दाः ऋगादिलक्षणोपहितान् ऋगादिमन्त्रानेव स्पृशन्ति । न तु ऋगादिवेदेषु प्रसिद्धं संहिताग्रन्थमात्रं, नापि ब्राह्मणारण्यकं ब्राह्मणादिग्रन्थं वा इति सर्वथा सम्पद्यते ।

" अहे बुध्निय मन्त्रं मे गोपाय । ऋचः सामानि यजूंषि ।" (तै० ब्रा० १।१।१०।३,५;१।२।१।२६) इति स्पष्टतरमाम्नायते ।

किं व्यासेन व्यस्ता वेदाः ?

अत्रायं कश्चित्पुनर्विचारप्रसङ्गः-आदौ एकरूपेण स्थितं एकमेव वेदं तत्र भगवान् व्यासः पाठप्रवचनादिसौकर्यार्थं चतुर्धा विबभाजेति भारतादिपुराणग्रन्थे दृश्यते । कीदृशः स विभागः यः खलु व्यासकृत इत्युच्यते ? यदि स्वस्वलक्षणसिद्धा ऋगादयो वेदाः, तर्हि तेषां नूतनं विभागं कर्तुं को वा समर्थः ? अथ लक्षणतः सिद्धानां स्वरूपतो भिन्नानामपि "व्रीहियवगोधूमादीनामिव" एकराशेः पृथक्करणं व्यासकृतं ग्रन्थविभागेन प्रवचनसौकर्यार्थमिति चेत्, प्रसिद्धे यजुर्वेदे न केवलानि यजूंषि विद्यन्ते इति न सर्वस्यापि यजुर्वेदग्रन्थस्य यजुष्ट्वमस्तीत्युपन्यस्तमेव । अपि च मधुच्छन्दः प्रभृतिभिर्बहुभिर्ऋषिभिर्दृष्टानां बहूनां मन्त्राणां सूक्तानां च एकत्र सङ्ग्रहेण संहितादिग्रन्थानां ग्रथयितारः, न तु विभक्तारः, तत्तच्छाखाप्रवर्तकाः प्रवचनकर्तारः ऋग्वेदे शाकलादयः, यजुर्वेदे शुक्ले कण्वमाध्यन्दिनादयः, कृष्णे तु तित्तिरिमैत्रायणादयः, सामवेदे राणायनप्रभृतयः, अथर्ववेदे शौनकादयश्च ऋषयः प्रसिद्धाः, नहि तत्र व्यासस्य नामापि श्रूयते । तदपि व्यासस्य वेदविभक्तृत्वं तावत् संहिताब्राह्मणारण्यकोपनिषदादिवेदग्रन्थेषु निरुक्तादिवेदाङ्गेषु कल्पसूत्रादिष्वपि वेदसम्बद्धेषु न प्रसिद्धम् ।

न चैतद्वेदार्थविचारशास्त्रयोः पूर्वोत्तरयोर्मीमांसयोरपि यत्र कुत्रापि प्रस्तुतं नापि निर्णीतम् ।

अपि च " ऋग्गाथा कुम्भ्या तन्मितम् ।" (ऐ० आ० ३।६।४)

' अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः० ' (बृ० उ० २।४।१०)

' तत्रापरा ऋग्वेदो यजुर्वेदः० (मुं० उ० १।१।५)

इत्यादिप्रसिद्धब्राह्मणोपनिषदादिभ्योऽपि पूर्वं व्यासकृतो वेदविभागः, आहोस्वित् उत्तरत्रेति आशङ्कायां, पूर्वमेवेत्युक्ते वसिष्ठादिमहर्षीणामिव उपनिषदादिभ्योऽपि प्राचीनत्वं व्यासस्य तु असङ्गतमेव, येन वसिष्ठादिदृष्टानां ऋगादीनां विभक्तृत्वं व्यासस्याभ्युपगम्येत । अथ उत्तरत्रेत्युक्ते तत्तल्लक्षणतः सिद्धानां भिन्नरूपाणामपि तेषां ऋगादीनां एकराशेः पृथक्करणेन पुनर्विभागस्य सम्भवेऽपि प्रसिद्धेषु सर्वेषु ऋगादिवेदग्रन्थेषु लक्षणतः तथा विभागादर्शनात् असङ्गतत्वमेव । ऋक्साम्नोः लक्षणतः विभागेऽपि यजुर्वेदस्य लक्षणप्रयुक्तविभागाभावः तत्र ऋचामपि सत्त्वादिति भावः । तथैव ' ऋचः सामानि जज्ञिरे, ऋचः सामानि यजूंषि ' इति वेदमन्त्रेष्वेव श्रुतानां लक्षणतो आविर्भावादेव ततः प्रागपि विभक्तरूपाणां तेषामृगादीनां पुनर्विभागः अनुपपन्न एव ।

व्यासपूर्वो मन्त्रविभागः

अथ प्रवचनसौकर्यार्थं अल्पमेधसां एकैकवेदस्य अध्ययनलाघवार्थं च ऋगादिग्रन्थविभागमात्रं व्यासकृतमिति वचनमपि कल्पनामात्रमेवेति पर्यवस्यति, तत्तद्ग्रन्थप्रवक्तॄणां शाकल-तित्तिरि-माध्यन्दिनादीनामृषीणां प्रसिद्धेः, तत्र व्यासनामाप्रसिद्धेश्चेति प्रपञ्चितं पुरस्तात् । एवं सति वेदस्य चतुर्धा विभागे "निमित्तमात्रं भव सव्यसाचिन्" इतिवत् कर्तृत्वं निमित्तमात्रत्वमेव । तथा ' व्यासोच्छिष्टं जगत्सर्वं ' इति व्यासस्य सर्वज्ञत्वादिप्रसिद्धिगौरवानुपोद्बलकं चेति परिशिष्यते ।

मन्त्राणामेव संहितात्वं, न ब्राह्मणानाम् ।

अथ एतेषु ऋग्यजुःसामाथर्वाख्येषु चतुर्ष्वपि वेदेषु मन्त्रात्मको भागः तद्ग्रन्थश्च संहिताशब्देन प्रसिद्धः। तेषां ग्रन्थानां संहितात्वं तथा संहिताशब्दवाच्यस्य तस्य शब्दराशेर्मन्त्रत्वं च मन्त्रावयवभूतानां वर्ण-पद-पादादीनां नियतपौर्वापरीभावादिनिबन्धनक्लृप्तत्वम् । तेन मन्त्राणां छन्दोवृत्तादिनिबन्धनतः सांहित्यमेष्टव्यम् । अत एव 'परः सन्निकर्षः संहिता' इति सूत्रितं पाणिनिना । तस्मात् नियतच्छन्दोनिबन्धनेनैव मन्त्राणां संहितात्वमभ्युपेतव्यम । अत एव याजुषे आध्वर्यवे कर्मानुष्ठाने याजुषमंत्रप्रयोगावसरे "देवस्य त्वा सवितुः० अग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्यां" इत्येव मन्त्रपाठेऽपि "सवित्रे जुष्टं निर्वपामि, इन्द्राय जुष्टं निर्वपामि" इति तत्तद्देवताभेदेन प्रयोजयितव्यानामूहमन्त्राणां न मन्त्रत्वमस्ति । तत्र प्रयोक्तृमतिकल्पितत्वेन यथोक्तछन्दोनिबन्धननियतपरमसन्निकर्षरूपसंहितात्मकमन्त्रत्वाभावात् । तदेतन्मीमांसितं जैमिनिना "गुणशब्दस्तथेति चेत् । न समवायात्" इति० (जै० सू० ९।१।३८-३९) । तथा एतेषामूहवाक्यानां प्रयोक्तृमतिकल्पितत्वेन पौरुषेयत्वं च निर्णीतम् "सामानि मन्त्रमेके स्मृत्युपदेशाभ्यां । तदुक्तदोषम्" इति (जै० सू० १०।२।१—२) .

एवं पाठप्रवचनग्रन्थे अनाम्नातानां "सूर्याय जुष्टं निर्वपामि" इत्यादिरूपेण कल्पितानां ऊहवाक्यानां पौरुषेयत्वादेव अमन्त्रत्वमपि निर्णीतम् "अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः" इति (जै० सू० २।१।३४) एवं च सति ऊहवाक्यानां पुरुषमतिकल्पितत्वेन मन्त्रत्वाभावे निश्चिते पारिशेष्यात् ब्राह्मणवाक्यवत् वाक्यत्वमेव । एतेन यथोक्तमन्त्रलक्षणाभावेन ब्राह्मणवाक्यानां न मन्त्रत्वं, ततश्च न संहितात्वं, चेति सिध्यति ।

अथ यजुर्वेदप्रस्तावः

"यजुर्यजतेः" इति यास्कनिरुक्तात् यज्ञप्रधानो यजुर्वेदः इति गम्यते । तदेतच्चैवानुश्रावितम्—

"यज्ञस्य मात्रां विमिमीत उ त्वः ।" (ऋ० १०।७१।११)

त्वः एकः यज्ञस्य मात्रां स्वरूपं विमिमीते निष्पादयति, सोऽध्वर्युर्यजुःप्रधानः "यजुषाऽऽध्वर्यवम्" इति ब्राह्मणम् । अत्र यास्कनिरुक्तम्- "यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युः अध्वर्युरध्वरयुरध्वरं युनक्ति अध्वरस्य नेतेति ।" (इति० नि० १।७)

तस्मात् यज्ञनिष्पादकत्वादध्वर्योः यजुःप्राधान्याच्च यज्ञप्रधानो यजुर्वेदः, यजुर्वेदप्रधानो यज्ञः इति च सम्पद्यते ।

वेदेषु यज्ञप्रतिपादकत्वेन यजुर्वेदस्य प्राधान्यम्

अथ यज्ञात्मनस्तस्य परमपुरुषस्य यज्ञेनैव यजनीयत्वात् यज्ञस्यैव प्राधान्यं सर्वेष्वपि वेदेषु क्लृप्तम् । स च यज्ञः ज्ञानोपासनाक्रियादिरूपो वेदोपदिष्टः समस्तोऽपि धर्मः । तथा च मन्त्रवर्णः—

"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।" इति (ऋ० १०।९०।१६;वा० य० ३१।१६)

'द्रव्ययज्ञास्तपोयज्ञाः ध्यानयज्ञास्तथा परे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥' इति च स्मृतिः । (गी० ४।२८)

यज्ञार्थमेव सर्वेषामपि वेदानां प्रवृत्तिः । तथा च लगधः—

"वेदाहि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।" इति (वेदाङ्गज्यो०) यज्ञप्राधान्यादेव मनोमयस्यात्मनो यजुःशिरस्त्वं श्रुतिषु प्रसिद्धम् । "तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः तस्य यजुरेव शिरः ।" इति (तै० ब्रह्मोप० ३) सर्वस्य गात्रस्य शिरः प्रधानम् । इति प्रत्यक्षसिद्धं न्यायतत्त्वम् । अपि च "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः" (ऋ० १।१०।१) "ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।" (ऋ० १०।७१।११) इति च मन्त्रवर्णात्, "ऋचैव हौत्रं क्रियते, यजुषाऽऽध्वर्यवं, साम्नोद्गीथम्" (ऐ० ब्रा० ५।३३) ।

इति ब्राह्मणवचनाच्च ऋग्यजुःसाम्नां हौत्र-हवन-गानादिषु यज्ञार्थत्वेन विनियोगात्, सर्वेषामपि वेदानां यज्ञपरत्वेन लाक्षणिकं यजुर्वेदत्वमर्थतः फलतम्। सर्वैर्वेदैर्ब्रह्मयज्ञसिद्धेश्च- " यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते " इति श्रुतेः। (तै० आ० २।१०)

अपि च ' सर्वे वेदा यत्पदमामनन्ति०। तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ' (कठो० १।२।१५) इति श्रुतिनिगदितस्य सर्ववेदमूलभूतस्य ब्रह्मवाचकस्य प्रणवस्यापि यजुष्ट्वं, तथा ब्रह्मयज्ञादौ सर्वेषां वेदानामादौ तत्प्रणवानुवचनं च विहितमनुश्रूयते, तथाहि- ' ब्रह्मयज्ञेन यक्ष्यमाणः०--ओमिति प्रतिपद्यते एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परमक्षरम् ' इति। (तै० आ० २।११)

तथा ' ओमिति ब्रह्म, ओमितीदꣳ सर्वम्। ओमित्येतदनुकृति ह स्म वा अप्योश्रावयेत्याश्रावयन्ति। ओमिति सामानि गायन्ति। ओꣳशोमिति शस्त्राणि शꣳसन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति ॥ (तै० शि० उ० १।१।८।१)

इति ऋगादिवेदसाध्येषु सर्वेष्वपि यज्ञेषु यजुर्मन्त्रात्मकप्रणवपूर्वकमेव सर्ववेदमन्त्रानुवचनेन तद्यज्ञकर्मानुष्ठानविधानात् यजुःप्रधानाः सर्वे वेदाः, यजुःप्रधानाः सर्वे यज्ञा इति सम्पद्यते।

सर्वेषां वेदानां यजुष्ट्वम्

तथैव वेदत्रयसारभूतानां ' भूर्भुवः स्वः ' इति प्रसिद्धानां तिसृणां व्याहृतीनामपि छन्दतः फलतं यजुष्ट्वम्। तासां व्याहृतीनां वेदत्रयसारभूतत्वात् वेदसाध्येषु प्राणायामब्रह्मयज्ञसन्ध्योपासनादिषु सर्वेष्वपि यज्ञेषु यजुर्मन्त्रात्मकसप्रणवव्याहृतिपूर्वकमेव गायत्र्याः जपादिकं तथा गायत्रीमुखेन च सर्वेषां वेदानामनुवचनं च विहितम्। ' ओमिति प्रतिपद्यते० त्रीनेव प्रायुङ्क्त भूर्भुवः स्वरित्याहैतद्वै वाचः सत्यम्। अथ सावित्रीं गायत्रीं त्रिरन्वाह पच्छोऽर्धर्चशोऽनवानम् ' इति ब्रह्मयज्ञविधानम् (तै० आ० २।११)

गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम्। प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥ (या० स्मृ०)
इति च प्राणायामविधिः ॥

' प्रणवः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परम्। गायत्री प्रणवश्चान्ते जप्येष्वेवमुदाहृतम् ॥ ' (योगीश्वरः)
इति सन्ध्योपासनादौ जपविधिः।

एवं ' ऋचो अक्षरे परमे व्योमन ' (ऋ० १।१६४।३९)
' ओमित्येषा वाक् एतद्ध वा एतदक्षरं यत्सर्वां त्रयीं विद्यां प्रति प्रतीति च ' (ब्राह्मणम्)
' सर्वे वेदा यत्पदमामनन्ति० ओमित्येतत् ' (कठो० १।२।१५)
इत्यादि श्रुतिनिर्दिष्टब्रह्मवाचकयजुर्मन्त्रात्मकप्रणवोदितत्वात् सर्वेषामपि वेदानां यजुर्वेदत्वमिति सिध्यति।

एवमेव सर्वपरित्यागेन सन्न्यासयोगेन केवलमात्मसाक्षात्कारार्थं यतमानानां नैष्ठिकं धर्ममारूढानां यतीनां तस्य परब्रह्मणोऽन्तरात्मनो ज्ञानाय जप-ध्यान-धारणाद्यवलम्बनाय च यजुर्मन्त्रात्मकं परं तत्प्रणवाक्षरमेवोपदिष्टम् ' ॐ खं ब्रह्म ' (वा० य० ४०।१८) ' ओमित्येकाक्षरं ब्रह्म। अग्निर्देवता ब्रह्म इत्यार्षम्। गायत्रं छन्दं परमात्मं सरूपम्। सायुज्यं विनियोगम् ' इति (म० ना० उ० १।१३)

' ओमित्येतदक्षरमिदꣳ सर्वं०, ओंकार आत्मैव संविशत्यात्मनात्मानं। य एवं वेद० ' इति। (मां० उ० १-१२)
' ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ' (मुं० उ० २।२।६) ' एतद्ध्येवाक्षरं ब्रह्म। एतदालम्बनं श्रेष्ठम्। इति (कठो० १।२।१६-१७)

' ऋग्भिरेतं यजुर्भिरन्तरिक्षं ससामभिर्यत्कवयो वेदयन्ते। तमोङ्कारेणैवायतनेनान्वेति विद्वान्यत्तच्छान्तमजरममृतमभयं परं चेति ' इति। (प्रश्नो० ५।७)

' ओमित्येतदक्षरमुद्गीथमुपासीत ' (छां० उ० १।१।१)

' पर (म) हंसवर्ता यस्तु प्रणवाभ्यासशीलतः । यद्यनुत्पन्नविज्ञानो विरक्तः संयतेन्द्रियः ।
यावज्जीवं जपेन्मन्त्रं प्रणवं ब्रह्मणो वपुः ' इति पाद्मे ।

तस्मात् यज्ञप्राधान्यात् ज्ञानादिसर्वयज्ञपरत्वाच्च प्रणवव्याहृत्यादीनां ऋगादिसर्ववेदानामपि यजुर्वेदत्वमिति सिद्धम् । तथा च विष्णुपुराणवचनम्—

' एक एव यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ' इति ।

' एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः । ' इति (भाग० ९।१४।४९)

" ओमिति प्रतिपद्यते एतद्वै यजुः । " इति । (तै० आ० २।११)

यजुर्वेदस्य शुक्लकृष्णभेदौ

अथ त्रयीविद्यान्तर्गतो द्वितीयो यजुर्वेदपाठप्रवचनपरम्पराप्रसिद्धः । स च ' यजुर्वेदस्य षडशीतिर्भेदा भवन्ति ' इति । (चरण० ५०) ' यजुरेकशताध्वकम् । शाखानां तु शतेनाथ यजुर्वेदमथाकरोत् ' (कू० पु० ४९।५१) इति शतधा विस्तृतः श्रूयते । तत्रापि ' शुक्लः कृष्णश्चेति ' अवान्तरभेदेन द्विधैव नियतः । उभयत्रापि बह्व्यः शाखाः विद्यन्ते ।

तत्र कृष्णयजुर्वेदे प्रसिद्धायां तैत्तिरीयशाखायां ' औख्याखाण्डिकेयाः ' इति भेदद्वये खाण्डिकेयानां पञ्चभेदाः सन्ति ' तैत्तिरीयकानां द्विभेदा भवन्ति । औख्याखाण्डिकेयाश्चेति । तत्र खाण्डिकेयानां पञ्चभेदा भवन्ति, आपस्तम्बाः बौधायनाः सत्याषाढाः हैरण्यकेशाः काण्वायनाश्चेति ' इति । (च० व्यू० २)

एवं पञ्चधा भेदनिर्देशेऽपि नैव तेषां संहितादिग्रन्थाः पृथक् विद्यन्ते, श्रौतादिसूत्रमात्रभेदात्, वेदग्रन्थस्तु एक एव ।

तैत्तिरीयशाखायां सारस्वतपाठस्यैतिह्यम्

तैत्तिरीयशाखायां पाठप्रवचनादिपरम्परया चिरात् प्रचलितस्य " सारस्वतपाठोपहितस्य " संहिताब्राह्मणारण्यकग्रन्थसमुदायात्मकस्य यजुर्वेदस्य " ऋषिच्छन्दोदेवतादिनियमाभावेन यातयामतादोषयुक्तत्वात् मन्त्रब्राह्मणसङ्करत्वाच्च कृष्णत्वम्, कण्वमाध्यन्दिनादिशाखायास्तु ऋष्यादिनियमसत्वात् मन्त्रब्राह्मणसङ्कराभावाच्च शुद्धत्वेन शुक्लत्वमिति विवेकः । प्रसिद्धेऽस्मिन् सारस्वतपाठे काण्डानां सङ्कीर्णत्वेन काण्डविभागेन सम्प्रति अध्ययनं कर्तुं अशक्यत्वात्, सारस्वतपाठस्याप्यभ्यनुज्ञातत्वाच्च, इदानीं सारस्वतपाठक्रमेणैव अध्ययनं प्रचलति ।

तदेतत्सारस्वतपाठविषये कथानकं पुराणान्तरे प्रसिद्धम् । तच्च यजुर्वेदाध्ययनविधिविचारावसरे संस्काररत्नमालायां उद्धृतं, तदेवात्र अनूद्यते—

' कोऽयं सारस्वतो नाम, कश्च सारस्वतः पाठः, इत्याकाङ्क्षायां इतिहासः प्रदर्श्यते– " ब्रह्मसभायां दुर्वासाः साम गायन्नास । तं खलु तेजसा क्रूरं दृष्ट्वा सभामध्ये सरस्वत्यस्मयत । ततः क्रुद्धो मुनिः सरस्वतीं शशाप मर्त्ययोनौ प्रजायस्वेति । ततस्तं देवी प्रसादयामास भगवन् विप्रगृहे जायेयमिति । ततः स मुनिस्तथेत्युक्त्वा जगाम । ततो देव्यात्रेयगृहेऽजायत । ततो वेदविदं भर्तारं प्राप्य, विद्यानिधिं पुत्रं सरस्वती प्रासूत । ततो विद्यानिधिं कृतोपनयनं पुत्रं पिता सारस्वतं वेदमध्यापयामास, यथा वृद्धक्रमेण । ततस्तं बालत्वादल्पमेधसं पिता ताडयामास पृष्ठे वेणुदलेन । ततः सोऽरोदीत्, सापि तं दृष्ट्वा पुत्रमालिङ्ग्यातिदुःखिता बभूव ।

" अश्रुपूर्णं तं वागीशा निवार्य च पुनः पुनः । ततः सा चिन्तयामास यस्याः कस्याः सुतो नहि ॥
प्राप्य मां ताड्यते बालो मम प्राणप्रियः सुतः ।

ततश्चतुःषष्टिकलाः सर्वान्वेदान्साङ्गान् ब्रह्मविद्यापर्यन्तान् सारस्वताय सरस्वत्युपादिशत् । क्षुत्पिपासे निवर्त्य दायुधारणां चोपादिशत् ।

' ततः सम्पूर्णविद्योऽसौ कुरुक्षेत्रे वसन्मुनिः । तपस्तेपे महाभागो देवैरपि सुदुष्करम् ॥
ततः कालेन महता ह्यनावृष्टिरभूत्किल । "

कुरुक्षेत्रे सारस्वतं हृष्टं पुष्टमन्तर्वायुं धार्यमाणं तमृषिं ददृशुः—

तमूचुर्मुनयः सर्वे शाकं देहीति नः प्रभो। अलं शाकेन भो विप्रा यदि शाको भवेद्भुवि।
सारस्वतो मुनिः प्राह तेभ्यो देहीति चण्डिकाम्। सुत शाकं प्रदास्यामि यदि शाकेन ते ह्यलम्॥
शाकम्भरीति मुनिना प्रसन्नाऽकारि वै तदा। शाकाहारास्ततः सर्वे मुनयः कृतजीविताः॥
दुर्भिक्षे विनिवृत्तेऽप्यध्ययनं नास्मरँस्तदा। अन्योऽन्यमभिजग्मुस्त उच्चरँश्च न कंचन॥
ततो विस्मृतवेदास्तु बभूवुर्मुनयो भृशम्।

ततोऽतिदुःखितेषु नारदेनोक्तं सारस्वतं कृतसर्ववेदाध्ययनं गत्वाऽध्ययनं कुरुध्वमिति। ततस्ते सारस्वतं प्रार्थयामासुः। अध्यापनं कुरुष्व भगवन्निति। ततः सारस्वतः प्रार्थितः चतुःषष्टिमुनिगणसहस्रेभ्यः चतुःषष्टिसहस्रवेदानध्यापयामास। ततस्तान्वेदान् तत्तच्छाखिनः साकल्येनाधीतवन्तः। तैत्तिरीयशाखिनस्तु साकल्येनाध्ययनं कृत्वा, सर्ववेदविलक्षणां तैत्तिरीयशाखां दृष्ट्वाऽन्योऽन्यमूचुः। अहो ! अतीव विस्मयोऽस्माकं सर्वविलक्षणां शाखामध्यापयति स्म अस्मान् मूढान्कृत्वा निर्मिताम्। ततः सर्वे तैत्तिरीयशाखिनः सम्भूय सारस्वतमूचुः– नायं वेदस्त्वयाऽध्यापितः सर्ववेदविलक्षणत्वादिति।

ततः सारस्वतः सर्वान् श्रेष्ठान्मुनीन्प्राह वचः—

यद्ययं न भवेद्वेदः प्रतिज्ञां तु करोम्यहम्। अग्निप्रवेशनं कुर्यां भवन्तो वाच्यमीरिताम्॥
तमूचुर्मुनयः सर्वे वचनं यत्त्वयोदितम्। यदि वेदक्रमं विप्र प्रतिज्ञां कुर्महे वयम्॥

ततः सारस्वतेन सहिताः सर्वे मुनयः तत्र तत्र मुनीन्गत्वा निर्णेतुं न शक्नुमः, इति तैरुक्ताः ब्रह्माणं जग्मुः। यथायथं प्रतिज्ञाः निवेदिताः। ब्रह्मापि मुनिं सारस्वतमाह– सत्यं प्रतिज्ञातं तत्रभवता सारस्वतेन, 'सारस्वतो वेदपाठः' सारस्वतोक्तक्रमेणैवाध्येतव्यः, अन्यथाऽध्ययनफलं नास्तीति। ततः इतरान्मुनीन्प्राह। सत्यं न पाठक्रमेणार्थानुष्ठानक्रमं भवतीति। तस्मात्सर्वैर्जितम्। नाग्निप्रवेशनं कर्तव्यमितीतिहासः। सोऽयं इतिहासः 'संस्काररत्नमालायां' निर्दिष्टः।

तत्प्रभृति सारस्वतपाठक्रमेणैवाध्ययनं प्रवृत्तं सत् इदानीं सर्वत्रापि तदेव प्रचलति। तत्क्रमपरिज्ञानाय सूत्राद्यभावेऽपि प्रचलितपाठक्रम एव तत्र प्रमाणं भवति।

सारस्वतपाठ व्यत्यासः

तैत्तिरीयशाखायां प्रचलिते सारस्वतपाठे ग्रन्थत्रयं प्रसिद्धम् 'संहिता, ब्राह्मणं, आरण्यकं' इति। एतेषु त्रिष्वपि ग्रन्थेषु मन्त्रब्राह्मणयोः साङ्कर्यं दृश्यते। तस्मात् अत्र शुक्लयजुर्वेद इव ऋग्यजुरात्मकोभयरूपमन्त्रसद्भावेऽपि विधिरूपब्राह्मणवाक्यबाहुल्यसाङ्कर्यदर्शनात् प्रसिद्धसंहिताग्रन्थो न यथोक्तलक्षणप्रयुक्तं संहिताशब्दं शक्तितो निर्वोढुमर्हति। तथा ब्राह्मणग्रन्थोऽपि ऋग्यजुर्मन्त्रसाङ्कर्यादेव न ब्राह्मणशब्दार्हः इति गम्यते। तत्र हि तैत्तिरीयसंहितायां ब्राह्मणे आरण्यके च केचित् समग्राः प्रश्नाः केवलं यजुर्मन्त्रात्मकाः—

१ केचित् प्रश्नाः ऋङ्मन्त्रात्मकाः– 'अश्मन्नूर्जं पर्वते शिश्रियाणं०–' (तै० सं० ४।६।१)
२ केचित् प्रश्ना ब्राह्मणरूपाः– 'प्राचीनवंशं करोति०–' (तै० सं० प्र० ६ सम्पूर्णः प्रपाठकः)
३ एकस्मिन्नेव प्रश्ने केचिदनुवाका ऋङ्मन्त्रात्मकाः– 'विष्णोः क्रमोऽसि०–' (तै० सं० ४।२।१)
४ केचिद्ब्राह्मणात्मकाः– 'विश्वरूपो वै त्वाष्ट्रः०' इति षडनुवाकाः. (तै० सं० २।५।१–६) तदेतत् दर्शपूर्णमासिकं पौरोडाशिकमनुब्राह्मणम्।
५ केचित् ऋग्यजूरूपोभयमन्त्रात्मकाः– "युञ्जानः प्रथमं मनः०" (तै० सं० ४।१।१)
६ केचित् यजुर्मन्त्रब्राह्मणोभयात्मकाः–" प्रजापतिरकामयत०– (तै० सं० ७।१।१)
७ केचित्तु ऋङ्मन्त्र–यजुर्मन्त्र–ब्राह्मणसहितास्त्र्यात्मकाः। 'यो वै देवान्देवयशसेनार्पयति०।' (तै० सं० ३।१।९) ब्राह्मणरूपः "अग्निः प्रातःसवने पात्वस्मान्०" (तै० सं० ३।१।९ त्रिः मन्त्राः) "एष ते रुद्र भागो यान्निरयाचथास्तं जुषस्व" (तै० सं० ३।१।९)

८ तथा एकस्मिन्नेवानुवाकेऽपि कश्चिद्भागो यजुर्मन्त्रात्मकः, कश्चित् ऋङ्मन्त्रात्मकः, कश्चिद्भागो ब्राह्मणात्मकश्च दृश्यते- 'अषाढं युत्सु' (तै० ब्रा० २।७।४)

एवं ब्राह्मणे आरण्यके च संहितायामिवैव मन्त्रब्राह्मणसाङ्कर्यं बहुलं दृश्यते । तस्मात् तैत्तिरीयशाखायां प्रसिद्धसंहिताग्रन्थस्य संहितात्वं, तथा ब्राह्मणग्रन्थस्य ब्राह्मणत्वं च न वस्तुतत्त्वसिद्धं, नापि लक्षणप्रयुक्तग्रन्थविभागतन्त्रोपहितमिति वेदितव्यम्

अथ यदुच्येत- 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः' इति श्रुतेः सृष्टेः प्रागेव ईशनिःश्वासोपसृष्टो यजुर्वेदोऽयं पूर्वाचार्याणां स्वाध्यायप्रवचनपरम्पराप्राप्तः इति यथाश्रुतमेवास्य स्वाध्याये प्रवचने च न क्षतिरिति । तथास्तु तर्हि- उभावपि ग्रन्थौ न संहितापदेन नापि ब्राह्मणपदेन व्यवहरणीयौ, उभयत्रापि मन्त्रब्राह्मणयोरुभयोरपि साङ्कर्यात् । तस्मादेतद्ग्रन्थद्वयमपि नामान्तरेणाभिधीयतां नाम, किं कृतं संहिताब्राह्मणादिनाममात्रोपचरितेन वेदान्तरानुकरणेन ?

मन्त्राणां त्रिगुणो ब्राह्मणस्य चैकगुणः पाठः

अथ पुनः- 'त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥' इति (शौ० च० व्यू० परि० २)

मन्त्रब्राह्मणयोः साहित्येन पाठप्रवचनमेव यजुर्वेदस्य मुख्यं लक्षणं दर्शितम् । सोऽयं मन्त्रब्राह्मणयोः साहित्येन पाठक्रमः तैत्तिरीयशाखायामेव दृष्टः, युक्तश्चायं पक्षः शास्त्रोपदिष्टत्वात् । तस्मात् तैत्तिरीयशाखायां यथाश्रुतमेव संहिताब्राह्मणादिग्रन्थविभागः, तथा तदध्ययनादिकं च युक्तमेवेति आशयः ।

अत्रोच्यते- न वयमिह यजुर्वेदे वेदान्तरेऽपि वा मन्त्रब्राह्मणयोः सह पाठं, तदध्ययनं वा प्रतिषेधामः, अपि तु मन्त्रब्राह्मणोभयात्मकस्य केवलं संहितात्वं, केवलं ब्राह्मणत्वं च, रुचितो नाभिलषामः । प्रत्युत उदाहृतशौनकवचनानुरोधेन मन्त्रब्राह्मणयोः सहैवाध्ययनमभिमन्यामहे । तत्र तु यो यो मन्त्रभागः तत्रैव तत्तद्विधिरूपो ब्राह्मणभागोऽपि अध्येतव्यः, मन्त्रविनियोगादिपरिज्ञानार्थमिति शास्त्रतत्त्वम् । तैत्तिरीयशाखायां तु नैव तथास्ति । तत्र हि संहितान्तर्गतस्य कस्यचिन्मन्त्रभागस्य ब्राह्मणं संहितायां, कस्यचिन्मन्त्रभागस्य ब्राह्मणे कश्चिदारण्यके च विद्यते । तथा संहितान्तर्गतस्य कस्यचिन्मन्त्रभागस्य कश्चिद् ब्राह्मणभागः संहितायां, कश्चिद् भागः ब्राह्मणेऽपि अस्ति । तद्यथा 'इषे त्वोर्जे त्वा' (तै० सं० १।१।१) इति त्रयोदशानुवाकात्मकस्य मन्त्रभागस्य ब्राह्मणं 'तृतीयस्यामितो दिवि सोम आसीत्' इति (तै० ब्रा० ३।२) ब्राह्मणग्रन्थे प्रश्नद्वयं विद्यते । तथा तस्यैव कश्चिद् ब्राह्मणभागः 'विश्वरूपो वै त्वाष्ट्रः' इति (तै० सं० २।५।१) संहितायां विद्यते । एवं ब्राह्मणान्तर्गतस्य मन्त्रभागस्य कश्चिद् ब्राह्मणभागः ब्राह्मणग्रन्थे, कश्चिद् भागः संहितायां च विद्यते एवमारण्यकेऽपि । तद्यथा 'सत्यं प्रपद्ये' इति (तै० ब्रा० ३।५) इत्यस्य ब्राह्मणमन्त्रभागस्य ब्राह्मणं 'देवा वै नर्चि न यजुषि' इति (तै० सं० २।५।७) संहितायां विद्यते । एवं 'चित्तिः स्रुक्' इति (तै० आ० ३) मन्त्रस्य ब्राह्मणं 'प्रजापतिरकामयत' इति (तै० ब्रा० २।२) ब्राह्मणग्रन्थे विद्यते । एवं ग्रन्थत्रयेऽपि शतशः स्थलेषु परस्परं साङ्कर्यात् यत्र कुत्रापि पठितयोः तयोः मन्त्रब्राह्मणयोः सहपाठः तथा तदध्ययनमपि यथाकथञ्चिदपि न सम्भवति । क्वचित्तु 'सम्पश्यामि प्रजा अहं' (तै० सं० १।५।६) । 'सम्पश्यामि प्रजा अहमित्याह' (तै० सं० १।५।८) 'इमामगृभ्णन् रशनामृतस्य' 'इमा० अश्वाभिधानीमादत्ते' इत्यादिषु मन्त्रब्राह्मणयोः सहपाठसम्भवेऽपि न तावता सर्वत्रापि शक्यं, तथा साधयितुम् । तस्मान्मन्त्रब्राह्मणयोः सहपाठपक्षेऽपि नायं सारस्वतपाठक्रमः शास्त्रीयतामर्हति, नाप्यनुकूलः ।

किं तर्हि ? एकैकः प्रश्नः तथा एकैकोऽनुवाकोऽपि तत्र तत्रैव ब्राह्मणेन सहैव पठितव्यः, अथ किम् ? तथा चेत एकैको मन्त्रोऽपि तत्तद्विधिरूपेण ब्राह्मणेन सहैव पठितव्यः स्यात् । स्यादेव 'त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह' । इति मतेन । असम्भावनीयं पद्धतिः खलु । तथा चेत् 'मन्त्रब्राह्मणयोः सह' इत्यस्य सह शब्दस्य साहित्यं नाम ऐकरूप्यमित्येवार्थोऽस्तु, न तु सान्निध्यमिति । तदा मन्त्रब्राह्मणयोर्वेदभागयोः 'सह' साहित्येन स्वरादियुक्तेन एकरूपेण

' त्रिगुणं ' गद्यपद्यात्मकसंहितारूपेण, त्रिभक्तपदपाठरूपेण, क्रमपाठरूपेण चेत्येवं त्रिविधं अध्ययनं यत्र विद्यते स यजुर्वेदः
इत्यर्थः । तथा च तैत्तिरीयसंहिताग्रन्थस्य यथोक्तेन प्रकारेण संहितायाः पदक्रमरूपं त्रिगुणं पाठप्रवचनं प्रसिद्धम्, तत्र मन्त्र-
भागस्येव ब्राह्मणभागस्यापि स्वरः पदपाठः क्रमपाठश्च प्रचलितः, नैवं वेदान्तरे विद्यते, इदमेव यजुर्वेदस्य मुख्यं लक्षणं विशिष्ट-
तरमिति भावः ।

एवं चेत्- संहिताया इव ब्राह्मणग्रन्थस्यापि तथा आरण्यकस्य च पदक्रमादेस्त्रिगुणपाठो भवितव्यः । न हि संहिता-
ग्रन्थमात्रे यजुर्वेदः सम्पूर्णः, ब्राह्मणारण्यकयोरपि सोमादियज्ञोपयोगिकमन्त्रबाहुल्यसत्वात् ।

अथ अन्यत्र वेदान्तरे संहिताग्रन्थस्यैव पदक्रमादिपाठप्रसिद्धेः ब्राह्मणग्रन्थस्य पदविभागाभावात् अत्र सारस्वतपाठेऽपि
तथैवाध्ययनं परम्पराप्राप्तम् । तथा चेत् वस्तुतः वेदान्तरे मन्त्रब्राह्मणयोर्लक्षणतः संहिताब्राह्मणग्रन्थविभागेऽपि उभयोर्ग्रन्थयोः
त्रिगुणं पाठप्रवचनं शक्यं संपादयितुं, तथापि यजुर्वेदे एव तादृशपाठविधानात् युक्तमेव तथैवानुष्ठातुं उभयोरपि ग्रन्थयोः
त्रिगुणं पाठप्रवचनं इति प्रतीयते । प्रत्युत, प्रचलितपाठक्रमे एव संहितान्तर्गतमात्रस्य कतिपयमन्त्रभागस्य संहितापदक्रम-
रूपेण त्रिगुणं पाठः, ब्राह्मणग्रन्थान्तर्गतस्य तु मन्त्रभागस्यापि केवलं संहितारूपेण एकगुणं पाठः, तथा संहितान्तर्गतस्य कति-
पयब्राह्मणभागस्य त्रिगुणपाठः, तथा ब्राह्मणारण्यकग्रन्थान्तर्गतस्य विधिभागस्य एकगुणं पाठः, इत्यसामञ्जस्यं स्यात् ।
" त्रिगुणं पठ्यते यत्र " इति वचनोक्तयजुर्वेदलक्षणविरोधश्च प्रसक्तः । तथापि सारस्वतपाठेन प्रचलित एव क्रमः साधी-
यान् सारस्वतमुन्युपदिष्टत्वात्, तथैवाध्ययने एव श्रेयस्त्वप्रतिपादनात्, अन्यथाऽध्ययने निष्फलत्वदर्शनात्, तथैव ब्राह्मणा-
निर्णीतत्वाच्च, सोऽयं तैत्तिरीयकृष्णयजुर्वेदः अनादिसिद्धार्षेयाध्ययनपरम्परागतः यथाक्रममेवाध्येतव्यः इत्येव युक्तम् । न
हि तादृशेषु अपौरुषेयेषु वेदग्रन्थेषु इदानींतनानामस्मादृशां किञ्चिज्ज्ञानां यत्किञ्चिदपि वैपरीत्याविकल्पनावसरः । उदाहृतश्च
पूर्वमेव सारस्वतमुनेरितिहासः, तथा सारस्वतपाठे ब्रह्मनिर्णयश्च ।

एवं भगवतो ब्रह्मण: आदेशात् सोऽयं तैत्तिरीययजुर्वेदः सारस्वतमुन्युपदिष्टेन सारस्वतपाठेन यथाप्रसिद्धं यथाक्रममेवा
ध्येतव्यः इति निर्णीतं पूर्वैर्महर्षिभिः । तस्मात् तैत्तिरीयकृष्णयजुर्वेदे संहिताब्राह्मणारण्यकग्रन्थानां पृथक् पाठक्रमान्तरं
नान्वेषणीयं नाप्यादरणीयमिति वैदिकानां सिद्धान्तः, स च आर्षेयत्वादिश्रद्धोपहितः, अत एव स न प्रतिषेधव्यः, निषिद्धे
तु तस्मिन् वेदश्रद्धालवो व्याकुलिता भवेयुः, तदभिमानिनस्तु कुप्येयुरिति ।

तथास्तु तर्हि- " न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् " (भ० गी० ३।२६)
" अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु " (या० स्मृ०)

इति देशिकोपदेशात् समन्वय एवाश्रयणीय इति युज्यते । तेन तैत्तिरीयकृष्णयजुर्वेदः सारस्वतपाठक्रमेणैवाधीयतां नाम,
तथात्वेनाध्ययनेऽपि लक्षणतः तत्रत्यो मन्त्रब्राह्मणादिभेदः ऋक्त्वयजुष्ट्वादिभेद आर्षेयादिभेदश्च याथार्थ्येन वेदितव्य एव, न
च तत्सारस्वतपाठो निषेद्धुमर्हति ।

' अपि सारस्वते पाठे ज्ञानमात्रमिहेष्यते ' इत्यभियुक्तवचनात् । तदर्थमेवायं वेदवेदिकाप्रस्तावश्च ।

एवं लक्षणतो विदिते मन्त्रब्राह्मणऋक्त्वयजुष्ट्वादिभेदे वेदितव्ये च, सारस्वतपाठेऽपि विद्यमानस्य सर्वस्यापि मन्त्रभागस्य
संहितात्वं लक्षणप्रयुक्तं, विधिभागस्य तु ब्राह्मणत्वं चेत्यर्थादभ्युपगतं भवति । ततश्च तैत्तिरीयकृष्णयजुर्वेदे ग्रन्थभेदेन प्रसि-
द्धयोः संहिताब्राह्मणग्रन्थयोः यथोक्तलक्षणोपाहिता शास्त्रदर्शिता संहितात्वसिद्धिः ब्राह्मणत्वसिद्धिश्च ऋते विभागात् अन्यथा
सर्वथाप्यसम्भाविनीत्येव वक्तव्यमापतति ।

वस्तुतस्तु सारस्वतपाठक्रमेण प्रसिद्धे संहिताग्रन्थे, तथा ब्राह्मणे, आरण्यके च, तत्र तत्र मन्त्राणां मध्ये ब्राह्मणपाठोऽपि
तत्तन्मन्त्राणां यागादिकर्मानुष्ठानविनियोगादिपरिज्ञानानुकूलार्थमेव, न तु पुनः ब्राह्मणवाक्यानामपि संहितात्वाद्यापादनार्थः,
नापि संहिताद्यभिधानकरणार्थः । दर्शितश्च तत्रापि मन्त्रब्राह्मणयोः यथायथं साहित्येन पाठक्रमाभावः, तेन त्रिष्वपि ग्रन्थेषु
पठितयोर्मन्त्रब्राह्मणयोरसान्निधानात् कथं तयोः सहाध्ययनं सम्भवेदिति चिरं चिन्तनीयमेव ।

❀

अथ वेदान्तरेषु संहितायाः पदपाठसत्त्वात्, ब्राह्मणभागस्य पदपाठाभावाच्च, सारस्वतपाठेऽपि तद्वदेव संहिताब्राह्मणारण्यक-ग्रन्थभेदेन पाठबलात् यथा यावान् प्रसिद्धः संहिताग्रन्थः स तावानेव याजुषो मन्त्रभागः पदविभागात् त्रिगुणपाठसत्त्वाच्च; यथा यावांश्च प्रसिद्धो ब्राह्मणग्रन्थः आरण्यकग्रन्थश्च स तावान् सर्वोऽपि विधिरूपः याजुषो ब्राह्मणभागः पदविभागाभावात् त्रिगुणपाठप्रवृत्तेरभावाच्च इति कल्प्यतामिति चेत्, न तु तावन्मात्रेण कल्पनाविशेषेण तत्सेत्स्यति ।

न हि तावत् सहस्रशः पुरुषयूथसङ्कीर्णः स्त्रीव्यक्तिविशेषः पुरुषोऽयमिति कल्पनामात्रेण तथा बाह्याकारविकारादिविशिष्ट-वेषसंस्कारेणापि वा स्वभावतः शक्तितश्च पुंरूपत्वं प्राप्नोति, न च तत्कथञ्चिदप्यापादयितुं शक्यम्। एवमेव स्त्रीयूथसङ्कीर्णः स्त्री-वेषधरोऽपि पुरुषः स्त्रीत्वं न भजते, तदेतत् प्रत्यक्षसिद्धं नाटकादौ, तथैव सारस्वतपाठे सहस्रशः ऋग्यजुरादिमन्त्रगणसंकीर्णो विधिरूपः ब्राह्मणवाक्यात्मकशङ्कराशिरपि तावता मन्त्रगणमध्यपातित्वमात्रेण, मन्त्रत्वकल्पनामात्रेण वा, मन्त्रवत् स्वरादि-संस्कारेण वा, पदविभागात् त्रिगुणपाठेनापि वा, स्वयं रूपतः शक्तितश्च नैव मन्त्रो भवितुमर्हति । एवं ब्राह्मणवाक्यसङ्कीर्णो-ऽपि पदविभागाभावे त्रिगुणपाठाभावेऽपि मन्त्रः न ब्राह्मणं भवति ।

एवं शब्दतः अर्थतश्च मन्त्रब्राह्मणयोः स्वरूपतः स्त्रीत्वपुंस्त्ववत् सर्वथा भेदो वस्तुसिद्धः । तस्मात् मन्त्रभागो विधिभाग-श्चेति द्विधा विभक्तः सर्वोऽपि वेदः । तत्र मन्त्रभागः ' संहिता, ' विधिभागो ' ब्राह्मणं ' चेति प्रतिपादितं पुरस्तात् ।

सोऽयं यथोक्तलक्षणविशिष्टो विधिमन्त्रात्मको ब्राह्मणसंहितासंज्ञको वेदग्रन्थो भेदेन सिद्धः सर्वत्र वेदेषु समानः एकरूपेण प्रतिष्ठितः सुप्रसिद्धः । तत्र विधिमन्त्रात्मकयोर्ब्राह्मणसंहिताभागयोः ग्रन्थतोऽपि भेदेन संस्थितौ महदिदं प्रमाणं यत्सर्वे-ष्वपि वेदेषु समाना रीतिरिति प्रत्येतव्यम् ।

तत्र मन्त्रब्राह्मणयोः सहैव त्रिगुणपाठ एव यजुर्वेदस्य मुख्यं लक्षणमित्यभ्युपगम्यमाने तैत्तिरीयसंहिता–ब्राह्मण–आरण्यक-संज्ञकग्रन्थत्रयवत्तस्य समग्रस्यापि यजुर्वेदस्य त्रिगुणपाठ आदरणीयो भवेत् । तैत्तिरीयसारस्वतपाठे तु प्रसिद्धयोः संहिता-ब्राह्मणग्रन्थयोः आरण्यकस्य च यथोक्तविधिमन्त्रत्वलक्षणराहित्येन त्रिष्वपि ग्रन्थेषु मन्त्रब्राह्मणसाङ्कर्यात्, संहिताग्रन्थान्तर्गत-स्यैव मन्त्रब्राह्मणभागस्य त्रिगुणपाठप्रवचनादिसत्त्वाच्च, संहितायाः संहितात्वं, ब्राह्मणग्रन्थस्य ब्राह्मणत्वं, चासङ्गतमिति वैधर्म्येण सर्ववेदवैलक्षण्यं, तैत्तिरीयकृष्णयजुर्वेदस्येति वेदितव्यम् ।

मैत्रायणीयसंहितायां तु इतोऽप्यस्ति कश्चिद्विशेषः संस्कृतः, तत्र दर्शपूर्णमासादियज्ञीयकर्मानुरोधेन पौरोडाशिकादिप्रकर-णानां भेदेन तत्तन्मन्त्रैः सहैव तत्र तत्र प्रायः सर्वः तत्तद्ब्राह्मणभागोऽपि पठितः, तथा तस्य त्रिगुणपाठोऽपि प्रचलितः तस्मात् तत्र मन्त्रब्राह्मणयोः साहित्येन पाठप्रवचनं सार्थकमेव । तथापि मन्त्रब्राह्मणयोः सङ्करः तथा आर्षेयाध्यनियमश्च तद्वस्थ एव, न हि तावता साहित्यपाठमात्रेण यातयामतादोषो निवर्तते । तैत्तिरीयसारस्वतपाठे प्रचलितः पाठक्रमः केन प्रमाणेन, केन वा विधिना, केन वा यज्ञादिक्रमनियमेन, कथं कल्पितः, इति न ज्ञायते । नाप्येतत्पाठक्रमे प्रमाणान्तरं दृश्यते, येन तत् ज्ञातुं शक्यं भवेत् । नापि तत्र सूत्रादिकं किञ्चिदस्ति प्रतिबोधकम् । तद्विषये बौधायनादिप्रणीता काण्डानुक्रमणिकैव शरणम् । अपि सारस्वते पाठे ज्ञानमात्रमिष्यते इति च स्पष्टं वचनम् ।

तैत्तिरीयशाखाकथानकम्

सोऽयं सारस्वतपाठोपहितः कृष्णयजुर्वेदः केनचिन्निमित्तेन याज्ञवल्क्येन वमितः, तथा तद्वमितं तमिमं वेदं वैशम्पायन-शिष्याः तित्तिरयो भूत्वा स्वीकृतवन्तः, तस्मात् सा शाखा तैत्तिरीयेति प्रथिता । तथा च विष्णुपुराणे तदितिहासः श्रूयते–

' एक एव यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ।
यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने । वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥ १ ॥
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् । याज्ञवल्क्यश्च तस्याभूद् ब्रह्मरातः सुतो द्विज ॥ २ ॥
शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा । ऋषिर्यश्च महामेरौ समाजे नागमिष्यति ॥ ३ ॥
तस्य वै सप्तरात्रं तद्ब्रह्महत्या भविष्यति । पूर्वमेवं मुनिगणैः समयोऽयं कृतो द्विजम् ॥ ४ ॥
वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा । स्वस्रीयं बालकं सोऽपि पदाधृष्टमघातयत् ॥ ५ ॥

शिष्यानाह च भोः शिष्याः ब्रह्महत्यां परावृते । चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ ६ ॥
अथाह याज्ञवल्क्यस्तं किमेतैर्बहुभिर्द्विजैः । क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥ ७ ॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् । मुच्यतां यत्त्वयाऽधीतं मत्तो विप्रावमानक ॥ ८ ॥
निस्तेजसो वदस्येतान्यस्त्वं ब्राह्मणपुङ्गवान् । तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥ ९ ॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् । ममाप्यलं त्वयाऽधीतं यन्मया तदिदं द्विज ॥ १० ॥

पराशर उवाच-

इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंष्यथ । छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥ ११ ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजाः । जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ततः स्मृताः ॥ १२ ॥
ब्रह्महत्या व्रतं चीर्णं गुरुणा नोदितं तु यैः । चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम ॥ १३ ॥
याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः । तुष्टाव प्रणतः सूर्यं यजूंष्यभिलषंस्ततः ॥ १४ ॥

याज्ञवल्क्य उवाच-

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे । ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः ॥ १५ ॥
इत्येवमादिभिस्तेन स्तूयमानः स वै रविः । वाजीरूपधरः प्राह व्रियतामभिवाञ्छितम् ॥ १६ ॥
याज्ञवल्क्यस्तथा प्राह प्रणिपत्य दिवाकरम् । यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥ १७ ॥

पराशर उवाच-

एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः । अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥ १८ ॥
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम । वाजिनस्ते समाख्याताः सूर्याश्वाः स भवेद्यतः ॥ १९ ॥
शाखाभेदस्तु तेषां वै दश पञ्च च वाजिनाम् । कण्वाद्यास्तु महाभाग याज्ञवल्क्यप्रकीर्तिताः ॥ २० ॥ इति

भागवते—

वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहःक्षपणाय गुरोर्व्रतम् ॥ १ ॥
याज्ञवल्क्यस्तु तच्छिष्य आहाहो भगवन्कियत् । चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥ २ ॥
इत्युक्तो गुरुरप्याह कुपितोऽपि ह्यलं त्वया । विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥ ३ ॥
देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् । ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ४ ॥
भूत्वा तित्तिरयो ब्रह्मन् तल्लोलुपतया ददुः । तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥ ५ ॥
याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यधि गवेषयन् । गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६ ॥

याज्ञवल्क्य उवाच—

ॐ नमो भगवते आदित्येत्यारभ्य अयातयामयजुःकाम उपसरामीति ।

सूत उवाच—

एवं स्तुतः स भगवान्वाजिरूपधरो हरिः । यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७ ॥
यजुर्भिरकरोच्छाखाः दश पञ्च तथा विभुः । जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ॥ ८ ॥ इति

तत्र भवान् याज्ञवल्क्यः तदिदं सर्वं वेदतत्त्वं सूक्ष्मया दृशा समीक्ष्य प्रसिद्धे तैत्तिरीयसारस्वतपाठे मन्त्रब्राह्मणसाङ्कर्यं तथा आर्षेयाद्यनियमं चानुलक्ष्य वमनतः तत्परित्यागेन तपसा आदित्यप्रसादाल्लब्धया धिया ब्राह्मणादिसाङ्कर्यरहितं आर्षेयादिपरिक्लृप्तं अत एव यातयामतादिदोषनिर्मुक्तं शुद्धं यजुर्वेदं लब्धवानिति एतावता महता प्रबन्धेन निर्गलितोऽर्थः ।

तत्र हि शुक्लयजुर्वेदे मन्त्रलक्षणोपेतः केवलं ऋग्यजुर्मन्त्रात्मकः चत्वारिंशदध्यायपरिमितः संहिताग्रन्थः, तथा ब्राह्मणलक्षणोपेतः केवलं गद्यरूपः शतपथनामको ब्राह्मणग्रन्थश्चेति ग्रन्थद्वयमेवास्ति प्रसिद्धम् ।

तयोः मन्त्रब्राह्मणात्मकयोः संहिताब्राह्मणग्रन्थयोः परस्परं साङ्कर्याभावात् आर्षेयादिनियमसत्त्वाच्च शुक्लत्वम् । अतएवा,

यातयामता च । एवमिह एतैर्निमित्तैः वाजसनेयिशाखायाः शुक्लत्वे सिद्धे, पारिशेष्यात् तन्निमित्ताभावादेव तैत्तिरीयसारस्वत-पाठस्य कृष्णत्वमिति अर्थात् सिद्धं भवति)

वेदस्य यातयामता

अथ केयं कीदृशी च यातयामता नाम, येन खलु वेदस्यापि दोषत्वमिच्छन्ति । प्रसिद्धं खलु गतरसानां जीर्णभुक्तादीनां अन्नादीनां यातयामतादोषदूषितत्वम् । ' यातयामं गतरसं ' इति । ' जीर्णं च परिभुक्तं च यातयाममिदं द्वयं ' इति अमरः (३।१४।९) । वेदस्य तु स्वयंसिद्धस्यात्यन्तं पवित्रस्य कथं दोषप्रसक्तिः ? लोके तु अप्रसिद्धा तथा यातयामतेति किञ्चित् शङ्कास्पदम् । उच्यते—भवति हि वेदस्यापि यातयामतादोषः आर्षेयच्छन्दोदेवताद्यज्ञाननिमित्तः । तथा च छन्दोगब्राह्मणे समाम्नातम्—

" यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजते, याजयति वा,ऽध्यापयति वा, यातयामान्यस्य छन्दांसि भवन्ति स्थाणुं वर्च्छति, गर्तं वा पात्यते, प्रमीयते वा, पापीयान् भवति, तस्मादेतानि मन्त्रे विद्यात् " इति ।

मन्त्राणां ऋषि–छन्दो–दैवत–ब्राह्मणादिज्ञानाभावे अन्नादेरिव वेदस्यापि यातयामतादोषः सम्भवतीत्यर्थः । एतेन तैत्तिरीय-सारस्वतपाठे, ऋषिच्छन्दोदैवतानियमाभावात् अव्यवस्थितत्वात् तत्समीकरणासम्भवाच्च, युक्तं यातयामतादोषसत्त्वं, इति सोऽयं ऋष्याद्यनियम एव यातयामतायां प्रधानो हेतुरिति प्रत्येतव्यम् ।

अत एव तैत्तिरीयसारस्वतपाठक्रमे तद्दोषनिरसनाशक्यतया ज्ञानमात्रेण तत्सम्भावनार्थं काण्डर्ष्यादिविभागेन ब्राह्मणादि-वचनसिद्धः आर्षेयपाठक्रमः समुद्धृतः बौधायनप्रभृतिभिः पूर्वाचार्यैः । तथा च काण्डानुक्रमणिका । " अपि सारस्वते पाठे ज्ञानमात्रमिहेष्यते । " इति प्रतिज्ञाय प्राजापत्यादिपञ्चकाण्डानि उपदिष्टानि । अत एवास्य तैत्तिरीयसारस्वतपाठ-स्य यातयामतादोषदूषितत्वात् तत्परित्यागेन याज्ञवल्क्यः अयातयामं शुक्लं वेदं तपसा प्राप्तवानिति प्रतीयते ।

अत्र यथा विरुद्धजातीयानेकरसादिसांकर्येण कलुषितं, अत एवारुच्या अपाचनादिना कारणान्तरेण वा वमितं, वमनतः उदरान्निर्गतं अन्नादिकं तित्तिरिः पक्षिविशेषः स्वजीवनार्थं शुद्धपदार्थान्तरसम्पादने सामर्थ्याभावेन अलसः, अतः तस्मिन् वमितान्ने लोलुपः सन् तज्जक्षिति । तथैव वैशम्पायनशिष्या अपि याज्ञवल्क्येन यातयामतादोषदूषितत्वाद्वमितं तत्र अरुच्या वमितं वमनवत् परित्यक्तं तैत्तिरीययजुर्वेदं, स्वातन्त्र्येण तपसा शुद्धवेदान्तरप्राप्तिसामर्थ्याभावेन तल्लोलुपाः सन्तः, अविचार्यैव सहसा स्वीकृतवन्तः इत्युन्नीयते ।

' भूत्वा तित्तिरयो ब्रह्मन् तल्लोलुपतया ददुः ' इति स्पष्टार्थवचनात् । तस्मात् तित्तिरिवद् वमितग्रहणवृत्तयः इति तित्ति-रिवृत्तयः सन्तः ते तित्तिरयः, तदुदितानुवादिनस्तदनुयायिनस्तैत्तिरीया इति वक्तव्यमापतति ।

याज्ञवल्क्येनाधीतस्य शब्दराशेर्यजुर्वेदस्य वमनं तु पुनरनुच्चारणप्रतिज्ञापूर्वकं परित्यागरूपं आन्तरं सूक्ष्ममेव, न तु अन्ना-दिकमिव बाह्यं स्थूलं, येन वैशम्पायनशिष्यैः पक्षिरूपेण तित्तिरिभावेन तद् भक्ष्येत, अथवा येन तद्वमितवेदस्य भक्षणार्थं वैशम्पायनशिष्याणां साक्षात्तित्तिरिपक्षिरूपग्रहणप्रसङ्गः समापद्येत । तथा वैशम्पायनशिष्याणां तित्तिरिभावोऽपि वमितग्रहण-लोलुपतारूप एव भवितुमर्हति, न तु साक्षात्तित्तिरिपक्षिरूपतापत्तिः, येन याज्ञवल्क्येन वमितो वेदः तित्तिरिभक्षणार्हः अन्नादिवत् स्थूलः स्यात् । एवं तद्वमितवेदभक्षणमपि अन्यपरित्यक्तवेदस्वीकाररूपमेवेति निश्चितोऽर्थः ।

एवं तित्तिरिपक्षिवृत्तिमात्रेण याज्ञवल्क्यपरित्यक्तवेदग्रहणरूपेण ते तैत्तिरीया अभवन्निति सर्वं सम्पद्यते । एतेन तदर्थं प्रद-र्शितः पौराणिकः इतिहासः अर्थवाद एवेत्युक्तं भवति ।

आचार्यः तित्तिरिः

वस्तुतस्तु एतच्छाखाप्रवर्तकः तित्तिरिनामकः कश्चिदाचार्य एव, येन तन्नाम्नैषा शाखा प्रसिद्धा, यथा वेदान्तरे शाकल-बाष्कलकाण्वमाध्यन्दिनादयः इत्येव प्रतीयते । तथा च काण्डानुक्रमणिकायां तैत्तिरीयशाखाप्रवर्तकाः प्रसिद्धाः ।

"वैशम्पायनो यास्कायैतां शाखां प्राह पैङ्गये । यास्कः पैङ्गिस्तित्तिरये उखाय प्राह तित्तिरिः ॥
उखःशाखामिमां प्राह आत्रेयाय यशस्विने । तेन शाखा प्रणीतेयमात्रेयी इति प्रोच्यते ॥ इति
अत एव चरणव्यूहपरिभाषायां शौनकोक्तिः सङ्गच्छते 'तत्र तैत्तिरीयकानां द्विभेदा भवन्ति, 'औख्या खाण्डिकेयाश्चेति'
"तत्र खाण्डिकेयानां पञ्चभेदा भवन्ति, कालेया शाट्यायनी हैरण्यकेशी भारद्वाजी आपस्तम्बी चेति" (च० प० सूत्रे)
तथा "आपस्तम्बी बौधायनी सत्याषाढी हिरण्यकेशी भारद्वाजीति" अत्र कालेया शाट्यायनीति द्वे मूलोक्ते,
तयोः स्थाने बौधायनी औखेया इति बोध्ये, इति तद्भाष्ये च समुल्लिखितम् ।

तैत्तिरीयशाखायाः मन्त्रपरिमाणादिकम्

'तेषामध्ययनमष्टादशयजुःसहस्राणि' इति चरणव्यूहपरिभाषासूत्रे उक्तं, तत्परिमाणं च भाष्ये वर्णितम्–
काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिकचत्वारिंशत्तु । चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् ॥ १ ॥
एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते । द्विसहस्रं चैकशतमष्टानवति चाधिका ॥ २ ॥
लक्षैकं तु द्विनवति सहस्राणि प्रकीर्तितम् । पदानि नवतिश्चैव तथैवाक्षरमुच्यते ॥ ३ ॥
लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम् । अष्टषष्ट्याधिकं चैव यजुर्वेदप्रमाणकम् ॥ ४ ॥
अस्यार्थः भाष्योक्तः– काण्डाः ७; प्रश्नाः ४४, अनुवाकाः ६५१; पञ्चोनाशो पञ्चाशतो २१९८; पदानि १९२९०; अक्षराणि २५३८६८; इति संहितायाः ।

शाखावाक्यान्ययुतानि सहस्राणि नवानि च । चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते ॥
इति ब्राह्मणे वाक्यसङ्ख्या १९४८८ इति ।

अत्र संहिता–ब्राह्मणं- आरण्यकं चेति ग्रन्थत्रयविशिष्टस्य समग्रस्य तैत्तिरीययजुर्वेदस्य सप्तकाण्डाः भवन्ति; ४४ प्रश्नाः; ६५१ अनुवाकाः; २१९८ पञ्चाशती; १९२९० पदानि च केवलं संहिताग्रन्थस्येति ज्ञेयं, वाक्यानि तु ब्राह्मणग्रन्थस्यैव ।

अत्र ऋग्यजुर्मन्त्रपरिमाणं नोक्तम् । न तु संहिताग्रन्थमात्रे यजुर्वेदः सम्पूर्णः । ब्राह्मणारण्यकयोरपि ऋग्यजुर्मन्त्रबाहुल्यसत्त्वात् । तत्परिमाणं काण्डविभागे आर्षेयपाठे प्रपञ्चते । 'तेषामध्ययनमष्टादशयजुःसहस्राणि' इति परिमाणं तु समग्रयजुर्वेदस्यैव भवितुमर्हति । तत्र ऋचां परिमाणं पृथक् नोक्तम् । नापि तत्केवलानां यजुषाम् । ऋग्यजुःसामान्येन अष्टादशसहस्राणि, यजूंषि यजुर्वेदमन्त्राणि भवन्तीत्यर्थः । शुक्लयजुर्वेदे तु ऋग्यजुर्विभागेन परिमाणं दर्शितम् । तत्रापि नियतरूपत्वात् ऋचामेव सङ्ख्यापरिमाणं स्पष्टम् । तदतिरिक्तानां यजुष्ट्वमिति पारिशेष्यात् सिध्यतीति तदपि न पृथग्दर्शितं यजुःपरिमाणम् ।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । ऋग्गणः परिसङ्ख्यातस्ततोऽन्यानि यजूंषि च ॥
अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकश्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणम् । इति (च० प० सूत्रम्) एवं शुक्लयजुर्वेदस्य वाजसनेयीसंहितायां ऋङ्मन्त्राः १८०० ।

तैत्तिरीयसारस्वतपाठेऽवान्तरविषयविचारः

सारस्वतपाठे संहिता-ब्राह्मण-आरण्यकेषु त्रिष्वपि ग्रन्थेषु पञ्चाशत्पदेषु विरामः (पञ्चाशतिः), प्रतीकपाठः, प्रतीकमात्रस्य पदक्रमादिपाठश्च, ऋग्यजुर्मन्त्रयोः सङ्कलनमविभागेन, मन्त्रानुषङ्गः, ऋङ्मन्त्रेषु पादादिनियमातिक्रमः, ऋचां छन्दोनियमभङ्गेन मन्त्रविभागनियमातिक्रमः, आर्षेयाद्यनियमः, तेन च यथाशास्त्रं तदध्ययनाशक्यता चेत्येवमादयो बहवो विषयाः सन्ति विचारणीयाः, ते च क्रमशः विचार्यन्ते ।

पञ्चाशत्पदेषु विरामः

विद्यार्थिनामध्ययनादिसौकार्यार्थं दीर्घेऽनुवाके पञ्चाशत्पदेषु विरामः कल्पितः, तस्य च पञ्चाशदिति संज्ञाऽपि प्रसिद्धा ।

सार्धाः पञ्चाशत्यः २१९८ सन्तीत्युक्तं पुरस्तात् । तत्र कश्चिद् यजुर्मन्त्रमध्ये, कश्चित् ऋङ्मन्त्रमध्ये, कश्चित्तु उपसर्गक्रिया-पदयोर्मध्येऽपि, स पञ्चाशद्विरामो भवति । तद्यथा यजुर्मन्त्रमध्ये पञ्चाशत्–

' मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा हिꣳसिषम् । ' (तै० सं० १।१।४।७) इत्यस्य यजुर्मन्त्रस्य मध्ये ' मा त्वा (१) हिꣳसिषमुरुवाताय । ' इति विरामः क्लृप्तः, अध्ययनादौ पञ्चाशत्पदेषु विरामेणैव पाठ-क्रमः, विनियोगे तु ' मा त्वा हिꣳसिषम् ' इति एतदन्तमेव, यजुर्मन्त्रानुवचनमस्ति ।

तत्र ' पुरोडाशान्प्रेक्षते मित्रस्य त्वा चक्षुषा प्रेक्षे० मा त्वा हिꣳसिषमिति ' बौधायनसूत्रे विधानात् । तथैव ' अपहतोऽररुः पृथिव्यै देवयजन्यै व्रजं (१) गच्छ गोस्थानम् । ' इत्यत्र ' व्रजं गच्छ गोस्थानम् ' इति यजुर्मन्त्रः । (तै० सं० १।१।९।८-९), एवमेव सहस्रशः स्थानेषु विद्यते । अथ ऋङ्मन्त्रमध्ये पञ्चाशत्—

' त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ' इतीयमृक् (तै० सं० १।२।३।४) प्रसिद्धा, तत्र 'त्वं (१) यज्ञेष्वीड्यः ' इतिपञ्चाशत्पदविरामः । ' यो नो दूरे अघशꣳसः (१) । स ते (२) जानाति सुमतिं यविष्ठ । धाधाता जरतां (३) इयं गीः । महो रुजामि (४) बन्धुता वचोभिः । नाह (५) देभुः । स नो दिवा (६) स रिषः पातु नक्तम् । (तै० सं० १।२।१४।३,६,८,११,१३,१६) इत्यादिषु सहस्रशः स्थानेषु विद्यते । उपसर्गक्रियापदयोर्मध्ये पञ्चाशद्विरामः ' इषमूर्जमहमित आ (१) ददे ऋतस्य धाम्नो अमृतस्य योनेः । ' (तै० सं० ४।२।७।४) इत्यत्र 'आ ददे' इति योगः । ' निर्वपामि महीनां पयोऽसि ' इत्यत्र (तै० सं० १।१।१०।११) निः (२) वपामि । इति विरामः । एवं द्वयोर्ऋङ्मन्त्रयोः सङ्कलनम् । (तै० सं० १।२।१३।४-५) ' इदं विष्णुः ' पदम् । ' समूढमस्य (१) पाꣳसुरे, इरावती । ' इति पाठः ।

अत्र यजुर्मन्त्राणां पादाक्षरादिनियमाभावात् यत्रकुत्रापि विरामे यजुर्मन्त्रद्वयसङ्कलनेऽपि न दोषः इति केषांचित्समा-धानम् । ऋङ्मन्त्राणां तु पादार्धर्चादिमन्तरा अन्यत्र मध्ये एव यत्रकुत्रापि विरामः अन्यत्र वेदेषु न श्रुतः ।

" पच्छोऽर्धर्चशो नवानमिति " पाठे उपदेशादौ यज्ञादिविनियोगेऽपि पादेऽर्धर्चे च अन्ते विरामः शास्त्रविहितः; तेन ततोऽन्यत्र पादमध्ये यस्मिन्कस्मिंश्चित्पदे विरामः पाठसौकर्यार्थं क्लृप्तोऽपि अशास्त्रीय एवेति सिध्यति ।

पदार्धर्चऋगादिविभागमन्तरेण अन्यथा विभागेन वेदमन्त्राणां विनियोगं अध्ययनं वा कर्तुं नास्ति कस्याप्यधिकारः । " ब्रह्मयज्ञेन यक्ष्यमाणः अथ सावित्रीं गायत्रीं त्रिरन्वाह पच्छोऽर्धर्चशोऽनवानमिति " (तै० आ० २।११) ब्रह्मयज्ञादिषु तथैव विधानात् । तस्माद्यथाशास्त्रमेव ऋग्यजुर्मन्त्राणां विभागेनैव अध्ययनं तथा विनियोगादिकं च युक्तमित्युच्यते । यजुर्वेदे गद्यरूपेण यजुर्मन्त्राणां अविभागेन पाठपद्धतेः । ऋचामपि स एव न्यायो यजुर्मन्त्रपङ्क्तिमध्यपातित्वेन आपतितः । ऋग्यजुर्मन्त्रान्तरेण क्वचिद् ब्राह्मणवाक्येनापि सङ्कलनप्रसङ्गः । वस्तुतस्तु यजुषामपि मन्त्रविभागेनैव अध्ययनादिषु नियमे आदरणीये युक्ते सति, ऋचामपि तादृश एवानियमः सम्प्राप्तः सङ्कलनेन सह पाठमात्रेणेति शोचनीयमेवेदम् ।

मन्त्रप्रतीकपाठः

सारस्वतपाठक्रमे पूर्वं एकदा आनुपूर्व्येणागतानां द्वित्राणां बहूनां वा मन्त्राणां उत्तरत्र विनियोगावसरे पुनः पठितव्यानां ज्ञापनार्थं मन्त्रप्रतीकमात्रं यत्र पठ्यते, स प्रतीकपाठः ।

तद्यथा- ' आप्यायस्व सं ते । ' ' त्वं नो अग्ने । स त्वं नो अग्ने । '

' उदु त्यं चित्रम् । ' ' इमं मे वरुण तत्त्वा यामि । '

इत्यादयः प्रतीकपाठाः शतशो विद्यन्ते । तत्र तावन्मात्रस्य प्रतीकस्य मन्त्रत्वाभावात् प्रतीकमात्रपठनं निरर्थकमेव । ज्ञापनमात्रार्थमेव तत्र तत्प्रतीकपठनमिति चेत्, तावन्मात्रस्य पदक्रमादिपठनमकिञ्चित्करमेव । प्रतीकमात्रस्यैव पदक्रमादिपठन-पद्धतिरस्ति । अथाध्ययनमात्रे तथा पठितेऽपि, प्रयोगे समग्रमन्त्रपाठोऽस्ति तस्मान्न दोषः इति चेत्, तदप्यसङ्गतमेव " यं यं क्रतुमधीते तेन तेनास्येष्टं भवति " इति श्रुतेः, स्वाध्यायाध्ययने ब्रह्मयज्ञादौ च तत्तद्यज्ञीयमन्त्रपठनमात्रेण तत्तद्यज्ञानुष्ठानप्राप्ति-दर्शनात् । यथा ऋग्वेदे तु समानरूपेण पठितानामृचां पदपाठे गणन्तपाठो न शास्त्रीयः, तावन्मन्त्रावयवविच्छेदात, तथा प्रतीकमात्रपाठोऽपि न शास्त्रीयः ।

ऋग्वेदेऽपि गणन्तपदपाठोऽशास्त्रीयः

ऋग्वेदे गणन्तपाठः— ऋक्संहितायां पूर्वं कस्मिंश्चिन्मन्त्रे समानानुपूर्व्येण आगतानां त्रयाणां पदानां ततोऽप्यधिकानां वा पदपाठे अपरत्र पुनः तथैव पाठे तावन्मात्रस्य परित्यागेन मन्त्रशेषपाठ एव गणन्तपाठः इत्युच्यते । क्रमपाठे तु स गणन्तपाठः संहितारूपेण पठ्यते । पदपाठे एव गणन्तपाठोपहितः तावान् मन्त्रावयवो लुप्यते । यदि पदपाठः शास्त्रीयस्तर्हि गणन्तपाठः अध्ययनपरम्पराप्राप्तोऽप्यशास्त्रीय एव । तत्र तावन्मन्त्रावयवलोपात् । यत्र वेदमन्त्रेषु स्वरवर्णमात्रालोपादिः स्वल्पोऽप्यपराधो महतेऽनर्थाय कल्पत इति वदन्ति, तत्र पदपादादिलोपस्यत्यासाध्यपराधः कथमक्षम्यो न भवेत् ?

' मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ '

इति वेदाङ्गशिक्षोपदेशः प्रसिद्धतरः । संहिता—पद—क्रमरूपस्य स्वाध्यायस्य शास्त्रीयत्वं च श्रुतिसिद्धं, तच्च यथाशास्त्रमेवादरणीयम् । तथा च त्रिगुणपाठानुवचनमनुश्रूयते— ' अथातो निर्भुजप्रवादाः० यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपं, अथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्य, अग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवति ' इति (ऐ० आ० ३।१) । तत्र द्वयोः पदयोरक्षरयोर्वा यः सन्धिः तस्याविच्छेदेनाध्ययनं तन्निर्भुजं संहितापारायणम् । द्वयोः पदयोः सन्धिराहित्येनोच्चारणं प्रतृण्णं पदपारायणं, निर्भुजं प्रतृण्णं चैतदुभयमन्तरेण, न केवलं निर्भुजं, न केवलं प्रतृण्णं, एतादृशं क्रमपारायणं भवति । तथा फलकामनाभेदेन संहितादिपारायणमपि विहितम् । ' अन्नाद्यकामो निर्भुजं ब्रूयात्, स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेण ' इति (ऐ० आ० ३।३)

एवं यथाशास्त्रमध्येतव्ये वेदे मन्त्राणां त्रिविधेऽपि पाठे ' गणन्तपाठः, प्रतीकपाठः, अनुषङ्गादिपाठश्च, ' कथं शास्त्रीयतामर्हेत् ? कथं च पुनः फलाय कल्पेत ?

गणन्तपाठः— ' इन्द्रा याहि चित्रभानो० अण्वीभिस्तना पूतासः ॥ ' ' इन्द्रा याहि धियेषितः (ऋ० १।३।४-५) इत्यत्र 'अण्वीभिः तना पूतासः० । धिया इषितः' इति पदपाठः । 'तस्मा इन्द्राय गायत' इति पादलोपेन गणन्तपाठः 'शुनं हुवेम' इत्यादि मन्त्रलोपेनापि । एवं सहस्रशः स्थानेषु दृश्यते । एतेन ऋग्वेदे या पदसङ्ख्याऽभिहिता सा गणन्तपाठे लुप्तानां पदानां अग्रहणेनैव परिगणितेति ज्ञेयम् । वस्तुतस्तु सर्वेषां पदानां परिगणनैव युक्ततरा । तस्मात् गणन्तपाठे, ऋग्वेदे पदपाठे, तैत्तिरीयसंहिताप्रतीकपाठे च समग्रा एव मन्त्राः अध्येतव्याः शास्त्रवत्तायै इत्येव युक्तम् । एतेन तैत्तिरीयके अनुषङ्गमन्त्रपाठोऽपि व्याख्यातः ।

अनुषङ्गमन्त्रविचारः

तैत्तिरीयसंहितापाठक्रमे तावत् एकस्मिन्मन्त्रे श्रुतस्य कस्यचिद्भागस्य यज्ञादिविनियोगार्थं मन्त्रान्तरैकदेशानुयोजनमेवानुषङ्गः । तद्यथा— ' या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा' इति पाठः, (तै० सं० १।२।११।५-७) तत्र 'अयाशया, रजाशया, हराशया, ' इति पदत्रयमात्रविशेषेण नाम एतेषां त्रयाणां पदानां प्रत्येकस्मिन्मन्त्रे मध्ये योजनेन पृथक् त्रयो मन्त्रा भवन्ति । तत्रापि प्रथमे मन्त्रे ' या ते अग्नेऽयाशया० इत्यतः ' तनूर्वर्षिष्ठा गह्वरेष्ठा० स्वाहा ' इत्यन्तो मन्त्रशेषो योजनीयः । तथा द्वितीये मन्त्रे ' रजाशया ' इत्यस्य आदौ ' या ते अग्ने ' इति पदत्रयं, तथा अन्ते च ' तनूर्वर्षिष्ठा गह्वरेष्ठा० स्वाहा ' इति च योजनीयम् ।

तृतीये तु मन्त्रे पूर्वत्र पठितं ' या ते अग्ने ' इति पदत्रयं ' हराशया ' इत्यस्य पूर्वं योजनीयम् । तेन ते त्रयो मन्त्राः सम्पद्यन्ते । त एते त्रयो मन्त्राः सोमयागे त्रिषु दिनेषु उपसन्नामके आहुतिरूपे कर्मणि प्रत्येकशो विनियुक्ताः ।

तथा च सूत्रम्— 'आज्यस्थाल्याः स्रुवेणोपहत्य प्रथमामुपसदं जुहोति 'या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं० स्वाहा ' इति (बौ० श्रौ० सू०) एवं एकैकस्मिन् दिने एकैकेन मन्त्रेण उपसद्धोमो विहितः—

' तिस्र उपसद उपैति ' इति च ब्राह्मणम् (तै० सं० ६।२।३।७) ' मध्यमामुपसदं जुहोति० उत्तमामुपसदं जुहोति '

इति च सूत्रम् । मीमांसितं चेदं जैमिनिना, 'अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ।' इति (जै० सू० २।१।४८)

या ते अग्ने रजेत्यध्याहारोऽनुषञ्जनम् । तनूरित्यन्यशेषत्वादध्याहारोऽत्र लौकिकः ॥ इति पूर्वपक्षः

वेद्याकाङ्क्षा पूरणीया वेदेनेत्यनुषञ्जनम् । अन्यशेषोऽपि बुद्धिस्थो लौकिकस्तु न तादृशः ॥

इति च सिद्धान्तः । एवमनुषङ्गेणैव मन्त्रत्रयस्य सिद्ध्या तथा साधनेनैव तद्विनियोगो निर्णीतः । अन्यथा पाठक्रमानुसारेणोच्चारितास्ते न मन्त्राः नापि विनियोगार्हाश्च भवन्तीत्यर्थात्सिध्यति ।

अत एव शुक्लयजुःसंहितायां एते त्रयोऽपि मन्त्राः विनियोगानुसारेण मन्त्रमर्यादानुरोधेन पृथगेव पठिताः । तथैवान्ये सर्वेऽपि अनुषङ्गमन्त्राः यथाशाखं पाठक्रमे एवाध्ययनौचित्येन पृथक् पृथगेव पठिताः । तस्मान्नास्ति तत्र एतद्विषयकमीमांसावश्यकतेति न पुनर्वक्तव्यम् ।

'या ते अग्नेऽयःशया तनूर्वर्षिष्ठा० स्वाहा ।', 'या ते अग्ने रजःशया तनूर्वर्षिष्ठा० स्वाहा ।'

'या ते अग्ने हरिशया तनूर्वर्षिष्ठा० स्वाहा ।' इति । (वा० य० ५।८)

एवमेवान्यत्रापि 'चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' (तै० सं० १।२।१।१२-१४) । इत्यत्र अनुषङ्गेणैव मन्त्रत्रयसाधनेन तद्विनियोगो विहितः । तदपि मीमांसितम् ।

नानुषङ्गोऽनुषङ्गो वाऽच्छिद्रेणेत्यस्य शेषिणौ । चित्पतिस्त्वेत्यनाकाङ्क्षावतो नात्रानुषज्यते । इति पूर्वपक्षः

करणत्वं क्रियापेक्षं क्रिया चैका पुनात्विति । मन्त्रत्रयेऽतस्तद्द्वारा सर्वशेषोऽनुषज्यते । इति सिद्धान्तः

अत्र 'चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ १ ॥ 'वाक्पतिस्त्वा पुनात्वच्छिद्रेण० रश्मिभिः ॥ २ ॥ 'देवस्त्वा सविता पुनात्वच्छिद्रेण० रश्मिभिः ॥ ३ ॥ इति त्रयो मन्त्राः सम्पद्यन्ते

शुक्लयजुर्वेदे एकएव मन्त्रः– 'चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु' इति (वा० य० ४।४)

एवं शतशः अनुषङ्गमन्त्रा विद्यन्ते । तेषु केचिदेवात्र प्रदर्श्यन्ते आर्षेये काण्डपाठे तु सर्वेऽप्यनुषङ्गमन्त्राः यथाशाखं पृथगेवोल्लिख्यन्ते । अत्र तु ग्रन्थबाहुल्यभिया सङ्क्षेपतोल्लिखितम् ।

केचिदनुषङ्गमन्त्रविशेषाः

'विदेरग्निर्नभो नामाग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधे अग्ने अङ्गिरो यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा० तेन त्वाऽऽदधे' इति (तै० सं० १।२।१२।५)

अत्र 'द्वितीयस्यां' इति पदस्य आदौ 'विदेरग्नि० यो' इति मन्त्रभागः तथा अन्ते 'अस्यायुषा० तेन त्वाऽऽदधे' इति योजनेन द्वितीयो मन्त्रो भवति– 'विदेरग्नि०' इत्यादिपूर्वभागमात्रयोजनेन 'यस्तृतीयस्यां' इत्यादिना तृतीयमन्त्रो भवति ।

'विदेरग्निर्नभो नामाग्ने अङ्गिर इति त्रिर्हरति' इति च ब्राह्मणम् (तै० सं० ६।२।७।४)

'गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ सम्मार्ज्मि, वाचं प्राणं चक्षुः श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ सम्मार्ज्मि ।' (तै० सं० १।१।१०।३-६)

अत्र 'वाचं प्राणं चक्षुः श्रोत्रं, प्रजां योनिं,' इत्येतैः सह 'मा निर्मृक्षं' इत्यादि मन्त्रशेषयोजनेन चत्वारो मन्त्रा भवन्ति । ते च 'अथ स्रुवं सम्मार्ष्टि' अथ जुहूं, अथोपभृतं, अथ ध्रुवाम्' इति सूत्रादि सम्मार्जने विनियुक्ताः । तथा च 'स्रुचः सम्मार्ष्टि' इत्यादि ब्राह्मणम् (तै० ब्रा० ३।३।१)

'शुक्रं त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वाऽर्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि' इत्यत्र त्रयो मन्त्राः (तै० सं० १।१।१०।२१-२३)

रुद्राध्याये 'सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥'

इत्यस्मिन्ननुवाके–उत्तरत्र पठितानामेतासां अर्धर्चानां प्रत्येकशः 'तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि' इति

अर्थैक्ययोजनेन दशमन्त्रा भवन्ति । ' असिमन्महत्यर्णवे, नीलग्रीवाः शितिकण्ठाः शर्वा अधः, नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा, ये वृक्षेषु, ये भूतानां, ये अन्नेषु, ये पथां, ये तीर्थानि प्रचरन्ति । ' इति तेऽष्टार्धर्चाः । एतेषां मन्त्राणां ललाटादिस्थानेषु न्यासो विहितः महान्यासकल्पे । ' नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीः० जम्भे दधामि । ' इत्यत्र त्रयो मन्त्राः प्रसिद्धाः । (तै० सं० ४।५।११।१२–१४)। शतरुद्रीयं जुहोति० तिस्र उत्तरा आहुतीर्जुहोति, या उत्तमास्ता यजमानं वाचयति । ' इति च ब्राह्मणम् । , (तै० सं० ४।५।३) ' नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीः० ' ' नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीः ० ' ' नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीः० '। इति मन्त्रत्रयानुक्रमः । रुद्राध्याये एवं मन्त्रविभागः पाठक्रमे कथञ्चिदपि ज्ञातुं न शक्यः, रुद्राभिषेकादौ केचिद्विद्वांस एवैवं पठन्ति, सामान्याः वेदाध्यायिनोऽपि पाठक्रमानुसारेणैव रुद्राभिषेकादिकं कुर्वन्ति ।

एवं निर्दिष्टानामनुषक्तमन्त्राणां ' तिस्र उपसद उपैति ' इत्यादि ब्राह्मणवचनात् तत्तत्सूत्राच्च एते त्रयो मन्त्राः मन्त्रा इति विज्ञाते विनियोगे तथैव परिकल्पयितव्ये च अवशिष्ट विनियोगानुसारेणैव यथाशास्त्रं मन्त्रविभागेन पठनमेव युक्ततरमिति सप्रमाणं सयुक्तिकं भवति ।

अस्मिन्विषये प्रतिपादितं खलु पुरस्तादेव सारस्वतेतिहासे सारस्वतपाठनिर्णये अस्माभिः निर्णीतम् ' सारस्वतो वेदपाठः सारस्वतोक्तक्रमेणैवाध्येतव्यः, अन्यथाऽध्ययनफलं नास्तीति, ' तथा- ' सत्यं न पाठक्रमेणार्थानुष्ठानक्रमो भवतीति च ' सत्यं निर्णीतं अस्माभिरेव- तथापि न हि तत्र प्रमाणं किञ्चिदस्ति श्रुत्यादिकम् । नापि तत्प्रमाणविमर्शपूर्वकं निर्णीतम् । अपि तु ' स्थितस्य गतिश्चिन्तनीयेत्येव ' समाहितम् ।

वस्तुतस्तु स्वाध्यायाध्ययनमेव प्रधानो विनियोगः सर्वेभ्यः प्रथमः । ' स्वाध्यायोऽध्येतव्यः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः । ' इति च श्रुतिविहितः । ब्रह्मयज्ञादिरूपश्च ।

' अहरहः स्वाध्यायमधीयीत, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं ' इति श्रुतेः ' स्वाध्यायज्ञानयज्ञाश्च ' इति स्मृतेरपि स्वाध्यायाध्ययनस्यापि यज्ञत्वोपदेशेनैतदेवोद्बलयति । ' नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्ष ये दिवि येषामन्नं वातो वर्षमिषवः ' इत्यस्य पदसमूहस्य न मन्त्रत्वमस्ति, येन तावन्मात्रपाठेनापि रुद्रयागः ब्रह्मयज्ञश्च सम्पद्येत । नाप्येतद् विधिरूपं ब्राह्मणात्मकं वाक्यजातं विनियोगे तु मन्त्रावयवरूपेणानुषक्तत्वात् । ' यं यं क्रतुमधीते तेन तेन हास्येष्टं भवति ' इति श्रुतेः अध्ययनमात्रेणापि यज्ञसिद्धिनिर्देशात्, अनुषक्ते प्रतीके, गणान्ते च पाठे, तत्तन्मन्त्रावयवलोपेन यज्ञलोपस्यापरिहार्यत्वात् । एवमिह सारस्वतपाठे द्वित्रेषु त्रिचतुरेषु वा अतिदीर्घेषु मन्त्रेषु एकरूपेणैव पठितव्येषु अनुषक्ते प्रतीक–गणान्तादिषु पाठनादिलाघवाय मन्त्रैकदेशसङ्कोचेन सूत्रवत् संक्षेपतः सङ्ग्रथितमेवेत्युन्नीयते । एवं सङ्ग्रथनेन पाठप्रवचनार्थं केवलं पाठक्रममन्तरेण श्रुत्यादिकं प्रमाणं न विद्यते ।

अथ पाठवशात् तथैवाध्ययनं श्रेयस्करं, विनियोगे तु अनुषङ्गादिना यथाशास्त्रं मन्त्रोच्चारणं, इत्येव युक्तमिति चेत्, विनियोगे तथा उच्चारणीये तस्यैव मन्त्रत्वे सिद्धे च, अध्ययनमात्रे पाठक्रमे एव अन्यथा पठनीयो वेद इति को हेतुः ? ग्रन्थलाघवं अतिदीर्घमन्त्रपठने अधिककालव्ययाभाव एव तत्र हेतुरिति चेत्, हन्त भोः तदिदमतिसाहसप्रयुक्तं बालसम्मोहनवचनमिव आभासमात्रम् । अपि च ' ब्राह्मणेन निष्कारणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च ' ' अन्नाद्यकामो निर्भुजं प्रब्रूयात्, स्वर्गकामः प्रतृण्णं, उभयकाम उभयमन्तरेण ' इति च श्रुतिविनिधानात्, निष्कामतो ज्ञानार्थं, विशिष्टकामतोऽभीष्टसिध्यर्थं च, यथाशास्त्रमनुवर्तनीये स्वाध्यायाध्ययने, तत्र दीर्घमन्त्रपठने को नामातिभारः ? किञ्च तत्रालस्यं ? कथं च तत्र वृथैवाधिककालव्ययादिवृत्तिश्च समुदेति ? पाठप्रवचनप्रवृत्तानां विदुषां चेति न ज्ञायते ।

यदि खलु पाठक्रमेण मन्त्रविनियोगात् न यज्ञादिसिद्धिः, नापीष्टसिद्धिः, प्रत्युतानर्थप्रसङ्गश्चेति शास्त्रज्ञैरभ्युपगम्यते । यदि च अत्यल्पेन स्वरलोपमात्रेणाप्यपराधं न सहन्ते, तत्र साक्षात् मन्त्रावयवहीनेऽपि कथं चक्षुर्निमील्य मनः समाधीयते आस्तिकैर्वैदिककर्मपरायणैरिति चिरं शोचनीयमेवैतत् ! ! !

वस्तुतस्तु सारस्वतपाठक्रमे यत्खलु अध्ययने सुकरमिति सम्प्रति गण्यते, तदेतदेव कठिनतरं अनुष्ठाने, अर्थज्ञाने च, अनुषङ्ग-मन्त्रकल्पनागौरवात्, आर्षेयपाठे काण्डविभागेन समग्रमन्त्रपठनादिकं तु आदौ अध्ययने किञ्चित् कठिनमिति दृष्टमपि, उत्तरत्र अनुष्ठानेऽर्थज्ञाने च सुकरमिति प्रशस्यते, 'यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। यत्तदग्रेऽमृतमिव परिणामे विषोपमम्' इति न्यायात्। तथा ऋषिभिर्दृष्टानां मन्त्राणां यथाश्रुतमेवाध्ययनं युक्तम्। तादृशं दर्शनं तु मन्त्ररूपेणैव भवितुमर्हति। अन्यथा विनियोगे तत्कल्पनायां ऊहवाक्यानामिव अनुषङ्गादिमन्त्राणामपि मन्त्रत्वमेव भवेत्। तस्मात् एतावन्मीमांसादिशास्त्रार्थेन पाठक्रमाद्व्यत्यासतः विनियोगे अर्थवत्तायै मन्त्राणामन्यथाऽनुषङ्गादिप्रयासप्रसङ्गादपि विनियोगानुसारेण यथाशास्त्रं मन्त्र-संयोजनेन सिद्धमन्त्राणामेवाध्ययनं श्रेयस्करमित्युन्नीयते। तेनैव यथाश्रुतं यथाऽधीतमेव विनियोगादौ विशेषतः आनुकूल्येन अर्थवत्तायै कल्पनेति। अत एव शुक्लयजुर्वेदे अनुषङ्गादिमन्त्रशोधनेन तादृशानर्थप्रसङ्गो दूरीकृतः तत्रभवता याज्ञवल्क्येनेति गम्यते। अत्रायं कश्चित्पुनर्विचारप्रसङ्गः समयापतितः—

केचिदाहुः— अध्ययनमात्रार्थमेवायं सारस्वतपाठक्रमः कल्पतः, न तु विनियोगार्थं, तेन पाठक्रमानुरोधेनाध्ययनेऽपि विनि-योगावसरे यथाशास्त्रमेव मन्त्रान् प्रयुञ्जन्ति सर्वेऽपि वैदिकाः। तेन च परम्परागतः पाठक्रमोऽप्यादृतः स्यात्, तथा विनियोग-क्रमोऽपि न परित्यक्तो भवतीति।

अपि च गुरुचरित्रादिप्राचीनप्रासादिकग्रन्थेऽपि अस्य सारस्वतपाठस्यैवोद्धृतत्वात्, तथैव चिरात्प्रचलितं पूर्वाचार्योपदेश-परम्परासमागतं प्राचीनं तमिमं सारस्वतपाठं परित्यज्य, नूतनं पाठक्रमं परिकल्पयितुमयुक्तम्। एवं सति किमिति सारस्वतपाठ-क्रमपरिवर्तने एतावान् आग्रहः समाश्रीयते, इति किञ्चिद् विचारास्पदम्।

अत्रोच्यते—आपाततः तदेतत्सत्यमित्येवावभासते, तथापि सारस्वतपाठाभिमानमात्रेण एतादृशपाठक्रमानुरोधेन च क्वचित् ऋक्पादातिमर्यादातिक्रमणं, क्वचित् छन्दोनियमातिक्रमेण मन्त्रविभागनियमातिक्रमणं च, विनियोगेऽपि पाठबलादेवापतितम्, तद्यथा ऋक्पादनियमातिक्रमः—

'सूर्यो देवीमुषसं रोचमानां मर्यः। न योषामभ्येति पश्चात्।' इति (तै० ब्रा० २।८।७)
'तिष्ठाहरी रथ आयुज्यमाना याहि। वायुर्न नियुतो नो अच्छ'। इति (तै० ब्रा० २।७।१२)
'तमुस्तोतारः पूर्व्यं यथा विद ऋतस्य। गर्भꣳ हविषा पिपर्तन' इति (तै० ब्रा० २।४।३)
'आ वां मित्रावरुणा०। वर्त्याम्। अस्माकं ब्रह्म पृतनासु सह्या अस्माकम्। वृष्टिर्दिव्या सुपरा।
इति (तै० ब्रा० २।८।६)

एतासामृचां त्रिष्टुप्छन्दस्कानां पच्छः पादविभागेन वाक्यरचनया अध्ययने विनियोगादौ च योजयितव्यानां 'मर्यः, याहि, ऋतस्य, अस्माकं,' इति पादमध्ये एव वाक्यपरिसमाप्त्या तत्तत्पाठक्रमानुरोधेन विनियोगेऽपि तथैव पठ्यते वैदिकैः। अत्र पाठक्रम एव प्रधानो हेतुः। एवमेवान्यत्रापि पादार्धर्चर्गादिनियमातिक्रमो दृश्यते।
तथाहि— (तै० सं० १।७।८।८–१५)

'वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वनः स्कभ्नीत (१) काष्ठां गच्छत'
इति यजुर्मन्त्रः। ततश्च केचिदृङ्मन्त्राः पठिताः—

'वाजेवाजेऽवत वाजिनो नः०...ऋतज्ञाः। अस्य मध्वः०...देवयानैः' ॥ १ ॥
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनः ॥ २ ॥
मितद्रवः सहस्रसा मेधसाता सनिष्यवः। महो ये धनꣳ समिथेषु जभ्रिरे शं नो भवन्तु वाजिनो हवेषु ॥ ३ ॥
देवताता मितद्रवः स्वर्काः। जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि। सनेम्यस्मद्युयवन्नमीवाः ॥ ४ ॥
एषस्य वाजी०...आसनि। क्रतुं दधिक्रा०...पनीफणत् ॥ ५ ॥
उत स्मास्य०...तरित्रतः ॥ ६ ॥ इति प्रसिद्धः पाठक्रमः।

अत्र ' वाजिनो वाजं धावत, वियोजना मिमीध्वं ' इति यजुर्द्वयकथनेन उत्तरान् ' वाजेवाजेऽवत ' इत्यादीन् षड् ऋङ्मन्त्रान्विभाज्य एवमष्टमन्त्रविभागात् आपस्तम्बेन तद्विनियोगो दर्शितः । वाजिनो वाजं धावतेति चतसृभिर्धावतोऽनु मन्त्रयते, मितद्रव इति चतसृभिः प्रत्याधावतोऽनु मन्त्रयते ' इति आ० श्रौ० सूत्रम् । तत्र ' वाजिनः, वियोजना, वाजेवाजे, ते नो अर्वन्तः ' इति चत्वारो मन्त्राः वाजपेये रथानुधावनार्थाः, तथा ' मितद्रवः, देवताता मितद्रवः, एष स्य वाजी, उत स्मास्य ' इति चत्वारः प्रत्याधावदनुमन्त्रणार्थाः । स एषः पाठक्रमानुरोधेन विहितः कल्पः । ब्राह्मणे तु अन्यथैव कल्पो दृश्यते- तत्र ' वाजिनो वाजं धावत० ' इत्यारभ्य ' काष्ठां गच्छत ' इत्यन्त एक एव यजुर्मन्त्रः । ' वाजिनो वाजं धावत काष्ठां गच्छतेत्याह ' इति (तै० ब्रा० १।३।६) तद्ब्राह्मणे ' वाजिनो वाजं धावत ' इति मन्त्रप्रतीकग्रहणेन ' काष्ठां गच्छत ' निगदशेषानुवचनात् ।

ततश्च प्राञ्चो धावन्ति । चतसृभिरनुमन्त्रयते चत्वारि छन्दांसि ' इति (तै० ब्रा० १।३।६) उत्तरत्र पठिताः ' वाजेवाजेऽवत ' इत्याद्याश्चतस्रः ऋचः तदनुमन्त्रेण विनियुक्ताः । ताश्च चतस्रः ऋचस्तु ' वाजेवाजे ते नो अर्वन्तः, शं नो भवन्तु वाजिनः, एष स्य वाजी, ('उत स्य वाजी' इति ऋग्वेदपाठः) इति ऋग्वेदे प्रसिद्धाः। ' चतसृभिरनुमन्त्रयते ' इति ब्राह्मणवचनात् एतासां चतसृणामृचां छन्दोऽनुरोधेनैव विनियोगो विहितः । ' अथ रथान्धावतेऽनु मन्त्रयते वाजेवाजेऽवत वाजिनो न ' इति चतसृभिरनुच्छन्दसम् । इति बौधायनश्रौतवाजपेयसूत्रम् ।

ततश्च ' स यद्यस्मै यज्ञभ्रेषमाचक्षते आग्नीध्रीये एतामाहुतिं जुहोति उत स्मास्य द्रवतस्तुरण्यतः ' इति च उत्तरस्या ऋचो विधानम् । अत्र ' वाजेवाजे, ते नो अर्वन्तः, शं नो भवन्तु, एष स्य वाजी ' इत्येतासु चतसृषु ऋक्षु पाठक्रमे मन्त्रमध्ये एव रेखादर्शनेन तत्र विरामपद्धतेश्च पञ्चमन्त्राः परिकल्पिताः । तत्रापि ' ते नो अर्वन्तो हवनश्रुतो रथं विश्वे शृण्वन्तु वाजिनो मितद्रवः । ' इति पूर्वार्धर्चस्य ' मितद्रवः ' इत्येतदन्तिमं पदं ' सहस्रसा मेधसाता सनिष्यवः ' इति एतस्मिन् उत्तरार्धर्चस्य पूर्वस्मिन् पादे आदौ संयोज्य ' मितद्रवः सहस्रसा मेधसाता सनिष्यवः ' इति मन्त्रपादः कल्पितः वाजिनः इत्यत्रैव विरामेण तावत्येवैको मन्त्रः कल्पितः ततश्च एतस्यैवार्धर्चस्य शेषेण ' महो ये धनं समिथेषु जभ्रिरे ' इत्येतेनान्तिमेन पदेन सह ' शं नो भवन्तु वाजिनो हवेषु ' इत्येतमुत्तरमन्त्रपादं संयोज्य एको मन्त्रः कल्पितः । ततश्च ' देवताता मितद्रवः स्वर्काः । जम्भयन्तो हि० अमीवाः ' इत्येतैरुत्तरैस्त्रिभिरेव पादैः एको मन्त्रः समापितः । ' एष स्य वाजी ' इति चतुर्थो मन्त्रः । तत्रापि ' ते नो अर्वन्तः ' इत्यारभ्य ' वाजिनो हवेषु ' इत्यन्तं द्वितीयो मन्त्रः इत्यपि कश्चित्पक्षः अत्र पञ्चममन्त्रविभागे ' एष स्य वाजी ' इति अस्य विनियोग एव लुप्यते ।

ऋग्वेदे एतासामृचां भिन्नाः ऋषयो भिन्नानि छन्दांसि च भवन्ति ' वाजेवाजे, शं नो भवन्तु ' इत्यनयोर्वसिष्ठस्त्रिष्टुप्, ' ते नो अर्वन्त ' इति गयः प्लातो जगती, " एष स्य वाजी " इति वामदेवस्त्रिष्टुप् । इति प्रसिद्धम् । एवं सति भिन्नर्षिकयोः त्रिष्टुब्जगती छन्दस्कयोः ऋङ्मन्त्रयोः पादाभ्यां सङ्कलनेन कथमेको मन्त्रः सम्पद्यते ? तथा पक्षान्तरेण " ते नो अर्वन्तः० ' इत्यारभ्य ' शं नो भवन्तु वाजिनो हवेषु ' इत्यन्तस्य मन्त्रान्तरपादाधिकस्य कथमेकमन्त्रत्वम् ?

वस्तुतस्तु ' चतसृभिरनुमन्त्रयते ' ' चतसृभिरनुच्छन्दसम् ' इति विधानात् अत्र छन्दोऽनुरोधेनैव विनियोगः शास्त्रीयः ।

अथैतासामृचां छन्दोनियमबोधकं प्रमाणं अत्र यजुर्वेदे एव नास्तीति चेत्- शाखान्तरोक्तमेवात्रापि प्रमाणं भवितुमर्हति । तस्मात् ' वाजेवाजे, ते नो अर्वन्तः, शं नो भवन्तु, एष स्य वाजी ' इति मन्त्रचतुष्टयविभागेनैव विनियोगो युक्ततर इति निश्चीयते । आपस्तम्बदर्शितेऽष्टमन्त्रविभागे तु अयं पाठक्रम एव प्रधानो हेतुरिति प्रत्यक्षसिद्धम् ।

अस्यां शाखायां ऋग्यजुरादिमन्त्रविभागे पाठक्रमो न प्रमाणभूतः, नापि पाठक्रमेण अनुष्ठानक्रमोऽस्तीत्यसकृदुद्घुष्यते । अत्र तु पाठक्रमतो मन्त्रविभागेन छन्दोनियमोऽप्युल्लङ्घितः । तस्माद् विनियोगे मन्त्रशुद्धौ पाठक्रमशुद्धिरेवात्यन्तमावश्यकमिति प्रतिज्ञायते ।

वेदव्रतानि

तैत्तिरीयशाखायां स्वाध्यायाध्ययनार्थं वेदव्रतान्युपदिष्टानि, व्रतानुष्ठानपूर्वकमेव वेदाध्ययनं विहितम् । तत्रापि प्रत्येकस्य काण्डस्याध्ययने प्रत्येकं व्रतमपि पृथगुपदिष्टम् "काण्डेकाण्डे व्रतचर्या" (बौ० गृ० सू० ३।२।३) 'प्रतिकाण्डं व्रतं चरेत्' इति च ।

तथाहि- आचार्यप्रसूतः कर्माणि करोतीति विज्ञायते । आचार्यो वै ब्रह्मेति । काण्डेकाण्डे व्रतचर्या । अथेमानि व्रतानि सांवत्सरिकैर्व्रतैरध्येयानि भवन्ति । होतारः शुक्रियाण्युपनिषदो गोदानं सम्मितमिति ।' इति (बौ० गृ० ३।२।१-५)

अपि च 'अष्टाचत्वारिंशद्वर्षाणि पौराणं वेदब्रह्मचर्यम् । चतुर्विंशति द्वादश वा प्रतिवेदम् । संवत्सरावमं वा प्रतिकाण्डम् । ग्रहणान्तं वा जीवितस्यास्थिरत्वात्' इति बौ० धर्मसूत्रे (१।२।१-४) निर्दिष्टम् ।

तथा प्रयोगतिलकेऽपि- 'प्राजापत्यं च सौम्यं चाप्याग्नेयं वैश्वदेविकम् ।
स्वायम्भुवं पञ्चमं स्यात्प्रतिकाण्डं व्रतं चरेत् ॥

आब्दिकं ग्रहणान्तं वा द्वादशाहिकमेव वा । इत्याद्युपक्रम्य वेदोपकरणान्ते- सद्यो नान्दीमुखक्रिया ।
तस्मिन्नह्नि तमेवाग्निमन्वाधायाथ पूर्ववत् । प्रजापतिं काण्डर्षिमावाह्याग्निमुखान्तकम् ।
कृत्वा विसृज्य दण्डादीनन्यानादाय मन्त्रवत् । मौञ्जीदण्डोपवीतानि वासः कृष्णाजिनं तथा ।
पूर्वोपयुक्तान्युत्सृज्य धार्याणि स्युर्व्रतेव्रते । अच्छिन्नवासोऽप्यहतमुपवीतं न सन्त्यजेत् ।
सावित्र्याथ हुनेत्पक्वं ततः पञ्चदशाहुतीः ॥

इत्यादिप्रयोगक्रमं चोक्त्वान्ते-

नियमाचरणं कुर्याद्वपनं च व्रतेव्रते ॥ इत्युपसंहृतम् ।

एतेन श्रावण्यामध्यायोपाकर्म कृत्वा तद्दिने वाऽन्यस्मिन्वा वेदारम्भानुकूले सुदिने होतृव्रतमुपाकृत्य प्राजापत्यकाण्डमधीयानः संवत्सरं यावदध्ययनं वा व्रतं चरित्वा तस्योत्सर्गं कुर्यात् । एवमेव क्रमेण शुक्रियादिकाण्डाध्ययनं कृत्वा तत्तद्व्रतविसर्जनं कुर्यादित्युक्तं भवति ।

अत्र १ होतृव्रतं, २ शुक्रियव्रतं, ३ उपनिषद्व्रतं, ४ गोदानव्रतं, ५ सम्मितव्रतं, इत्येतानि क्रमेण (१) प्राजापत्य- (२)- सौम्या- (३)- ग्नेय- (४)- वैश्वदेव- (५)- स्वायम्भुवकाण्डानामध्ययने चरणीयानि व्रतानि व्रतनामानि वा भवन्ति ।

अत्र सौम्यकाण्डाध्ययनार्थमाचरणीये शुक्रियव्रते तु प्रवर्ग्यकाण्डाध्ययनार्थमवान्तरदीक्षापि विद्यते इति विशेषः ।

अस्मिन् व्रतकल्पे उपनिषद्व्रतानन्तरं गोदानव्रतं निवेशितमाचार्येण, काण्डक्रमे तु आग्नेयकाण्डानन्तरं वैश्वदेवकाण्डं । इत्यतोऽत्र संदिह्य क्वचिद्गोदानव्रतानन्तरं उपनिषद्व्रतं प्रयुक्तम् ।

एवं तत्तत्काले तत्तद्व्रतमुपाकृत्य, तत्तत्काण्डमधीत्य, तदध्ययनान्ते तत्तत्काण्डव्रतं विसृजेदित्ययं प्रधानः कल्पः । तदसम्भवे तु-

'अशक्तौ होममात्रेण चर्यं तत्रैकतन्त्रतः । कालायत्तमिदं कर्म कालो हि दुरतिक्रमः ॥
तस्मात्तन्निष्कृतिं कृत्वा तन्त्रैक्येणापि वा चरेत् । त्वमग्ने व्रतपेत्येका सावित्री च मनस्विनी ॥
महाव्याहृतयश्चेति प्रायश्चित्ताहुतिर्मता । पक्वं हुत्वोपहोमाः स्युस्तत्तद्व्रतवशात्तथा ॥
समिद्धोमस्तथा तत्तत्काण्डाध्ययनमेव च । व्रतादाने विधिरयं विसर्गेऽप्येवमेव सः ॥
पक्वहोमादिकोऽधीतिवर्जितः पुनरेव तु । यावन्ति व्रतकर्माणि तावन्त्यप्याचरेत्तथा ॥
ग्रहणं मेखलादीनां नेष्यतेऽत्र पृथक् पृथक् । ततः स्विष्टकृदाद्यन्तु प्राग्वदेव समाचरेत् ॥'

इति गृह्यसंग्रहोक्तप्रकारेणैकदैव एकतन्त्रेण होत्रादिपञ्चव्रतानि प्रायश्चित्तपूर्वकमुपाकृत्य, पञ्चकाण्डान्यधीत्य, तथैव तन्त्रेण तान्युत्सृजेदिति ।

अथात्र सारस्वतपाठक्रमेणाध्ययने तु प्राजापत्यादिकाण्डाध्ययनाशक्यत्वात् यथाविधि एकतन्त्रेणैव होत्रादिव्रतपञ्चकमनुष्ठाय

सारस्वतपाठोपहितसंहितादिग्रन्थाध्ययनं कुर्यादिति वैदिकानां मतं, तथैव पूर्वाचारपरम्परया समागतं चेति सम्प्रति प्रचलितपद्धत्या गम्यते । तस्मिन् काण्डव्रते सावित्री–सदसस्पतिहवनपूर्वकं तत्तत्काण्डर्षिहवनमपि विहितम् । ' एवमेव काण्डोपाकरणकाण्डसमापनाभ्याम् । स एकः काण्डऋषिः । इति । (बौ० गृ० सू० ३।१।१७)

काण्डव्रते उपाकर्मोक्तसावित्रीप्रभृतिहोमाद्यनन्तरं तत्तत्काण्डर्षिभ्योऽपि आहुतिः समर्पणीया, तथा तत्तत्काण्डस्याद्योऽनुवाकः तत्रानुष्ठेये ब्रह्मयज्ञे पठनीयः । अर्थात् प्रजापतिकाण्डाध्ययने होतृव्रते ' प्रजापतये काण्डर्षये स्वाहा ' इत्येका काण्डर्षये आहुतिः, तथा ' इषे त्वेति ' अनुवाकपठनं च विशिष्यते, अन्यत्सर्वं उपाकर्मोक्तमेवानुष्ठेयम् ' एवमेव काण्डोपाकरणकाण्डसमापनाभ्याम् ' इति सूत्रात् ।

एवमेव सौम्यकाण्डाध्ययने शुक्रियव्रते ' सोमाय काण्डर्षये स्वाहा ' इत्याहुतिः, ' आप उन्दन्तु जीवसे ' इत्येकानुवाकपाठश्च विशिष्टौ । तथा आग्नेयकाण्डाध्ययने उपनिषद्व्रते ' अग्नये काण्डर्षये स्वाहा ' इत्याहुतिः, ' उद्धन्यमानं ' इत्यनुवाकश्च । एवं उत्तरत्रकाण्डद्वयेऽपि ज्ञेयम् ।

उपाकर्मोत्सर्जनविधिः

अस्मिन्भारते सर्वत्रापि प्रतिवर्षं श्रावणपूर्णिमायां ऋग्यजुःसामाथर्ववेदिनां सर्वेषां त्रैवर्णिकानां प्रचलिता उपाकर्मानुष्ठानपद्धतिः प्रसिद्धा, तत्र शाखाभेदेन तदनुष्ठानपद्धतिविशेषोऽपि भिन्नो भवति ।

उपनीतस्य बटोः प्रथमतः श्रावणपूर्णिमायां नूतनोपाकर्मणि वेदारम्भो विहितः, ततः उत्तरत्र पुष्यमासे वेदोत्सर्जनं च विहितं, तत्प्रभृति प्रतिवर्षं श्रावणे उपाकर्म पुष्ये तूत्सर्जनं च कर्तव्यं इति शास्त्रसङ्केतः । तदेतदुभयं कालभेदेनानुष्ठातुमशक्यतया श्रावणपूर्णिमायामेकदैव एकतन्त्रेण उत्सर्जनं उपाकर्म च सर्वैरप्यनुष्ठीयते, तदिदं सर्वत्रापि प्रसिद्धम् ।

तन्निमित्तं च छन्दसां यातयामतादोषनिवृत्त्या सुवीर्यत्वसिद्धिरेव । तदेतत् तत्रत्यसङ्कल्पादेवावगम्यते । " सर्वेषां अधीतानामध्येष्यमाणानां छन्दसां यातयामतानिरासेनाप्यायनद्वारा (सुवीर्यत्वाय) श्रीपरमेश्वरप्रीत्यर्थं (उत्सर्जनं) उपाकर्माख्यं कर्म करिष्ये । इति संकल्पः ।

प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद् द्विजैः । क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः । क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम् ॥
अस्थानोच्छ्वासविच्छेदो घोषणाध्यापनादिषु । प्रामादिकः श्रुतौ यः स्याद्यातयामत्वकारि सः ॥

इति संस्कारमालायां कात्यायनः । ' यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजते याजयति वाऽधीतेऽध्यापयति वा यातयामानि (अस्य) छन्दांसि भवन्ति ' इति च श्रुतिः । एतेन वेदानां यातयामतादिदोषनिवृत्त्या सुवीर्यत्वाय ऋषिछन्दोदेवतादिनियमः, तज्ज्ञानं, प्रतिवर्षं उपाकर्माख्यकर्मानुष्ठानं च कारणमित्युक्तं भवति । तच्चोपाकर्म तत्तच्छाखाभेदेन भिन्नरूपमेव भवति । तैत्तिरीये तु बौधायनादिभिर्विहितस्तद्विशेषः ।

तथाहि— " हुतानुकृतिरुपाकर्म । श्रावण्यां पौर्णमास्यां क्रियेतापि वाऽऽषाढ्याम् । समन्वारब्धेष्वन्तेवासिषु । अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा चतस्रः प्रधानाहुतीर्जुहोति ' याज्ञिकीभ्यो देवताभ्यः स्वाहा । ' साहितीभ्यो देवताभ्यः स्वाहा, वारुणीभ्यो देवताभ्यः स्वाहा, सर्वाभ्यो देवताभ्यः स्वाहेति । '

अथ काण्डर्षीञ्जुहोति " प्रजापतये काण्डर्षये स्वाहा, सोमाय काण्डर्षये स्वाहा, अग्नये काण्डर्षये स्वाहा, विश्वेभ्यो देवेभ्यः काण्डर्षिभ्यः स्वाहा, स्वयम्भुवे काण्डर्षये स्वाहा ' इति । अथ सदसस्पतिं जुहोति० । अथ सावित्रीं जुहोति० । अथ वेदाहुतीर्जुहोति ऋग्वेदाय स्वाहा० इति (बौ० गृ० सू० ३।१।१-८) इति उपाकर्मणि ऋषिदेवतादिहोमविधानम् ।

अथ वेदाध्ययनम्- " त्रीनादितोऽनुवाकानधीयीरन् । काण्डादीन्वा सर्वान् (अनुवाकान्) १० इति । एवमेव' काण्डोपाकरणकाण्डसमापनाभ्याम् स एकः काण्डर्षिः । (बौ० गृ० ३।१।१७) तस्य चैवैकस्याद्योऽनुवाकः इति । एवमेव उपाकर्मोत्सर्जनयोः काण्डव्रते च काण्डर्षिभ्यः तर्पणमपि अनुष्ठीयते ब्रह्मयज्ञानन्तरम् । अथ निवीती- प्रजापतिं

काण्डर्षिं तर्पयामि० इत्यादि पञ्चकाण्डर्षितर्पणम् ।

पञ्चकाण्डानामारम्भः—

१ प्राजापत्यं काण्डम् । इषे त्वोर्जे त्वा० । (तै० सं० १।१।१)
२ सौम्यं काण्डम् । आप उन्दन्तु जीवसे० । (तै० सं० १।२।१)
३ आग्नेयं काण्डम् । उद्धन्यमानं० । (तै० आ० १।२।१)
४ वैश्वदेवं काण्डम् । अनुमत्यै पुरोडाशं० । (तै० सं० १।८।१)
५ स्वायम्भुवं काण्डम् । सह वै देवानां० । (तै० आ० २।३)

अत्र सारस्वतक्रमेण वैश्वदेवस्वायम्भुवकाण्डयोरारम्भे ' अनुमत्यै पुरोडाशं, सह वै देवानां ' इति च ब्राह्मणभागः पठितः । वस्तुतस्तु– वैश्वदेवकाण्डारम्भः ' वीहि स्वाहाऽऽहुतिं जुषाणः ' इति । स्वायम्भुवकाण्डारम्भः ' यद्देवा देवहेडनं ' इत्येव भवितुमर्हति । तत्तु उत्तरत्र आर्षेयपाठक्रमे उल्लिख्यते ।

अत्रेदं किञ्चिद्विचार्यते– एवं वेदारम्भ–काण्डव्रतउपाकर्मोत्सर्जनादिषु काण्डर्षिहवनतर्पणादिपूर्वकं ब्रह्मयज्ञे यथाशास्त्रं सर्वेषां काण्डानां आदिमानुवाकपाठक्रमतः तैत्तिरीयशाखायाः वेदाध्ययनेन अनुष्ठानेन च काण्डविभागपाठ एव प्रधानः इति सिध्यति । एतेन तैत्तिरीयके काण्डविभागपाठपद्धतिरेव नास्ति, इदानीमेवेयं नूतना प्रक्रिया परिकल्पितेति केषाञ्चिद् वादो निरस्तः ।

सारस्वतपाठे काण्डाध्ययनं न सम्भवति । तत्र वेदारम्भे उपाकर्महवनादौ च अन्यथाऽनुष्ठानं, ततः पुनरन्यथैवाध्ययन–मित्येत्र वैषम्यम् । उक्तं खलु एकतन्त्रेण पञ्चकाण्डव्रतान्यनुष्ठाय सारस्वतपाठक्रमेण वेदाध्ययनं कर्तव्यमिति । सत्यमुक्तं, तथापि अन्यथा वेदारम्भे हवनाद्यनुष्ठाने, अन्यथाऽध्ययने च किं कारणं, किं च तत्र वैशिष्ट्यमित्येव न ज्ञायते । तत्र प्रमाणं तु मृग्यमेव ।

अपि च सारस्वतपाठे काण्डक्रमस्यैवाभावात् काण्डर्ष्यादिहवनमसङ्गतमेव, काण्डर्षिहवने अन्यथाऽध्ययनमप्यसङ्गतमिति न पुनर्वक्तव्यम् । यदि तत्र काण्डान्येव न सन्ति विभक्तानि, तर्हि काण्डर्षिहवनं कुतः सङ्घटते ? अन्यच्च वेदस्य यातयाम-तादिदोषनिरसनार्थं प्रतिवर्षं उपाकर्मादिकमनुष्ठीयते, वेदस्य ऋष्यादिनियमाभावे ऋष्यादिज्ञानाभावे च ' यातयामानि च्छन्दांसि भवन्तीत्युक्तम् '

एवं सति वेदे एव यदि ऋष्याद्यनियमः चिरन्तनसिद्धः तर्हि तद्यातयामतादोषः केनोपायेन वार्येत । न हि तावदुपाकर्मानु-ष्ठानमात्रेण तन्निवारयितुं शक्यं, उपाकर्मानुष्ठानात्, अन्यथैव वेदपाठप्रवचनप्रवृत्तेः ।

तथाहि– ' इषे प्रश्नः पुरोडाश्यमनुवाकं विनान्तिमम् ' इति विवरणात् इषेत्वेति प्रथमे प्रश्ने त्रयोदशानुवाकाः पौरोडाशिका यजुर्मन्त्राः प्राजापत्यकाण्डेऽन्तर्गताः । तस्मिन्नेव प्रश्ने ' उभा वामिन्द्राग्नी ' इत्ययमन्तिमः चतुर्दशः एक एवानुवाकस्तु याज्यापुरोऽनुवाक्यादिविनियोगार्थत्वेन 'याज्यानामके' प्रकरणे सङ्गृहीतोऽत्र ऋङ्मन्त्रात्मकः चतुर्थे वैश्वदेव-काण्डेऽन्तर्गतः ।

इषे त्वादि ह्यपान्त्वान्तं प्रश्नानामन्तगामिनः । अनुवाकास्तु याज्याख्याः युक्ष्वाहीत्यपि तादृशाः ॥ इति कारिकाविवरणोक्तेः ।

तैत्तिरीयसंहिताप्रथमकाण्डे प्रथमप्रश्नादारभ्य द्वितीयकाण्डे पञ्चमप्रश्नान्तानां त्रयोदशप्रश्नानां अन्तिमा त्रयोदशानुवाकास्ते (१३), तथा २।६ प्रश्नादारभ्य ४।३ प्रश्नपर्यन्तं युक्ष्वाहीत्यादयः दशानुवाकाश्च याज्याप्रकरणान्तर्गताः वैश्वदेवकाण्डे-ऽन्तर्भूता इति तदर्थः ।

एवं प्राजापत्यादिकाण्डेऽन्तर्गतः कश्चिन्मन्त्रभागः संहितायां, कश्चिद् ब्राह्मणे, कश्चिदारण्यके च विद्यते ।

तथा च प्रथमं प्राजापत्यकाण्डम्–

१ पौरोडाशिकम्– ' इषे त्वा० ' (तै० सं० १।१।१–१३) त्रयोदशानुवाकाः ।

१ याजमानम्- 'पयस्वतीरोषधयः' (तै० सं० १।५।१०) 'मम नाम' (इत्यस्मिन्ननुवाके अनुवाकान्ताः सह मन्त्राः ।) तथा 'सन्त्वा सिञ्चामि०' (तै० सं० १।६।१-६ षडनुवाकाः ।)
३ होतारः- 'चित्तिः स्रुक् ०' (तै० आ० ३।१-१३ त्रयोदशानुवाकाः ।)
४ हौत्रम्-'सत्यं प्रपद्ये०' (तै० आ० ३।५।१-१३ ,,)
५ पितृमेधः— 'परेयिवा ँसं०' (तै० आ० ६।१-१२ द्वादशानुवाकाः ।) सर्वेषामपि काण्डानामेवमेव स्थितिः ।

एवं त्रिष्वपि ग्रन्थेषु अनियमेन पठितानामेतेषां मन्त्रभागानां एकत्र संग्रहणेनाध्ययनं सारस्वतपाठक्रमे सर्वथाप्यशक्यमेव । अथ बौधायनादिसूत्रदर्शितात्काण्डविभागविशिष्टादार्षेयपाठादपि पुरातनस्य सारस्वतपाठस्यैव प्राधान्यमस्तु इतिचेत्, नैतदेवं, ईदृशे न्यायतत्त्वसिद्धे विषये प्राचीनार्वाचीनत्वादिनिमित्तकस्याकिञ्चित्करत्वात् । न्यायसिद्धस्यैव लोकतः शास्त्रतश्च ग्राह्यत्वात्, अन्यथासिद्धस्य तु परित्यक्तुं शक्यत्वादुचितत्वाच्च । सारस्वतपाठस्य तादृशानुपूर्व्ये न किञ्चित्प्रमाणमस्तीत्यवोचाम ।

वस्तुतस्तु आर्षेयकाण्डपाठ एव पुरातनः, सारस्वतपाठस्तु अर्वाचीन इत्येव वक्तुं युक्तम् । सारस्वतमुनेरपि पूर्वं विद्यमानस्य आर्षेयकाण्डपाठस्य विस्मरणेन लुप्तप्रायस्य तस्य उत्तरत्र सारस्वतमुनिना यथाकथञ्चित्पुनरुद्धृतत्वात् । अत एव तदिदं तदानीं सर्वैरपि विचिकित्सितम्- "तमिमं सर्ववेदविलक्षणमध्यापितवान् अस्मान्मूढान्कृत्वेति ।" अपि च महादिदं प्रमाणं आर्षेयकाण्डानुक्रमपाठे यत्खलु वेदारम्भे वेदव्रते उपाकर्मादौ च काण्डर्षिहवनपूर्वकं सर्वकाण्डानामादिमानुवाकपठनेन ब्रह्मयज्ञः सर्वैरपि एकरूपेणैवानुष्ठीयत इति । तस्मात् ब्राह्मणकल्पानुरोधेन बौधायनहिरण्यकेशादिसूत्रानुसारेण प्राजापत्यादिकाण्डविभागशः पौरोडाशिकादिमन्त्र- तद्विधिभागयोः पृथक्करणेन संहिताब्राह्मणरूपोभयग्रन्थविभागेन तदध्ययनमेव सर्वथा युक्ततरमिति निर्णीयते ।

तत्र संहिताब्राह्मणयोरुभयोरपि ग्रन्थयोः प्राजापत्यादीनि पञ्चकाण्डानि क्लृप्तानि भवेयुः । तथा चेत् मन्त्र-तद्विधिभागनिमित्ते संहिताब्राह्मणग्रन्थविभागे 'स ब्राह्मणानि सानुब्राह्मणानि' इति वचनानूदितेन काण्डविभागेन तत्र तत्रैव मन्त्रतद्विधिभागयोः साहित्येनाध्ययनं कथं शक्यं सम्पादयितुम् ?

कथमशक्यम् ? उच्यते सम्पूर्णमन्त्रभागरूपसंहिताग्रन्थाध्ययनानन्तरं ब्राह्मणाध्ययनं सर्वेष्वपि वेदेषु नियतम् । तेनैव क्रमेण अत्राप्यनुष्ठितं चेत्—

'त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह । यजुर्वेदः स विज्ञेयः०' इति वचनोदितस्य मन्त्रब्राह्मणयोः एकरूपेण त्रिगुणपाठस्य सहाध्ययनस्य च परित्यागप्रसङ्गात् । न हि तथा सम्भवति संहिताब्राह्मणग्रन्थयोरुभयत्रापि काण्डपञ्चकविभागे प्रथमं यावन्मात्रस्य मन्त्रभागस्याध्ययनं, तदनु तावन्मात्रस्य ब्राह्मणभागस्याध्ययनं च कर्तुं शक्यते । तद्यथा— प्राजापत्यकाण्डव्रते प्रथमं संहितान्तर्गतस्य मन्त्रात्मकस्य प्राजापत्यकाण्डस्याध्ययनं, ततः तदनुब्राह्मणान्तर्गतस्य विधिरूपस्य प्राजापत्यकाण्डस्याध्ययनं च सुकरमनुष्ठातुम् । तदेवं काण्डव्रताचरणपूर्वकं वेदाध्ययनं काण्डविभागोपहिते आर्षेयपाठक्रमे एव सम्भवति, न तु प्रचलितसारस्वतपाठे इति प्रपञ्चितं पुरस्तात् । तस्मात् प्राजापत्यादिकाण्डक्रमेण संहिताब्राह्मणग्रन्थविभागेन मन्त्रब्राह्मयोः साहित्येन वा विभागेन वा यथासौकर्यं यथेष्टं वा तैत्तिरीयशाखायां वेदोऽध्येतव्य इति सिद्धम् ।

"ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्यां श्रेयोऽधिगच्छति" इति ऋग्वेद-परिभाषा-सूत्रात् वेदमन्त्राणां 'ब्राह्मणं कल्पः, ऋषिः-मन्त्रद्रष्टा, छन्दः-गायत्र्यादिकवितानिबन्धनं, दैवतं-मन्त्राधिष्ठात्री देवता, चेत्येतत्सर्वं ज्ञात्वैव अध्यापनादिकं कार्यमित्युक्तं भवति । तत्र प्रथमं आर्षेयमेव विमृश्यते ।

ऋष्यादिविचारः

'ऋषिः' मन्त्रद्रष्टा मन्त्राणां प्रापक इत्यर्थः । 'ऋषिर्विप्रः काव्येन' इति मन्त्रवर्णात् । 'ऋषिर्दर्शनात्' इति यास्कनिरुक्तेश्च । 'अनन्ता वै वेदाः' इति वचनाद् यद्यपि असङ्ख्याताः वेदाः वेदमान्त्राश्च भवेयुः तथापि तत्प्रापकं द्रष्टारमृषिं विना तल्लाभः असम्भव एव । यथा च लोके गुरुंविना मन्त्रो नोपलभ्यते । तस्मान्मन्त्रादपि मन्त्रोपदेष्टा गुरुरेवा-

स्माकं प्रथमः तन्मन्त्रप्रापकत्वाद्गुरोः। यथा च परोक्षस्य परब्रह्मणः देवतादेरपि प्रत्यक्षब्रह्मरूपो मन्त्रः प्रधानः, तस्य तत्परोक्षवस्तुप्रापकत्वात्। तथैव प्रत्यक्षब्रह्मरूपात् मन्त्रादपि तत्प्रापकः ऋषिरेव प्रधानः, तस्य मन्त्र– तद्देवतादिप्रापकत्वात्। अत एव 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजते' इति आर्षेयस्य प्राथम्यमनुश्रुतम्। तदपि ऋषिमुखेनैव सर्वेषां मन्त्राणामुपलब्धेः 'यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।' इति मन्त्रवर्णात्। (ऋ० १०।७१।३)

गायत्रीप्रभृतीनामृचां विश्वामित्रादयः ऋषयः, गायत्र्यादीनि च्छन्दाँसि, सवित्राद्याः देवताश्च ऋग्वेदे प्रसिद्धाः, यजुर्वेदेऽपि ऋचां त एव ऋषयः, तान्येव च्छन्दाँसि, ता एव देवताश्च भवन्ति। 'गायत्र्या गायत्री च्छन्दो विश्वामित्र ऋषिः सविता देवता' (नारा० उ० १९।३५) इति श्रुतेः।

यजुर्मन्त्राणां तु 'प्रजापतिः सोमः अग्निः विश्वे देवाः स्वयम्भूश्चेति' पञ्च ऋषयो भवन्ति। कथमेतदुच्यते यजुर्वेदे आग्नेयाद्यार्षेयकाण्डे पठितानामपि ऋचां अग्न्यादिमृषिमन्तरा ऋग्वेदस्था एव ऋषय इति। ऋचामपि क्वचिद्यजुःशब्देन निर्देशो भवति। 'पुनातु ते परिस्रुतमिति यजुषा पुनाति व्यावृत्त्यै' इति। (तै० ब्रा० १।८।५)

क्वचित्पाठभेदोऽपि दृश्यते—

'मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित् त्वा हवामहे,' इति (ऋ० १।११४।८)। 'मा नस्तोके० आयुषि०। वीरान् नमसा विधेम ते।' तैत्तिरीय रुद्राध्याये (तै० सं० ४,५,१०,३) 'मा नस्तोके०। मा नो वीरान् रुद्र भामिनो वधीः०। (वा० य० १६,१६) एवं पाठभेदात् भिन्नार्षेयमेवेदं पृथक् श्रुतमिति गम्यते। अथ यद्युच्येत मन्त्रावयवभूतानां शब्दानां क्वचिद् भेदेऽपि तदर्थाभेदात् मन्त्रैकत्वेन ऋष्येकत्वमेवेति। तद्यथा 'मा नस्तोके' इत्यत्र 'आयौ' इत्युकारान्तायुशब्दस्य स्थाने 'आयुषि' इति सकारान्तस्यायुःशब्दस्य पाठो दृष्टः। नैतावता रूपभेदमात्रेण शब्दभेदस्तथा तदर्थभेदश्च निश्चेतुं शक्यः।

एवं ऋग्वेदे 'हन्तारं भङ्गुरावतः' इत्यत्र यजुर्वेदे 'भेत्तारं' इति पाठे शब्दभेदेऽपि नार्थभेदः। अथवा क्वचित् वाक्यार्थभेदेऽपि नाभिप्रायभेदः। तथा ऋग्वेदे 'सदमित् त्वा हवामहे' इत्यस्य स्थाने कृष्णयजुर्वेदे 'नमसा विधेम ते' इति पाठभेदः। शुक्लयजुर्वेदे तु 'मा नो वीरान् रुद्र भामिनो वधीः' इति पाठः। एवं ऋग्यजुर्वेदयोः पाठे शब्दार्थयोर्भेददर्शनात् उभयत्र पठितो मा नस्तोके इत्ययं मन्त्र एक एवेति कथं न वक्तुं शक्यम्?

अत्र शब्दार्थयोर्भेदेऽपि तदभिप्रायाभेदात् ऋक्तः अभिन्न एवायं याजुषे पठितो 'मा नस्तोके' इति मन्त्रः इत्येव युक्तम्। अथ द्रष्टृ–दर्शनादिभेदादेव हेतोः 'मा नस्तोके' इत्यादीनामृङ्मन्त्राणां यजुर्वेदे भिन्नार्षेयत्वमेव युक्तम्।

भवन्ति यजुर्वेदे भिन्नाः प्रजापत्यादयः काण्डर्षयः प्रसिद्धाः। तत्र हि 'मा नस्तोके' इति मन्त्रस्याग्नेः काण्डर्षेर्दर्शनम्। स्यादेतदेवम्–यदि यजुर्वेदे वेदान्तरेऽपि वा तादृशं पृथग्दर्शनं भवेत्। न तु तदस्ति। अन्यत्र ऋग्वेदे दृष्टानां 'मा नस्तोके' इत्यादीनामृङ्मन्त्राणां याजुषेषु मन्त्रभागेषु तत्र तत्र कर्मानुष्ठानाद्युपयोगार्थं संग्रहणमेव न तु पृथग्दर्शनम्। दृश्यते हि अत्र यजुर्वेदे दर्शपूर्णमासादियज्ञीयकर्मानुष्ठानक्रमेण तथा याज्यापुरोऽनुवाक्यादिविशिष्टकर्मानुरोधेनैव विनियोजयितव्यानां ऋग्वेदे भिन्नभिन्नस्थानेषु अनेकैरन्यैर्ऋषिभिर्दृष्टानामनेकेषामृङ्मन्त्राणामेकत्र प्रकरणशः संग्रहणम्। तदेतत् दिग्दर्शनार्थं किञ्चिदेवोदाह्रियते– तद्यथा 'इषे त्वा' इति प्रश्ने चतुर्दशेऽनुवाके सप्तसु काम्येष्टिषु याज्यापुरोऽनुवाक्ययोरेवोपयोजितव्याः चतुर्दशर्चः अनुक्रमेण पठिताः 'उभा वामिन्द्राग्नी' इत्याद्याः ऋचः। तासां भिन्नाः ऋषयः ऋग्वेदे प्रसिद्धाः तस्मादेतासामृचामग्न्यार्षेयकाण्डे, पाठेऽपि नात्र पृथग्दर्शनमभ्युपगन्तुं शक्यम्। तदेतत् शुक्लयजुर्वेदीयकातीयसर्वानुक्रमसूत्रात् स्पष्टं भवति।

तत्र हि शुक्लयजुर्वेदे षोडशतमे रुद्राध्याये पठिता 'मा नस्तोके' इत्येषा ऋक् 'मा नो वीरान् रुद्र भामिनो वधीः' इति व्यस्तसमस्तपाठेन सहितापि ऋग्वेदस्थायाः कुत्सदृष्टायाः अभिन्नैवेति गम्यते 'मा नो द्वे कुत्सः' (शु० स० सू० ३।३१)

इति सूत्रात् । ' मा नस्तोके, मा नो महान्तं ' इति द्वे ऋचौ कुत्सदृष्टे इत्यर्थः । तत्सामान्यात् इह कृष्णयजुर्वेदेऽपि ' मा नस्तोके ' इति मन्त्रस्य कुत्सदर्शनत्वमिश्रयात्, न वेदभेदेन दर्शनभेदः, नापि मन्त्रभेदः इति सिध्यति । अतः ऋषिरपि एक एव ।

अथ यद्युच्येत शुक्लयजुर्वेदे तथा भवतु नाम, तथैव कृष्णयजुर्वेदेऽपि भवितव्यमिति को नियमः ? तस्मादत्र कृष्णयजुर्वेदे प्रजापतिप्रभृतीनां काण्डर्षीणां दर्शनात्, तत्रापि आग्नेयकाण्डे रुद्राध्यायस्य ' अग्निः काण्डर्षिः ' इति अग्न्यार्षेयत्वेन निर्देशाच्च, पृथग् दर्शनमेवेदं मा नस्तोके इति मन्त्रस्य । तस्मात् अग्निरेव ऋषिः न कुत्सः इति वक्तव्यम् । स्यादेतदेवम्- यदि प्रजापतिप्रभृतीनां काण्डर्षीणां ऋङ्मन्त्रद्रष्टृत्वं स्यात्, किं तर्हि ? मन्त्रस्मर्तृत्वमेवेति ब्रूमः । कुत एतत् ? प्रजापतिप्रभृतीनां काण्डर्षीणां स्मरणमात्रेण काण्डसम्बन्धात् । अतः न तु तेषां काण्डर्षीणां मन्त्रद्रष्टृत्वं सम्भवति, येन याजुषे दर्शनभेदात् ऋचां मन्त्रभेदस्वीकरणमापद्येत । कुत एतदुक्तम् ? प्रजापतिप्रभृतीनां काण्डर्षीणां मन्त्रस्मर्तृत्वमेव न तु मन्त्रद्रष्टृत्वमिति उच्यते- ' ऋषयो मन्त्रद्रष्टारः स्मर्तारः पारमेष्ठ्यादयः ' इति शुक्लयजुर्वेदकातीयसर्वानुक्रमसूत्रात् ।

तस्यायमर्थः- अत्र शुक्लयजुर्वेदे पठितानां मन्त्राणां द्रष्टारः प्रसिद्धा ऋषयः एव । तथा प्राजापत्यादिकाण्डेषु तत्तदार्षेयत्वेन निर्दिष्टाः प्राजापत्यादयस्तु ऋषिदृष्टानां मन्त्राणां स्मर्तार एव न तु द्रष्टार इति । एतेन येषां मन्त्राणां द्रष्टारः ऋषयोऽन्यत्र प्रसिद्धाः तेषामत्रापि त एव ऋषयो भवन्ति । येषां तु द्रष्टारोऽन्यत्राप्रसिद्धाः तेषां अत्रत्यकाण्डमर्यादोक्तं प्रजापत्याद्यार्षेयत्वमेवेत्यर्थास्सम्पद्यते ।

अत एव शुक्लयजुःसर्वानुक्रमसूत्रम्- ' रौद्रोऽध्यायः परमेष्ठिन आर्षम्, देवानां वा प्रजापतेर्वा, आद्योऽनुवाकः षोडशर्चः । एकरुद्रदैवत्यः, प्रथमा गायत्री तिस्रोऽनुष्टुभस्तिस्रः पङ्क्तयः सप्तानुष्टुभो द्वे जगत्यौ, मा नो द्वे कुत्सः ' इति पारमेष्ठ्यार्षेये रुद्राध्याये बहूनामृग्यजुर्मन्त्राणां मध्ये पठितस्य ' मा नो महान्तं, मा नस्तोके ' इति ऋग्द्वयस्य कुत्सार्षेयत्वं, तच्च ऋग्वेदे प्रसिद्धमेवानूदितमिति वेदितव्यम् ।

ऋग्वेदे तावत् ' इमं षोळश कुत्सः ' इति सर्वानुक्रमसूत्रेऽनुवृत्तं कुत्सदर्शनम् । ' इमा एकादश रौद्रं ' इत्यस्मिन् सूक्ते ' मा नः ' इति द्वयोः कुत्सार्षेयत्वं प्रसिद्धम् । अत्र प्रजापतिप्रभृतीनां काण्डर्षीणां यजुर्मन्त्रद्रष्टृत्वेऽपि वेदान्तरे प्रसिद्धानामृचां तु स्मर्तृत्वेनैव सम्बन्ध इति श्लिष्यति । एतेन कृष्णयजुर्वेदेऽपि तत्सामान्यात् ' मा नः ' इति द्वयोः कुत्सार्षेयत्वमेवेति सिद्धम् ।

ननूक्तं अन्यत्र दृष्टं निदर्शनमितरत्रापि प्रमाणं भवितुं नार्हतीति । तस्मात् ऋचामपि यजुर्मन्त्रगणमध्ये पाठात् यजुर्वेदे तत्रत्यप्रजापत्यादिकाण्डार्षेयत्वमेव युक्तं प्रधानं च तदेव यजुःशाखिनामिति केचित् । वस्तुतस्तु- ऋग्वेदस्थानां सर्वासामपि ऋचां तैत्तिरीयकेऽपि ऋग्वेदे दर्शिता एव ऋषयः इत्यस्मिन्नर्थे तैत्तिरीब्राह्मणवचनमेव प्रमाणम् ।

तथाहि- ऋग्वेदे एकेनैव ऋषिणा दृष्टानामेकदेवताकैकसूक्तान्तर्गतानां क्वचित् अनेकदेवताकानां अनेकसूक्तान्तर्गतानां च शतशः ऋचां मध्ये पठिता काचिदेकैव ऋक्, द्वित्राः त्रिचतुरा वा ऋचः, वेदान्तरे पठिता अपि ऋग्वेदस्था एव भवितुमर्हन्ति ।

तद्यथा- ऋग्वेदे (मं० १। अनु० ६। सू० १-७) सप्तसूक्तात्मके षष्ठेऽनुवाके ' कस्य नूनं ' इत्यारभ्य ' अग्नेरयिं निधारय ' इत्यन्तं प्रजापति-अग्नि-सवितृ-वरुण-विश्वेदेव-इन्द्र-अश्विनी-उषोदेवताकाः अन्यूनशतसङ्ख्याकाः ऋचः पठिताः। तस्यानुवाकस्य शुनःशेपो द्रष्टा ' कस्य पञ्चोनाऽऽजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः ' इति सर्वानुक्रमसूत्रात् ।

' तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानम् ' इति च ब्राह्मणम् (ऐ० ब्रा० पं० ७)

आलम्बनार्थं यज्ञीये यूपे निबद्धः शुनःशेपः तद्बन्धविमोकार्थं देवतास्तुतौ प्रवृत्तः सन् सवित्रा प्रेरितः वरुणप्रसादार्थं एकत्रिंशदृग्भिः वरुणं तुष्टाव 'स वरुणं राजानमुपससारोत्तराभिरेकत्रिंशता' इति च ब्राह्मणम् । ताश्च 'नहि ते क्षत्रं' (ऋ० १।२४।६) इत्याद्याः सूक्तशेषभूताः दशर्चः, तथा ' यच्चिद्धि ते विशो यथा ' (ऋ० १।२५।१-२१) इत्येकविंशत्यृचं सूक्तं च एवं ३१ ऋचो वरुणदेवताकाः शुनःशेपेन दृष्टाः। तासु च शतशः ऋक्षु ' अभि त्वा देव सवितः, उरुं हि

*

राजा, शतं ते राजन्, अमी य ऋक्षाः, अव ते हेडः, उदुत्तमं मुमुग्धि नः, उदुत्तमं वरुण पाशमस्मत्, इमं मे वरुण, तत्त्वा यामि, निषसाद धृतव्रतः, इममूषु त्वमस्मभ्यं, यमग्ने पृत्सु मर्त्यं, शिप्रिन्वाजानां पते, योगेयोगे तवस्तरं, रेवतीर्नः सधमादः ' इत्येताः ऋचः तैत्तिरीयसंहितायां पठिताः। एवं ऋग्वेदे शुनःशेपदृष्टानां एतासामृचां अन्यत्र पाठमात्रेण कथं अन्यार्षेयत्वमुपपद्येत ?

अथ पाठबलादेव अग्न्यादिभिः काण्डर्षिभिर्दृष्टेति कल्पयितुं शक्यते इति चेत्, शक्यमेवं कल्पयितुं तथापि न युक्तं, कुतः ? शुनःशेपो यमह्वद् गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ' इति (ऋ० १।२४।१२) शुनःशेपस्यैव वरुणपाशमोचनस्तुतेः। न हि खलु प्रजापत्यादीनां काण्डर्षीणां वरुणपाशबन्धनं कुत्रचित्प्रसिद्धं लोके, नापि श्रुतं, येन वरुणपाशविमोकार्थं प्रजापत्यादिकर्तृकया वरुणस्तुत्या प्रजापतेः काण्डर्षेरेव तदिदं दर्शनमिति कल्प्येत।

अथ यद्युच्येत- शुनःशेपबन्धमोचको वरुणोऽस्मानपि मोचयतु इति परोक्षतया वरुणमहात्म्यस्तुत्यभिप्रायं तदिदं काण्डर्षीणामेव दर्शनं भवितुमर्हतीति। यथा अन्यत्रापि ' शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः। एवास्मदग्ने वि मुमुग्धि पाशान्० । इति (ऋ० ५।२।७) कुमारस्यात्रेयस्य तद्दर्शनममिमाहात्म्यस्तुत्यभिप्रायम्।

यथा च लोकेऽपि दाशरथिना महाराजेन सेवितो भगवान् वसिष्ठोऽस्मानज्ञानात्तारयत्विति वसिष्ठस्तुतिर्दाशरथेरन्यकर्तृकाऽपि भवितुमर्हति। एवमत्रापि अग्न्यादिकाण्डर्षिदृष्टा वरुणस्तुतिरपि ' [illegible]नःशेपो यमह्वद् गृभीतः ' इति शुनःशेप शब्दमात्रेण शुनःशेपकर्तृकैवेति निर्णायको न कश्चिन्नियमोऽस्ति। अन्य[illegible] ईदृशं दर्शनं बहुधोपलभ्यते वेदे। ' गृणाना जमदग्निना योनावृतस्य सीदतम् ' इति विश्वामित्रदर्शने जमदग्निना गृणानौ हे आश्विनौ अत्र सीदतमिति जमदग्निसंस्तुताश्विनदेवतामाहात्म्यस्तुतिर्विश्वामित्रकर्तृका दृष्टा।

तथैव ' तत्त्वा यामि ' इत्याद्याः ऋचोऽपि अग्न्यादिकाण्डर्षीणामेव दर्शनं यजुर्वेदे भवितुमर्हतीति याजुषाणां मतम्। नैवमेतत्- अत्र कृष्णयजुर्वेदे एव तैत्तिरीयसंहिताग्रन्थे ब्राह्मणे एतासामृचां शुनःशेप एव द्रष्टेत्यनुश्रावितत्वात्। तथाहि ' शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात्, स एतां वारुणीमपश्यत्, तया वै स आत्मानं वरुणपाशादमुञ्चत्, वरुणो वा एतं गृह्णाति, य उखां प्रतिमुञ्चते, उदुत्तमं वरुणपाशमस्मादित्याह आत्मानमेवैतया वरुणपाशान्मुञ्चति '। इति (तै० सं० ५।२।१।४)

अत्र ' उदुत्तमं वरुणपाशमस्मत् ' (तै० सं० ४।२।१।१०) इत्येषा ऋक् शुनःशेपदृष्टैवेति स्पष्टम्। एतेन ' उदुत्तमं वरुण ' इति ऋक् शुनःशेपदृष्टैवेति निश्चिते एतत्सहचरीणां ' अव ते हेडः, इमं मे वरुण, तत्त्वा यामि ' इत्येवमाद्यानामृचां ऋग्वेदे श्रुतं शुनःशेपार्षेयत्वं केन वार्यते ? यदि ' इमं मे वरुण ' इत्याद्यानामृचामत्र यजुर्वेदेऽपि शुनःशेपार्षेयत्वमेवाभविष्यत् तर्हि तासामत्रापि एकत्रैव पाठोऽप्यभविष्यत्। दृश्यते च पृथक् काण्डे तासां पाठः ' उरुꣳ हि राजा, शतं ते राजन् ' इत्यनयोः सौम्यकाण्डे पाठः।, (तै० सं० १।४।४५।१)

तत्रापि ' अवभृथ यजूꣳषि जुहोति ' इति अवभृथप्रकरणे तयोः पाठात् अवभृथयजुषां सौम्यकाण्डेऽन्तर्भावाच्च सोम एव तयोः काण्डर्षिः। ' आध्वर्यवं० अवभृथ यजूꣳषि वाजपेयः शुक्रियाणि सवाः ' इति सब्राह्मणानि सानुब्राह्मणानि सौम्यानि इति बौधायनसूत्रात्। एवं ' अव ते हेड, उदुत्तमं, इमं मे वरुण, तत्त्वा यामि, त्वं नो अग्ने, स त्वं नो अग्ने, ' इत्याद्यानामृचां तु वैश्वदेवकाण्डे याज्यायां पाठो दृष्टः। ' राजसूयः० याज्या अश्वमेधः० इति वैश्वदेवानि ' इति बौधायने सूत्रात्।

अत्रैते भिन्ना एव काण्डर्षयः सोमविश्वेदेवादयः, तस्मात् तासामृचां भिन्नार्षेयत्वमेव वक्तव्यम्। इति चेत् नैवं सम्भवति - तासामृचां तत्र तत्र कर्मणि विनियोगार्थं अनुकर्षणात्। उदाहृतं च तासामनुकर्षणं याज्यावभृथादिषु। एवं एकदा पठितानां चैतासामृचामुत्तरत्र तत्र तत्र विनियोगानुसारेण ऋक्प्रतीकमात्रपाठेनानुकर्षणं बहुधा दृश्यते, ' अव ते हेड, उदुत्तमं, इमं मे वरुण, तत्त्वा यामि ' इत्यादि। न चैतदपि काण्डर्षीणां तादृशं प्रतीकमात्रदर्शनमिति वक्तुं युक्तम्। पृथग् दर्शने समग्रा ऋचो दृश्येरन्, न प्रतीकमात्रम्। अत्र प्रतीकमात्रपाठे पूर्वत्र पठितायामेवानुवाद इत्यवश्यमभ्युपगन्तव्यं

भवेत् । तथा सति यजुर्वेदग्रन्थे ऋचां प्रथमपाठोऽपि तर्हि ऋग्वेदे अन्यैर्ऋषिभिर्दृष्टानां तासां हौत्रकर्मणि विनियोगाय पठनानुकूलार्थः अनुवाद एवेति कथं नाभ्युपगम्येत ?

अथ पुनः यजुर्वेदेऽपि एकदा पठिताः सम्पूर्णा एव काश्चिदृचः पुनरुत्तरत्रापि असकृत्वः पठिता दृश्यन्ते 'अग्न आयूंषि पवसे' इत्याद्याः । तासां पृथग्दर्शनमेवेति वक्तव्यम् । पृथग्दर्शनत्वे पृथगार्षेयत्वं च अर्थात् सेत्स्यतीति । नैवमेतद् यत्र एकदा पूर्वत्र पठिताः सत्यः उत्तरत्र पुनः कर्मणि विनियोगे अविच्छेदेन द्वे ऋचौ, त्रिचतुरा वा ऋचः, द्वन्द्वेन दर्शयितव्या भवेयुः, तत्रैव प्रतीकमात्रपाठो दृश्यते ।

यत्र एकैव ऋक् पूर्वत्र पठिता सती पुनरुत्तरत्र एकैव विनियुज्यते, तत्र तु समग्रैव ऋक् पठ्यते, इत्येव विशेषः। तद्यथा 'आ प्यायस्व समेतु ते० । सं ते पयांसि' इतीदमृग्द्वयं पूर्वत्र (तै० सं० ४।२।७।१२–१३) याज्यायां समग्र ऋग्रूपेण पठितं, तथा उत्तरत्रापि याज्यायां (तै० सं २।३।१४।१२-१३;३।१।११।३-४) असकृत् 'आ प्यायस्व। सं ते' इति प्रतीकमात्रेण पठितमपि उत्तरत्र विनियोगावसरे 'आ प्यायस्व' (तै० सं० ३।२।५।८) इतीयमेकैव ऋक्समग्रैव पठिता दृश्यते । अत्र पूर्वापरीभावः आर्षेयपाठक्रमेणैव ज्ञेयः, शाखतः ब्राह्मणे कल्पसूत्रे च तथैव याज्यादिविनियोगात्, न तु सारस्वतपाठक्रमेण सम्प्रति प्रचलिते प्रसिद्धे तैत्तिरीयसंहितादिग्रन्थे पूर्वापरीभावनियमोऽस्ति ।

तत्र हि (तै. सं. २।३।१४।१२-१३) 'आ प्यायस्व । सं ते' इति प्रथमतः एव प्रतीकमात्रपाठः, ततः उत्तरत्र (तै० सं० ४।२।७।१२-१३) समग्र ऋक्पाठो विद्यते। तदेतदपि सारस्वतपाठे ग्रन्थव्यत्यासबोधकं लिङ्गम् । क्रमशः संहितादिग्रन्थाध्ययने प्रवृत्ताः बटवः प्रथमत एव प्रतीकमात्रपाठेन समग्रामृचं पठितुं ज्ञातुं च कथं शक्नुयुरिति चिन्त्यमेवैतत् । तस्मादस्य पृथग्दर्शनत्वनिर्णये न किञ्चित्प्रमाणान्तरमस्ति । एवमेव शुनःशेपदृष्टानां तथा सर्वासामपि ऋचां न पृथग्दर्शनं, न पृथगार्षेयं च, याजुषे भवितुमर्हति । एतेन ऋग्वेदे वेदान्तरे वा प्रसिद्धानामृचां यजुर्वेदे समग्र ऋक्पाठोऽपि न पृथग्दर्शनत्वसाधकः नापि पृथगार्षेयत्वसाधकश्च भवितुमर्हतीत्युक्तं भवति ।

अपि च वरुणपाशेन बद्धः शुनःशेपः 'स एतां वारुणीमपश्यत्, तया वै स आत्मानं वरुणपाशादमुञ्चत्' इति तैत्तिरीयके श्रुतया 'उदुत्तमं वरुण पाशमस्मत्' इत्येनया एकयैव ऋचा न खलु वरुणपाशान्मुक्तः, येन साक्षात् श्रवणात् 'उदुत्तमं' इयमेकैव ऋक् शुनःशेपदृष्टा, तथा श्रुतौ अनिर्देशात् 'इमं मे वरुण' इत्याद्या अत्र अन्यार्षेया इति च कल्प्येत । अपि तु शतशः ऋचां स्तोत्रेण मुक्तः शुनःशेप इति श्रूयते । तथा हि हरिश्चन्द्रेण वरुणप्रीत्यर्थमनुष्ठिते नरयज्ञे आलम्बनार्थं यूपे निबद्धः शुनःशेपः तस्मान्मृत्युमुखादात्मानं मोचयितुं प्रवृत्तः सन् 'अथ ह शुनःशेप ईक्षांचक्रे अमानुषमिव वै मा विशसिष्यन्ति हन्ताहं देवता उपधावामीति' (ऐ० ब्रा० ७।१६) इति वाग्यज्ञेन देवतोपासांचक्रे । तत्र 'स प्रजापतिमेव प्रथमं देवतानामुपससार, कस्य नूनं कतमस्यामृतानामित्येतयर्चा' इति प्रथमतः प्रजापतिं तुष्टाव, ततश्च तेनाज्ञप्तः तथैवोत्तरत्र 'अग्निः सविता वरुणः पुनरग्निः विश्वे देवाः इन्द्रः अश्विनौ' इत्यासां देवतानां स्तोत्रेण तत्तद्देवताभिराज्ञप्तश्च अन्ते उषसः स्तोत्रेण वरुणपाशान्मुक्तः । एवं शतशः ऋग्भिः स्तोत्रेण शुनःशेपो वरुणपाशान्मुक्तः ।

अत्र यद्यपि तैत्तिरीयके 'स एतां वारुणीमपश्यत्, उदुत्तमं वरुण पाशमस्मदित्याह' इति एकैव ऋक् शुनःशेपेन दृष्टेति श्रूयते, अन्याः 'नहि ते क्षत्रं' इत्याद्याः शुनःशेपार्षेयत्वेन स्पष्टं न श्रूयन्ते, तथापि तैत्तिरीयब्राह्मणवचनादेव तासां शतशः ऋचां शुनःशेपार्षेयत्वं सिध्यति। 'शौनःशेपमाख्यापयते, वरुणपाशादेवैनं मुञ्चति, परः शतं भवति' इति (तै० ब्रा० १।७।१०) एवं तैत्तिरीयके श्रुतानां 'नहि ते क्षत्रं' इत्याद्यानामपि सर्वासां ऋचां यजुर्वेदेऽपि शुनःशेपार्षेयत्वमेवेति सिद्धम् ।

एतासामृचां शुनःशेपार्षेयत्वं शुक्लयजुर्वेदेऽपि अनूदितम्—

'उरुंहि राजा' (वा० य० सं० ८।२३) ... ... 'उरुंहि' शुनःशेपो वारुणीं त्रिष्टुभम् ।

'नि षसाद' (वा० य० १०।२७) ... ... 'नि षसाद' शुनःशेपो वारुणीं गायत्रीम् ।

' योगेयोगे '	(वा० य० ११।१४)	' योगेयोगे ' शुनःशेपः ।
' उदुत्तमं वरुण० '	(वा० य० १२।१२)	' उदुत्तमं ' शुनःशेपो वारुणीं त्रिष्टुभम् ।
' तत्त्वा यामि० '	(वा० य० १८।४९)	' तत्त्वा ' वारुणीं त्रिष्टुभं शुनःशेपः ।

' इमं मे वरुण, तत्त्वा यामि० ' इमं मे गायत्रीत्रिष्टुभौ वारुण्यौ शुनःशेपः । इति (शु० य० का० स० सूत्राणि) ऋग्वेदे अप्रसिद्धापि शुनःशेपदृष्टा एका ऋग् दृश्यते । ' अपाघमपकिल्बिषम्० ' (वा० य० ३५।११) अपाघं लिङ्गोक्तदेवतामानुष्टुभं शुनःशेपः । (का० स० सूत्रम्) कथं तर्हि ' पुनातु ते परिस्रुतमिति यजुषा पुनाति व्यावृत्त्यै (तै० ब्रा० १।८।५) इति ऋचोऽपि यजुःशब्देन निर्देशः ' पुनातु ते ' इति यजुर्वेदपाठादराभिप्रायकः एव । एवं वेदान्तरे दृष्टाः ऋचो वेदान्तरे पठिता अपि स्वकीयैरार्षेयच्छन्दोदैवतैर्न हीयन्ते ।

अस्मिन्नर्थे ' अयꣳसो अग्निर्यस्मिन् ' इत्यादीन्यप्युदाहर्तव्यानि ऋग्वेदे (मं० ३।२२।१) पठितस्य पञ्चर्चस्य सूक्तस्य ' अयꣳसो अग्निरिति ' विश्वामित्रस्य सूक्तं भवति । (तै० सं० ५।२।३।८) विश्वामित्रार्षेयत्वमनुश्रूयते । तच्च विश्वामित्रसम्बन्धाभिप्रायं वैश्वामित्रमण्डलान्तर्गतत्वात् । वैश्वामित्रीयाभिप्रायं वेति ज्ञेयम् ।

ऋग्वेदे ' अयं स उपान्त्यानुष्टुप्पुरीष्येभ्योऽग्निभ्यः ' इति सर्वानुक्रमसूत्रे । ' अग्निं होतारं गाथी ह ' इति सूत्रात् ' अग्निं होतारं प्रवृणे मियेधे ' इति सूक्तादनुवृत्तः चतुर्णां सूक्तानां गाथी ऋषिः, न तु विश्वामित्रः । तथापि विश्वामित्रसम्बन्धाद् विश्वामित्रार्षेयत्वं श्रुत्यानुश्रावितमिति प्रतीयते । एवं ' दिवस्परि प्रथमं जज्ञे अग्निः ' इत्यस्य सूक्तस्य (ऋ० १०।४५।१, तै० सं० ४।२।२।१) 'दिवस्परि द्वादश वत्सप्रिराग्नेयं तु' इति सर्वानुक्रमसूत्रोक्तवत्सप्रेरार्षेयत्वं यजुर्वेदेऽपि अनुश्रूयते । ' वात्सप्रेणोप तिष्ठते एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्ध ' इति स्पष्टम् । (तै० सं० ५।२।१) तथैव ' आऽयं गौः पृश्निरक्रमीत् ' इति तृचस्य सूक्तस्य (ऋ० १०।१८९।१; तै० सं० १।५।३।२) ' आयं गौः सार्पराज्ञ्यात्मदैवतम् ' इति सूत्रदर्शितं तैत्तिरीयकेऽनुश्रूयते । ' सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधाति ' इति (तै० सं० १।५।४।२) एवमेव यजुर्वेदे पठितानां अपठितानामपि सूक्तानां ऋग्वेदीयार्षेयानुश्रवणपूर्वकं विनियोगः श्रूयते ।

' सजनीयꣳ शस्यं विहव्यꣳ शस्यं आगस्त्यस्य कयाशुभीयं शस्यं ' इति । (तै० सं० ७।५।५।६) सजनीयम्-' स जनास इन्द्रः ' इति ऋगन्तिमपादैकदेशोपहितं, ' यो जात एव प्रथमो मनस्वान् ' इति (ऋ० २।१२।१–१४) गृत्समदार्षेयं पञ्चदशर्चं सूक्तम् । ' विहव्यम्- ममाग्ने वर्चो विहवेष्वस्तु० ' इति (ऋ० १०।१२८।१–९), (तै० सं० ४।७।१४।१–९) नवर्चं विहव्यार्षेयं सूक्तम् । ' ममाग्ने नव विहव्यः ' इति सर्वानुक्रमसूत्रम् । ' अगस्त्यस्य कया शुभीयम् ' ' कया शुभा सवयसः सनीळाः' इति सूक्तं अगस्त्यार्षेयम् । (ऋ० १।१६५।१–१५) ' कया पञ्चोना संवादोऽगस्त्येन्द्रमरुताम् ' इति सर्वानुक्रमसूत्रम् ।

अतएव शुक्लयजुर्वेदे कातीये सर्वानुक्रमसूत्रे शुक्लयजुर्वेदान्तर्गतानां सर्वासामपि ऋचां तत्रतत्र प्रकरणशः पाठक्रमानुसारेण काण्डर्षीणां सामान्यतो निर्देशेन, ऋचामेव ऋग्वेदे प्रसिद्धाः मन्त्रद्रष्टारः ऋषय एव विशेषतो दर्शिताः । ' अग्न्याधेयं प्रजापतेरार्षम् । समिधाग्नेयश्चतस्रो गायत्र्यः, समिधा विरूप आङ्गिरसः, सुसमिद्धाय वसुश्रुतः, तन्त्वा भरद्वाजः ' इत्यादि । समिधाग्निं- ' इमे त्रयस्त्रिंशद्विरूप आङ्गिरस आग्नेयं तु समिधाग्निं त्रिंशत् । इति (ऋ० सर्वानुक्रमसूत्रम्) सुसमिद्धाय शोचिषे- ' त्वमग्ने वसुश्रुतः त्वामग्न एकादश सुसमिद्धायाद्यं गायत्रम् । इति दिग्दर्शनार्थं किञ्चिदेवोपन्यस्तं । आर्षेयपाठक्रमे सर्वं संशोध्यते ।

एवं च सति अस्माकं द्विजत्वसिद्धये उपनयनसंस्कारे ब्रह्मोपदेशरूपेण सर्ववेदाधिकारार्थं प्रथमतः उपदृश्यः गायत्रीमन्त्रोऽपि ऋगात्मकः विश्वामित्रार्षेयः 'गायत्र्या गायत्रीच्छन्दो विश्वामित्रऋषिः सवितादेवता' इतिश्रुतेः । (ना०उ० १९।३५) तथा च सर्वानुक्रमसूत्रम् ' कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्यं चचार, तस्येन्द्र एव गाथी पुत्रो जज्ञे, गाथिनो विश्वामित्रः, स तृतीयं मण्डलमपश्यत् ' इति तृतीयमण्डलस्य विश्वामित्रार्षेयत्वात्, गायत्र्याश्च तत्रैव पाठदर्शनात् । ' तत्स

वितुर्वरेण्यम् ' (ऋ० ३।६२।१०; साम० १४६२; वा० य० ३,३५; तै० सं० १।५।६।१२)

एवं वेदमन्त्राणां यातयामतानिवारणार्थं तदार्षेयं यथाशास्त्रं विज्ञेयमिति सङ्क्षेपः ।

छन्दो विचारः ।

' छन्द ' एव वेदमन्त्राणां स्वरूपं प्रधानं लक्षणं च । छन्दसैव मन्त्राणां मन्त्रत्वं प्रतिष्ठितम् । छन्दसैव ऋक्त्वं यजुष्ट्वं सामत्वं च सिद्धम् । छन्दोनिबन्धनमन्तरा मन्त्र एव न भवति । मन्त्राणामेव मुख्यं वेदत्वं वस्तुतत्त्वसिद्धम् । तस्माद्वेदमन्त्र-स्वरूपज्ञाने छन्दोज्ञानमेव प्रधानम् । अत एव ' गायत्र्या गायत्रीच्छन्दो विश्वामित्र ऋषिः सविता देवता ' इत्यत्र (वा० उ० १९।३५) छन्द एव प्राथम्येन निर्दिष्टम् । तस्मात् ऋषिदैवतच्छन्दांऽसि ' तानि मन्त्रेमन्त्रे विद्यात् ' इति श्रुत्या-विहितं वेदमन्त्राणामयातयामतासिध्यर्थम् । ऋचां तु गायत्र्यादीनि प्रसिद्धानि । छन्दोमुखेनैव ऋचां यज्ञे विनियोगो विहितः।

' गायत्र्या ब्राह्मणमुपनयीत, त्रिष्टुभा राजन्यं, जगत्या वैश्य ' मिति, त्रैवर्णिकानां ब्राह्मणक्षत्रियवैश्यानां द्विजत्वसिद्धिः छन्दोमुखेनैव उपदिश्यते । अत एव तदेतच्छन्दस्तत्त्वविज्ञानादेवामृतत्वसिद्धिरपि मन्त्रोपदिष्टानुश्रूयते । तथा च दीर्घतमसः आर्षेयं ऋङ्मन्त्रदर्शनम् ।

' यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः । ' इति (ऋ० १।१६४।२३)

एवं सप्तच्छन्दांऽस्यनुश्रूयन्ते, तद्देवताधिष्ठितानि । ' अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव । अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥४॥ विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः । विश्वान्देवाञ्जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥५॥ इति (ऋ० १०।१३०।४-५)

एतेषां तथान्येषामपि सर्वेषां छन्दसां अधिष्ठाता उत वर्षकः प्रकाशश्च विश्वरूपः स परमैश्वर्यपूर्णः परमपुरुषः इन्द्र एव, तस्यापि छन्दोमुखेनैवाविर्भावः प्रकाशोऽनुश्रूयते ' यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु ' इति (तै० शिक्षो० ४।१) । एवं छन्दस्तत्त्वज्ञानेन मन्त्रज्ञानं, मन्त्रमुखेन ब्रह्मात्मतत्त्वज्ञानं, तेनैव चामृतत्वमिति छन्दोमुखेनैवामृतत्वसिद्धिरिति सिद्धम् ।

ऋग्वेदे तु गायत्र्यादीनि छन्दांऽसि प्रसिद्धानि । तासामृचां अन्यासां च यजुर्वेदेऽपि तान्येव छन्दांऽसि भवन्ति । तदिदं तैत्तिरीयब्राह्मणवचनेनैव गम्यते । ' गायत्र्या गायत्री छन्दः ' इति (वा० उ० १९।३५) ' गायत्रीभिरुप तिष्ठते... यदेतं तृचमन्वाह सन्तत्यै ' इति (तै० सं० १।५।८।७) अत्र गायत्री ऋचस्तु–'सम्पश्यामि प्रजा अहम् (तै० सं० १।५।६।१) उप त्वाऽग्ने दिवेदिवे ' इति च। 'देवो वः सवितोत्पुनातु०' (तै० सं० १।१।५।१) सावित्र्यर्चा, पच्छो गायत्रिया त्रिःषमृद्धत्वाय' इति (तै० ब्रा० ३।३।४) 'विश्वे देवस्य नेतुः० (तै० सं० १।२।२।६) ' ऋचा जुहोति, यज्ञस्योधृत्यै अनुष्टुभा जुहोति विश्वे देवस्य नेतुरित्याह ' इति (तै० ब्रा० ३।१।२) ' विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति ' इति (तै० सं० ५।१।९) " सꣳज्ञावभागाः स्थेषा बृहन्तः० " (तै० सं० १।१।१३।१४) " सꣳज्ञावभागाः स्थेत्याह । वैश्व-देव्यर्चा० त्रिष्टुप्भवति " (तै० ब्रा० ३।३।६) ' वाजस्य मा प्रसवेन० । ' (तै० सं० १।१।१३।१) " अथ स्रुचावनु-ष्टुब्भ्यां वाजवतीभ्यां व्यूहति " (तै० ब्रा० ३।३।९) ।

एवमेव क्वचिदतिच्छन्दसोऽपि निर्देशो भवति– " अभि त्यं देवꣳ सवितारमोण्योः० । " (तै० सं० १।२।६।२) " अभि त्यं देवꣳ सवितारमित्यतिच्छन्दसर्चा मिमीते । " इति (तै० सं० ६।१।९।९)

तदेतद्दिग्दर्शनमात्रं किञ्चिदेवोपन्यस्तम् । एवं सर्वासामपि ऋचां छन्दांऽसि विनियोगसङ्ग्रहे निर्दिष्टानि सायनभाष्ये विद्यन्ते । तानि विज्ञाय तत्रतत्र विनियोगावसरे उच्चारणीयानि । एवं ऋचां गायत्र्यादीनि छन्दांऽसि सर्वेषामप्यभिमता-न्येव । यजुर्मन्त्राणां तु अप्रसिद्धान्येव छन्दांऽसि, नापि कुत्रचिदुल्लिखितानि, ऋचामिव यजुषां छन्दो व्यवस्था नास्तीति, भावः ।

" अनियताक्षरपादानि यजूꣳषि भवन्ति " इति सूत्रेण यजुषां छन्दोनिबन्धननियमाभावात् तेषां छन्दःस्वरूप-

विज्ञानमशक्यसम्पादं छन्द एव नास्तीत्यपि केषाञ्चिदभिप्रायः । अत एव केवलं " यजुश्छन्दः " इति पठनपद्धतिर्विद्यते इति प्रतीयते । अपि च यजुषामपि छन्दोनियमसत्त्वे सूत्रभेदेन अनेकधा मन्त्रविभागेन कर्मणि विनियोगः न शास्त्रयिता-मर्हति ।

तद्यथा- " इषे त्वोर्जे त्वेत्याह, इषमेवोर्जं यजमानेऽव रुन्धे " इति ब्राह्मणोद्धृते एकस्मिन् मन्त्रप्रतीके आपस्तम्बो मन्त्र-द्वयं परिकल्प्य, तद्विनियोगं पृथगेव विदधाति । 'इषे त्वेति शाखां छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि' इति । बौधायनस्तु अत्र ब्राह्म-णानुरोधेन एकमेव मन्त्रं कल्पितवान् ' इषे त्वोर्जे त्वेति शाखां छिनत्ति ' इति । उभयमपि प्रमाणम् । उभयथाप्यनुष्ठान-पद्धतिर्विद्यते । तत्र कथं छन्दोनिर्णयो भवेत् । एवं सहस्रशः स्थानेषु विद्यते । तस्मात् यजुषां छन्दोनियम एव नास्तीति-वक्तव्यमापतति, तन्निर्णायकप्रमाणाभावात् । नूतने निर्णये तु अप्रामाण्यात् अव्यवस्थादिदोषापत्तेश्च ।

वस्तुतस्तु- यजुर्मन्त्राणामपि छन्दोनियमोऽस्त्येव, एकाक्षरमारभ्य यजुश्छन्दः प्रवृत्तम् । तथा च पिङ्गलच्छन्दःसूत्रम्- ' छन्दः । गायत्री । दैव्येकम् ' इति । अत एव ' ओं ' प्रत्येकाक्षरस्य प्रणवमन्त्रस्य याजुषं दैवी गायत्रीछन्दो निर्दिष्टम् । ' ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् । गायत्रं छन्दं परमात्मं सरूपम् । ' इति (ना० उ० १९।३३) ' प्रणवस्य ब्रह्मा, ब्रह्मा दैवी गायत्री ' इति च (आ० परिशिष्टे) ' ओमिति प्रतिपद्यते ,तद्वै यजुः ' (तै० आ० २।११) इति च प्रणवस्य यजुष्ट्वं स्पष्टमेवाम्नातम् ।

ऋचां तु ' अष्टाक्षरा गायत्री ' इति नियमः । सा च एकपदा क्वचिद् द्विपदा त्रिपदा च भवति । तथापि क्वचित् एक-स्मिन् अक्षरे अक्षरद्वये च न्यूनेऽधिके च ' निचृद् भुरिक् विराट् स्वराड् ' इति गायत्र्याः विशिष्टसंज्ञा प्रसिद्धा । एतेन ऋचामेकाक्षरा दैवी गायत्री छन्दो न भवतीति सिध्यति । तथा च ' छन्दः । गायत्री । दैव्येकम् । आसुरी पञ्चदश । प्राजापत्याऽष्टौ । यजुषां षट् । साम्नां द्विः । ऋचां त्रिः । द्वौ द्वौ साम्नां वर्धेत । त्रींस्त्रीनृचाम् । चतुरश्चतुरः प्राजापत्यायाः । एकैकं शेषे । तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः । चतुरश्चतुरः समाम्न्य एकैका ब्राह्मयः प्राग्यजुषामार्ष्य ' इति । इति पिङ्गलनागप्रणीते वेदाङ्गभूते छन्दःशास्त्रे प्रतिपादितं वैदिकं छन्दोलक्षणम् । तच्च विस्तरशः उत्तरत्र उल्लिख्यते ।

एवं ऋगादिमन्त्राणां ' ऋषिदैवतच्छन्दाँसि ' एतानि त्रीण्येवान्तरङ्गानि भवन्ति । तस्मादृष्यादिज्ञानेनैव तदुच्चारणपूर्वक-मेव वेदमन्त्रविनियोगो विहितः । अन्यथा यातयामतादोषापत्तेः । अतएव शुक्लयजुर्वेदकात्यायनसर्वानुक्रमणीसूत्रे ऋग्वेदे प्रसिद्धानामृचां तत्र दर्शितान्येव ' ऋषिदैवतच्छन्दाँसि । निर्दिष्टानि ' समिधाग्नेयश्चतस्रो गायत्र्यः । समिधा विरूप आङ्गि-रसः ' इत्यादीनि । ऋग्वेदे तु अप्रसिद्धानां केषांचिद्ग्रूपाणां यजुर्मन्त्राणामपि ऋष्यादीनि तैत्तिरीयसायनभाष्ये विनियोग-सङ्ग्रहवार्तिकमुखेन लिखितानि । तत्सर्वं विज्ञाय यथाशास्त्रमेव वेदाध्ययनादिके कृते सर्वं श्रेयस्करं भवेदिति शास्त्राभिप्रायः ।

देवताविचारः ।

' देवता ' तु मन्त्राधिष्ठात्री दिव्यवस्तुस्वरूपा सा च मन्त्रार्थरूपैवेति शास्त्रतत्त्वम् । मन्त्रार्थरूपदेवतास्वरूपज्ञानमन्तरेण प्रयुक्तो मन्त्रो निरर्थकः क्वचिदनर्थकश्च भवति । यद्यपि ' अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ' (ऋ० १।३३।९ [उत्तरार्धः]) इति मन्त्रार्थज्ञानाभावेऽपि मन्त्रशक्त्यैव फलं सेत्स्यतीत्यापाततः प्रतीयते, तथापि फलसिद्धौ शब्दशो मन्त्रार्थज्ञानेऽन्यथा सिद्धेऽपि मन्त्राधिष्ठातृदेवताध्यानं तु अत्यन्तमावश्यकमेव । तथा च मन्त्रवर्णः- ' ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ' इति (ऋ० १।१६४।३९) मन्त्राधिष्ठातृदेवताज्ञानाभावे मन्त्रप्रयोगानर्थक्यम् । तज्ज्ञाने एव सार्थक्यमित्युक्तं भवति ।

' यस्तित्याज सखिविदꣳ सखायं । न तस्य वाच्यपि भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति । न हि प्रवेद सुकृतस्य पन्थाम् ' इति । (तै० आ० १।३।१) अत एव ' यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्त्साक्षादेव तद्देवतां प्रीणाति प्रत्यक्षाद्देवतां यजति ' (ऐ० ब्रा० ३।८) इति सर्वेष्वपि यज्ञीयकर्मसु हवनादिषु मन्त्राणां विनियोगे तत्तन्मन्त्र-देवताध्यानं विहितं, तच्च ज्ञानमन्तरा न सम्भवति, अन्यथाऽनर्थोऽपि श्रूयते- ' प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेद-विद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यति ' इति (छां० उ० १।१०।१।९)

कथं देवता मन्त्रार्थरूपा भवितुमर्हति ? मन्त्रार्थस्तु कश्चिदभिप्रायरूपः स्तुत्यादिरूपश्च, देवता तु दिव्या ज्योतिराध्यात्मिका मन्त्रैरुपास्या भवति । अत्र देवता तु मन्त्रार्थाद् भिन्नैवेत्याशयः । अत्रोच्यते– यद्यपि प्रत्येकशः शब्दात् तदर्थाच्च देवता भिन्नैवेति वक्तुं शक्यं, तथापि समग्रमन्त्रार्थस्वरूपैव तदधिष्ठात्री देवतेत्यवश्यमेवाभ्युपगन्तव्यं भवेत् । कुत एतत् ? उच्यते–मन्त्रशरीरा देवता मन्त्रैरेव गम्या च । तेन 'वाच्यवाचकयोरभेदः' इति न्यायेन मन्त्रावयवभूतानां अग्नीन्द्रादित्यादिशब्दानां वाच्यार्थरूपास्तेऽग्न्यादयो देवताः, तद्वाचकशब्दसमूहसङ्ग्रथित एव मन्त्रः । तस्मान्मन्त्रार्थरूपैव देवतेति सम्पद्यते ।

तद्यथा– '**तत्सवितुर्वरेण्यं**–' इति– 'यः अस्माकं धियः प्रेरयेत्, तस्य सवितुर्देवस्य तद्वरेण्यं तेजो ध्यायामः' इति प्रत्येकशः शब्दार्थस्य स्तुत्याद्यभिप्रायरूपत्वेऽपि सवितृतेजसो ध्याने तद्वस्तुज्ञानमेव प्रधानम् । अपि च '**अमन्यमानाः अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र**' इत्यत्रापि इन्द्रदेवतासम्बोधनेन स्तुता, तत्र तन्मन्त्राधिष्ठितेन्द्रदेवताज्ञानमन्तरेण तद्वचनमेव न सङ्गच्छते । तस्मात् ऋषिच्छन्दोदैवतानि तानि मन्त्रेमन्त्रे विद्यात् । इति श्रुतिवचनमेव शरणम् ।

तदेतत् तत्र तत्र मन्त्रविनियोगेषु देवतानिर्देशपूर्वकं तत्तद्देवताकमन्त्रविधानं ब्राह्मणे बहुधोपलभ्यते । '**उदु त्यं जातवेदसम्०** । **चित्रं देवानाम्०**। (तै० सं० १।४।४३।१–२) **सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति०** (तै० सं० ६।६।१।४) '**अग्न आयूंषि पवसे०**।' (तै० सं० १।५।५।७) '**आग्निपावमानीभिरुप तिष्ठते०**' (तै० सं० ३।५।७।९) '**उदु त्यं जातवेदसम्०**।' (तै० सं० १।२।८।७) **सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति०** । (तै० सं० ६।१।११।९) '**युञ्जते मनः०**' (तै० सं० १।२।१३।१) '**सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति०**।' (तै० सं० ६।२।९।२) **इदं विष्णुः० इरावती०** ।' (तै० सं० १।२।१३।४–५) '**वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति**।' (तै० सं० ६।२।९।५) '**सोमो जिगाति गातुवित्०**।' (तै० सं० १।३।४।५) '**सौम्यर्चा प्र पादयति०**' (तै० सं० ६।३।२।१२) '**उरु विष्णो वि क्रमस्व०** ।' (तै० सं १।३।४।४) **वैष्णव्यर्चा हुत्वा यूपमच्छैति**' (तै० स० ६।३।३।१) '**विष्णोः कर्माणि पश्यत०**' **तद्विष्णोः परमं पदम्०** (तै० सं० १।३।६।१२-१३) '**वैष्णव्यर्चा कल्पयति द्वाभ्यां कल्पयति०**' (तै०सं० ६।३।४।१०-११) '**अस्तभ्नाद् द्यामृषभः०**' (तै० सं १।२।८।५) '**वारुण्यर्चा सादयति०**' (तै० सं० ६।१।११।६) '**मनो ज्योतिर्जुषतां० बृहस्पतिस्तनुतामिमं नः**।' (तै० सं० १।५।३।७) '**बृहस्पतिवत्यर्चोप तिष्ठते०**।' (तै० सं० १।५।४।७) '**उदुत्तमं वरुणपाशमस्मत्०**' (तै० सं० १।५।११।१०) शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात् । स एतां वारुणीमपश्यत्, इति ऋचां तु ऋग्वेदादिषु प्रसिद्धानि दैवतानि । यजुर्मन्त्राणां तु 'इषे त्वोर्जे त्वा' इत्यादीनां दैवतानि न प्रसिद्धानि । अत एव आहुतिदानानन्तरं वक्तव्ये देवतोद्देशके त्यागे 'मन्त्रोक्तदेवताया इदं न मम' इत्येव याजुषाणां त्यागोच्चारपद्धतिर्विद्यते ।

एवं सति तेषां यजुर्मन्त्राणामप्रसिद्धदेवताकानां नूतना दैवतकल्पना कथं शास्त्रीयतामर्हति ? अत्रोच्यते– मन्त्रे एव प्रतिष्ठितं तद्दैवतम् । तज्ज्ञानमेवावशिष्टं, तत्तु मन्त्रस्थशब्दलिङ्गादेवावगम्यते । 'या लिङ्गोक्ता सैव मन्त्रदेवता ।' इति स्पष्टमेवोपदिष्टं सूत्रे । 'यल्लिङ्गं सा देवता, (ऋ० सर्वा० १।१।३९) इति च । अत एव बहुदेवताकस्य मन्त्रस्य सामान्यतः समासेन च वैश्वदेवत्वम् । विभागेन तु विशेषेण अनेकदेवताः लिङ्गोक्ता एव दर्शिताः । तद्यथा कुत्सदर्शने 'तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः' इति सूक्तान्तिमस्य अर्धर्चस्य उभयथा निर्देशः । तथा च ऋक्सर्वानुक्रमसूत्रम् '**इमं षोळश कुत्स आग्नेयं० तन्नो मित्रोऽर्धर्चो लिङ्गोक्तदेवतो यद्दैवत्यं वा सूक्तम्**' इति (ऋ० सर्वा० सू० १।९४) 'अस्तु श्रौषळैकादश वैश्वदेवो मैत्रा[illegible]विन्यस्तिस्रः ऐन्द्राग्नेयी मारुत्यैन्द्राग्नी बार्हस्पत्या वैश्वदेवी०, वैश्वदेवमेतत्, एवमन्यासामपि सूक्तप्रयोगे वैश्वदेवत्वं, सूक्तभेदप्रयोगे यल्लिङ्गं सा देवता' इति च (ऋ० सर्वा० १।१३९)

सत्यमेवेदं, श्रुतं सर्वं ज्ञातं च, विदितमेवेदं सर्वं अस्माकमपि, किमन्यत् ?– ऋचामेवेदं यजुषां तु का कथा ? तत्रापि एवमेव युज्यते । कथं तत् ? मन्त्रलिङ्गादेव यजुषामपि देवता अवगम्यते ।

तद्यथा '**इषे त्वोर्जे त्वा**' इत्यस्मिन् इट् शब्दः अन्नवाचकः प्रसिद्धः, तेनास्य 'इट्' एव देवता भवति । किम्–

अन्नमपि देवता भवितुमर्हति ? अथ किम् ?– तर्हि पाषाणमपि दैवतं भवेत् ? ओम् । अन्नधान्यादिकरणोपकरणभूतं उलूखलादिरूपं अश्मापि दैवतं भवति । तथा च शुनःशेपार्षेयो मन्त्रवर्णः ।

' यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे । इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥' इति (ऋ० १।२८।५)

न केवलं दैवतात्मकं तदन्नं अपि तु साक्षाद् ब्रह्मात्मकमेव ।' अन्नं ब्रह्मेति व्यजानात्, अन्नं हि भूतानां ज्येष्ठम् ' इति च श्रुतिवचनात् । अत एव ' अन्नं न निन्द्यात् अन्नं न परि चक्षीत ' इति अन्ननिन्दादिप्रतिषेधोऽपि श्रूयते । अन्नस्तुतिस्तु वेदे बहुधैवोपलभ्यते । ' पितुं नु स्तोषं महो धर्माणं तविषीम् । ' (ऋ० १।१८७।१) ' त्वे पितो महानां देवानां मनो हितम् । ' इति (ऋ० १।१८७।६) सर्वदा सर्वत्रापि सर्वेऽपि अन्नगतप्राणा एव प्राणभृतः, इति सर्वेषामनुभवसिद्धम्, अस्मिन् युगे तु तद्विशेषतः इति वक्तव्यम् । तत्रापि इदानीं सर्वैरपि प्रतिदिनमनुभूयते ' सर्वारम्भास्तण्डुलप्रस्थमूलाः ' इति प्राचामभियुक्तवचनं प्रसिद्धम् तस्मादस्मिञ्जगति जीवनमेव सर्वपुरुषार्थमूलसाधनभूतम् । ' जीवन् भद्राणि पश्यति ' इति न्यायात् । अन्नेन जीवनं, जीवनेन बलं, बलेन प्राणशक्तिः । प्राणेन बलवृद्धिः । प्राणेन बलेन चायुः । एवं चिरायुषा धर्मकर्मादिसमृद्धिः । तेनैव सर्वपुरुषार्थसिद्धिश्च भवितुमर्हति । अत्र जीवनाधारभूतमन्नमेव प्रधानं मूलभूतं च तदिदं शास्त्रदृष्ट्यैव सिद्धम् । लोकदृष्ट्यापि ज्ञायते । अत एव सा भगवती विश्वसञ्जीवनभूता जगज्जननी अन्नपूर्णाम्बिकैव सर्वेषां प्राणभृतां शरणं सर्वार्थसाधनसमर्थेति सिद्धम् ।

तत्रापि– सर्वेषां प्राणिनां मातृदुग्धमेव प्रथमं जीवनमिति प्रत्यक्षम् । तथापि मातुः शरीरस्य रोगवियोगादिविपत्तिनिमित्तेन माता तु केवलं गर्भधारिणी जन्मदात्री, अथवा निजबालकानामेव जननीति निश्चीयते । तदिह विशेषतः अनाथबालकानां, तथा इतरेषां सर्वेषामपि लोकानां जीवनं पशूनां दुग्धेनैव भवितुमर्हति ।

तत्रापि सर्वेषां पशूनां दुग्धादपि माधुर्यादिसर्वरसातिशयेन स्थैर्यबलायुरारोग्यसत्वशुद्धिसत्वबुद्ध्याद्यभिवर्धकगुणेन च गवां दुग्धमेव परमं श्रेष्ठ इति सर्वत्रानुभवसिद्धम् । ' प्रायः पयोऽत्र गव्यं तु जीवनीयं रसायनम् ' इति वाग्भटस्य अष्टाङ्गहृदये स्पष्टतरं वचनम् । एवं गोमूत्रगोमयादिभिरपि बीजक्षेत्रादौ शरीरे च सर्वदोषनिवृत्या शुद्धिक्रियया च संस्कारविशेषः आधीयत इत्यपि सिद्धम् । इति सर्वेषां प्राणिनां विशेषतो मानवजन्तूनां सुखजीवनस्थितौ गौर्मातैव मुख्या आधारभूतेति सर्वथा सम्पद्यते । तदिदं ' आप्यायध्वमघ्न्या देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्माः ' इति यजुषा सिद्धम् । अत एव धान्यदुग्धाद्यन्नस्य परंतत्वमुपनिषत्सु श्रूयते ।

' यत्सप्तान्नानि मेधया तपसाऽजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् ॥
त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् । तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।
कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा ॥ यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन ।
स देवानपि गच्छति स ऊर्जमुपजीवति ॥ ' इति (बृ० उ० १।५।१)

अत्र– ' एकमस्य साधारणं ' इति सर्वसाधारणं धान्यादिकमन्नं निर्दिष्टम् । ' पशुभ्य एकं प्रायच्छत् ' इति च दुग्धनिर्देशः । अनयोरुभयविधयोरेवान्नयोः सर्वाण्यपि अन्नान्यन्तर्भूतानि । यद्यपि ' पशुभ्य एकं ' इत्यनेन पशुसामान्यशब्देन सर्वेषां पशूनां दुग्धं गृहीतुं शक्यं, तथापि गवां दुग्धमेव प्राधान्येनोद्दिष्टमिति उत्तरत्र व्याख्यानादवगम्यते । ' पशुभ्य एकं प्रायच्छदिति तत्पयः, पयोह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति, ' इत्यादि सामान्यतो निर्देशः ' तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद् यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति ' इति (बृ० उ० १।५।१)

अत्र जीवनस्य पशुसामान्यदुग्धे उपयुक्तेऽपि नित्याग्निहोत्रादौ गोदुग्धमेवोपयुक्तम ' पयसा नित्यहोमः ' इति विधाने गोदुग्धमेवोद्दिष्टम् ' ' यस्याग्निहोत्रस्य गौरुपावसृष्टा वाश्येत० दुह्यमानोपविशेत् तामभिमृश्य जपेत् ' यस्माद् भीषा निषीदसि ' इत्यत्र अग्निहोत्रार्थे दुग्धदोहने गोरेव निर्देशात् (ऐ० ब्रा० ५ पं० प्रायाश्चित्तप्र०) । एवं विश्वसञ्जीवनकारणभूतं धान्यदुग्धादिरूपमन्नं यज्ञार्थं यज्ञश्च अन्नार्थकः इति वैदिकं तत्वम् । अत एव विश्वजीवनयज्ञमन्तरा केवलं स्वोदरपोषणायैवान्नोपयोगः शास्त्रनिषिद्धः ।

" मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ " इति (ऋ० १०।११७।६)
" तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः । अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् ॥ इति च स्मृतिः । एतेन अन्नेन यज्ञसिद्धिः, यज्ञमुखेनैवान्नसम्पत्तिः, तदेतदुभययोगेनैव प्राणसञ्जीवनात् विश्वप्रतिष्ठेति सिध्यति ।
" यज्ञाद्भवति पर्जन्यः, पर्जन्यादन्नसम्भवः । अन्नाद्भवन्ति भूतानि० " इति । (गीता ३।१४)
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ (इति च मनुः)
एवं श्रुत्यादिवचनानां क्रोडीकरणेन शास्त्रदृशा तदर्थविमर्शेन च अन्नस्य विश्वसञ्जीवनैककारणत्वात्, तादृशान्नसम्पदभ्युदये विश्वदेवयज्ञस्यैव प्रधानसाधनत्वेन निश्चयाच्च, तादृशविश्वयज्ञमुखेन यज्ञरूपस्य परमपुरुषस्य प्रसादात्, अन्नसम्पत्त्या विश्वसञ्जीवनार्थं प्रवृत्तोऽयं यजुर्वेदो, यज्ञप्रधानः इत्युच्यीयते । तदेतत् " इषे त्वा " इति अन्नदेवतोद्देशकयजनमुखेनारम्भादेव सिध्यति ।

तदेतत् सर्वमपि एतत्प्रथमानुवाकार्थविमर्शनात् स्पष्टं भवति । ' इषे त्वोर्जे त्वा० श्रेष्ठतमाय कर्मणे० आप्यायध्वमघ्न्या देवभागम् ।' (इन्द्राय भागम्) ' ऊर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्माः० । ध्रुवा अस्मिन् गोपतौ स्यात० यजमानस्य पशून् पाहि । ' इति यजुर्भिः एतदर्थमेवान्नमुद्दिश्य अन्नपतिं पार्थयन्ते पूर्वे ऋषयो मन्त्रमुखेन ।

' अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः ।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ' इति (तै० ४।२।३।१; वा० य० ११।८३)
अत एव विश्वसञ्जीवनाय यज्ञाय धान्यगोदुग्धादिजीवनीयान्नात्मकप्रधानसम्पदभ्युदयार्थं सर्वदा सर्वत्रापि समानं एकरूपेण प्रतिष्ठितं सर्वेषामपि स्वतन्त्रसञ्जीवनोपायभूतं स्वानुष्ठितं कृषिगोसेवादिकं लौकिकं साधनमपि ऋषयो मन्त्रमुखेनोपदिशन्ति ।
' अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥ ' इति (ऋ० १०।३४।१३)
' दोग्ध्री धेनुर्वोढाऽनड्वान्, ' ' अनड्वाँश्च मे धेनुश्च म०, आयुर्यज्ञेन कल्पताम् । ' इत्यादि
यद्यपि अस्मिन् देवताविचारे एतावदर्थान्तरव्याख्यानं समयोचितं न भवेत्, तथापि यजुर्वेदस्य यज्ञमुखेन विश्वसञ्जीवनार्थं प्रवृत्तिं दर्शयितुं, सर्वप्राणिजीवनप्रधानान्नदेवतायजनमुखेन तद्वेदारम्भं वर्णयितुं, तथा ' इषे त्वा ' इति मन्त्रे ' इषे ' शब्दार्थस्यान्नस्य विश्वसञ्जीवनभूतप्रधानदेवतात्वं च समर्थयितुं, एतावन्महद्दीर्घव्याख्यानमर्थान्तरेणापि अवश्यकर्तव्यतया प्राप्तम् ।

अन्यथा ' इषे त्वा ' इति मन्त्रस्य तत्त्वसिद्धा अन्नदेवतेति श्रुतिसूत्रादिषु अनिर्देशात् तथा ज्ञातुमशक्यमेवाभविष्यत् । अपि च ऋग्वेदारम्भे 'अग्निमीळे' इति स्तुतः सर्वदेवतात्मकोऽग्निरन्नादो भवति भोक्तृरूपत्वात् । 'अग्निः सर्वा देवताः,' ' अग्निरन्नादः, ' 'अग्निमन्नादमन्नाद्याय' इत्यादि श्रुतेः । यजुर्वेदारम्भे तु भोग्यात्मकं विश्वरूपं अन्नमेवानुश्रुतम् । वस्तुतत्त्वज्ञाने तु उभयोर्भोक्तृभोग्ययोस्तादात्म्येनैव पूर्णता स्यात् । ' अहमन्नम्३, अहमन्नादः३। ' (तै० भृगुप० १०।६) इति । तथा ' अहमन्नमन्नमदन्तमाद्मि ' इति च स्पष्टं सामरस्यम् । अत एव देवतार्थमेव हविःसिद्धिरुद्दिष्टेति सङ्गच्छते ।
एवं भोक्तृभोग्यरूपेण बीजक्षेत्ररूपेण पुंस्त्रीरूपकेण प्रतिष्ठितयोः, तथा ऋग्यजुर्वेदमुखेऽनुश्रुतयोरन्यत्रयोः, तद्वाचकयोः ' अग्नि इट् ' शब्दयोः तथा–तन्मुखेनारब्धयोरवान्तजातिविशिष्टयोः अन्तर्भूतसर्ववेदयोः ऋग्यजुर्वेदयोरपि सामरस्ययोगेन सर्ववेदगर्भरूपे परस्मिन् ब्रह्मणि वाक्पुरुषात्मके ब्रह्मणस्पतौ मातृगर्भे पिण्डस्येव ऐक्येनैव प्रतिष्ठा, तत आविर्भावश्चेति अनेन देवतातत्त्वेन समुच्चीयते । तदिदं परं तत्त्वं महर्षिणा विश्वामित्रेण सर्वदेवतारूपात्मतत्त्वसाक्षात्कारेण ऋङ्मन्त्रमुखेनोद्गीतम् ।
' अग्निरस्मि जन्मना जातवेदाः०...।...अजस्रो घर्मो हविरस्मि नाम ॥ ' (ऋ० ३।२६।७; वा० य० १८।६६)
' अजस्रं ज्योतिर्हविरस्मि सर्वम् । ' इति (साम० ६१३)

❋

अयमेव सर्ववेदात्मकेन वेदद्वयेन सम्पादनीयः परमो यज्ञः । सेयमेव ऋग्यजुर्वेदयजनीया, अन्न-अन्नादात्मिका वाक्पुरुषा-
त्मिका च ब्रह्मणस्पतिस्वरूपा सा परा देवतेति विज्ञेयम् ।
एवमेव यजुर्मन्त्रेषु सर्वत्रापि लिङ्गेन शास्त्रदृशा तत्त्वविमर्शनेन च दैवतं समुन्नेयम् । ऋषिच्छन्दोदैवतज्ञानसाहित्येनैव वेद-
मन्त्राणामध्ययने अध्यापने यजनादिषु विनियोगे परमं श्रेयः इति । ' ब्राह्मणार्षेयच्छन्दो दैवतविद्याजनाध्यापनाभ्यां
श्रेयोऽधिगच्छति ' इति वचनात् ।
अन्यच्चैतद् विशिष्टम्—वेदानां मन्त्रार्थज्ञाने देवतातत्त्वमेव प्रधानम्, दैवतस्यैव मन्त्रार्थरूपत्वात् । ' अग्निमीळे पुरो-
हितम् ' ' अग्न आ याहि वीतये ' इति च अविशेषात् ऋक्साम्नोरारम्भे अग्निरेव देवतेति स्पष्टतरम् । यजुर्वेदारम्भे
तु ' इषे त्वा ' इत्यत्र यद्यपि इट्शब्दवाच्यमन्नमेव दैवतमिति पुरस्तात् सामान्यतः प्रतिपादितम्, तथापि पयःसोमयवादि-
रूपस्य इट्शब्दार्थस्यान्नस्यापि सोम एव देवतेति सूक्ष्मदृशा विमर्शेनोन्नीयेत । सोमस्यापि तस्य देवान्नत्वेनानुश्रवणात् ।
' सोमो जिगाति गातुविद् देवानामेति निष्कृतिम् ' इति (ऋ० ३।६२।१३) मन्त्रवर्णः । ' आदित्याच्चन्द्रम-
समेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ' इति च ब्राह्मणम् । (छां० उ० ५।१०।४) अस्माकं तु स
सोम एवान्नदाता देवान्नरूपः, तस्मादन्नं तत् सोमदैवत्यमेव । ' इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः । '
(ऋ० ९।६५।२१) ' सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ' इति मन्त्रवर्णात् ।
(ऋ० ३।६२।१४)
केवलरसात्मकस्य विशिष्टान्नरूपस्य गोदुग्धस्यापि सोम एव देवता । ' गावः सोमस्य प्रथमस्य भक्षः ' इति
(ऋ० ६।२८।५) गव्यस्य सोमान्वयत्वेनानुश्रवणात् । ' रौद्रं गविसद् वायव्यमुपावसृष्टमाश्विनं दुह्यमानं ' ' सौम्यं
दुग्धम् ' इति च ब्राह्मणम् (ऐ० ब्रा०) ।
एतेन रसात्मकं दुग्धं घनभूतं व्रीहियवादिकमन्नं च सोमदैवत्यमेवेति सिध्यति, सोमरसस्य तु सोम एव देवतेति शब्दत
एव सिद्धम्, तदेतत् सर्वमप्यन्नं इट् शब्दवाच्यमेव । अत एव यज्ञार्थं विश्वसञ्जीवनार्थं च तादृशान्नप्राप्तये ऋषिभिः सोम
एव प्रार्थितः । ' इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ' (ऋ० ९।६४।१३) ।
' इषमूर्जं पवमानाभ्यर्षसि । ' इति च (ऋ० ९।८७।३५) स च सोमः न केवलमन्नरसादीनामेव देवता, अपि तु अन्न-
मयस्य मनसोऽपि अधिष्ठाता चेतनरूपो देवतात्मेति प्रसिद्धः । ' इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चि-
न्मनसस्पतिः ' इति (ऋ० ९।११।८) ।
' त्वे पितो महानां देवानां मनो हितम् ।' इति मन्त्रवर्णात् ।
सोमदेवताकमान्तर्यं करणरूपं तन्मनस्तु अन्नमयम् ।
(ऋ० १।१८७।६) ' अन्नमयꣳ हि सोम्य मनः ' इति च ब्राह्मणम् । (छां० उ० ६।५।४) तदिदं मनः दिव्यात्
सोमदैवतात् भोग्याद् भौतिकाच्च उत्पद्यते । स च सोमः मनसोऽधिपतिरपि बुध्यादिसर्वेन्द्रियाणां, तथा तत्तद्देवतानां च
आविर्भावे कारणीभूतः सन् तेषां वागादीनां अग्न्यादीनां च मिथुनीभूत एव भवति । तथा च मन्त्रवर्णः—

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ इति (ऋ० ९।९६।५)

सोऽयं सोमः परमपुरुषस्य मनस एवाविर्भूतः । ' चन्द्रमा मनसो जातः ' इति श्रवणात् (ऋ० १०।९०।१३ । तथा
समष्टिमननशक्त्याविर्भूतः स सोमः पुनर्व्यष्ट्यात्मकेन मनोरूपेणास्माकं सर्वेषां प्राणभृतामन्तर्हृदये समाविष्टः ' हृदयं
निरभिद्यत हृदयान्मनो मनसश्चन्द्रमाः० । चन्द्रमा मनो भूत्वा हृदयं प्राविशत् । इत्यनुश्रवणात् । (ऐ०
उ० १।१।४) एवं ऋग्यजुर्वेदयोर्द्वयोर्मुखे अग्नि इट् शब्दाभ्यां वाङ्मनःप्रधानमग्नीषोमात्मकं दैवतमेवाभिष्टुतम् । तच्च विश्वरूपं
विश्वाधिष्ठानभूतत्वात् ' अग्नीषोमात्मकं जगत् ' इति तदनुस्मरणाच्च । तच्च पूर्णमासयागे प्रधानम् । ' अग्नीषोमौ
पूर्णमास्याम् । ' इति कल्पसूत्रात् ।
अथ दुग्धदधिघृतसोमयवादिरूपं इट्शब्दवाच्यं सर्वमप्यन्नं यज्ञार्थमेव, देवतार्थमिति यावत् । अत एवाविशेषेण
' आप्यायध्वमघ्न्या देवभागम् ' इति तदेवोद्दिष्टम् । विशेषतस्तु-सर्वदेवतानामिन्द्र एव श्रेष्ठः ' तमिन्द्रास भुव-

नेषु ज्येष्ठम् ' (ऋ० १०।१२०।१)। ' विश्वस्मादिन्द्र उत्तरः ।' (ऋ० १०।८६।१) इति च श्रवणात् । अतः सर्वोऽपि यज्ञः इन्द्रायैव कल्पते, तस्यैव सर्वेश्वरत्वात् । ' इन्द्रो यातोऽवसितस्य राजा, सेदु राजा क्षयति चर्षणीनाम् । (ऋ० १।३२।१५) । ' इन्द्रो विश्वस्य राजति ' (साम० ४५६) इत्यादि श्रवणात् । स च इन्द्रः अग्निना मिथुनीभूतः सहैवाविर्भूतश्च । ' मुखादिन्द्रश्चाग्निश्च । ' (ऋ० १०।९०।१३) ' यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः । ' इति च श्रवणात् । (ऋ० ११।१०८।९) तौ चेन्द्राग्नी दर्शयागे प्रधानदेवतास्थानमुपप्राप्तौ । ' इन्द्राग्नी अमावास्यायाम् ' इति सूत्रात् । तस्य च गव्यं दध्येव परं हविरिति श्रुतिसङ्केतितम् । ' ऐन्द्रं दध्यममावास्यायाम् ' इति तद्विधिः ।

अत एवात्यन्तश्रेष्ठयज्ञसिद्धये तत्रापीन्द्रयजनाय तद्धविः साधनाय च गावः प्रार्थ्यन्ते । ' इषे त्वोर्जे त्वा वायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्राय भागम् ' इति (वा० य० १।१) तत्र पयोऽधिष्ठाता सोमोऽपि सहकारी भवति । ' सम्पृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातये सोमेन त्वाऽऽतनच्मीन्द्राय दधि विष्णो हव्यꣳ रक्षस्व ' इति विशेषानुश्रवणात् । (तै० सं० १।१।३।८-१०) एवमग्नीषोमाभ्यामिन्द्राग्निभ्यां च सर्वोऽपि यज्ञः सम्पद्यत इति सिध्यति । तादृशयागसिद्धौ 'यागस्य द्वे रूपे द्रव्यं देवता च ।' इति वचनेन देवतादिवत् आन्तर्यमुपकरणमपि भवति । अग्निरेव वाक्, अन्नपतिः सोम एव मनः । ताभ्यामग्नीषोमाधिष्ठानभूताभ्यां वाङ्मनसाभ्यामेव सर्वयज्ञसम्पत्तिरनुश्रूयते । ' वाचा च हि मनसा च यज्ञो वर्तते, यज्ञस्य वै मनश्च वाक् च वर्तन्यौ ' (ऐ० ब्रा० ५।५१) ' अयं वै यज्ञो योऽयं पवते० तस्य मनश्च वाक् च वर्तनी । ' इति च । (छां० ४।१६।१)

यथा खलु एकेन पादेन चक्रेण वा गच्छन् पुरुषो रथश्च न प्रचलति, किं तु पतत्येव । एवं वाचा मनसा वा एकेनैव करणेन प्रवृत्तः, ऋचा यजुषा वा एकेनैव वेदेन आवर्तितो यज्ञोऽपि भ्रश्यत्येव । ' वागेव ऋग्वेदो मनो यजुर्वेदः ' (बृ० उ० १।४।५) इति वचनात् वाङ्मनसयोर्योगेन, अग्नीषोमयोः साहित्येन, ऋग्यजुर्वेदयोः सहप्रयोगेनैव यज्ञसिद्धिः, तथा तत्त्वत्रयसहित एव यज्ञः पूर्णो भवति । तदेतत् परं तत्त्वं दर्शयितुमेव 'अग्निमीळे, इषे त्वा' इति मन्त्रमुखेनारब्धं तादिदं वेदद्वयम् । तथा च मन्त्रवर्णः ' इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो । अग्ने घृतस्नुस्त्रिरृतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे । (ऋ० १०।१२२।६) इति । ' अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।' इति च । इति उभयवेदतत्त्वसहकारेणैव सर्वो योगो यज्ञश्च सिध्यतीति सर्वथा सम्पद्यते ।

एवं सर्वयज्ञसिध्यर्थं तद्द्वारा विश्वसञ्जीवनार्थं च उपयुक्तस्य दुग्धधान्यादिरूपान्नस्य सम्पत्त्यै सोम एव इषे त्वेति । येन हि सा इट् ऊर्क् च लभ्येत तस्यैव प्रार्थना युक्ततरा । तच्च सोमादेवेत्यनुश्रूयते । 'इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि । ' (ऋ० ९।६४।१३) ' इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः ' इति च (ऋ० ९।६३।२)। इन्द्रादिदेवेभ्यो मनुष्यादिसर्वप्राणिभ्यश्च इषं ऊर्जं बलं च सोम एव ददाति । तस्माद् यजुर्वेदारम्भे ' इषे त्वोर्जे त्वा ' इति प्रथमस्य यजुर्मन्त्रस्य इट् शब्दवाच्यान्नाधिष्ठाता सोम एव प्रधानदेवतेति सिद्धम् ।

वेदार्थ–विमर्शः ।

अथ वेदानामर्थविषयकं विमर्शनं किञ्चित् प्रस्तूयते । ' वेदार्थः ' अवश्यं ज्ञातव्यः, ' योऽर्थज्ञ इत्सकलं भद्रमश्नुते ' इति वचनात् ।

१– तत्र केचित् प्रत्यक्षैकप्रमाणवादिनः आधिभौतिकं तत्त्वमेव प्रधानं मन्वानाः सर्वेषां वेदानां भौतिकार्थपरतामेवोपवर्णयन्ति । तथा प्रत्यक्षाणामग्न्यादित्यादितेजोविभूतीनां केवलं भौतिकं रूपमभ्युपगच्छन्ति ।

२– अन्ये तु अनुमानमपि प्रमाणमभिमन्यमानाः ' सर्वं तदिन्द्र ते वशे ' (ऋ० ८।९३।४ [उत्तरार्धः]) देवाधीनं जगत्सर्वं ' इति वचनेन अधिदैवतं परोक्षं तत्त्वमेव प्रधानमङ्गीकुर्वन्तः सर्वजगत्कारणत्वेन तत्परमीशतत्त्वं साधयन्ति । तथा कारणज्ञानेन कार्यज्ञानस्याप्यर्थात्सिद्धत्वात् ' एकस्मिन्विदिते सर्वमिदं विदितं भवती 'ति प्रतिज्ञया तत्परादेवतात्मकब्रह्मवस्तु-

परतयैव सर्वेषां वेदानां समन्वयेन वाक्यानि योजयन्ति ।

३- अपरे तु अनुभवैकतत्त्वप्राधान्येन अनुभवोदितशब्दप्रमाणवादिनः अपरोक्षं स्वतःसिद्धं नित्यप्राप्तं अन्तरात्मवस्तुतत्त्व-मेव सर्वेषां मूलभूतमित्यभिमन्यमानाः आध्यात्मिकार्थपरतयैव सर्वेषां वेदानामर्थं समर्थयन्ति ।

४- परे तु सदसद्विषयकविधिनिषेधपरप्रवृत्तिनिवृत्तिरूपक्रियैव सर्वपुरुषार्थसिध्या स्वात्मसार्थक्यं मन्वानाः तादृशक्रिया-रूपस्य धर्मस्य यज्ञत्वसिद्धेः सर्वेश्वरस्य तस्य परमपुरुषस्य यज्ञेनैव यजनीयत्वाच्च अधियज्ञपरतयैव सर्ववेदार्थमुपवर्णयन्तः यज्ञार्थमेवं सर्ववेदप्रवृत्तिं स्वीकुर्वन्तः ब्राह्मणादिकल्पमुखेन सर्वान्वेदमन्त्रान्यज्ञीये कर्मणि विनियोजयन्ति ।

५- इतरे लौकिकास्तु आदिसृष्टिमारभ्य अद्ययावत् सम्भूतं वर्तमानं भविष्यच्च लोकचरितमेव सर्वत्र विषयेषु सर्वेषां मार्गदर्शकत्वेन प्रधानं प्रमाणं मन्वानाः ऋग्वेदादिषु प्राचीनेषु वाङ्मयेषु प्राचीनलोकचरितोल्लेखननिरीक्षणेन ऐतिहासिकपरत-यैव सर्वेषां वेदानामर्थं युक्तं कामयन्ते ।

६- केचित्तु पाश्चात्यपण्डिताः प्रायोगिकेन विधानेन प्रत्यक्षसिद्धं युक्त्या साधितं तथैव पुनः प्रक्रियया साधयितुं शक्यमेव सर्वथा प्रमाणास्पदं फलोदये समर्थं च भवितुमर्हतीति मन्वानाः शास्त्रोदितस्य विषयस्य प्रत्यक्षीकरणार्थं प्रयतमानाः सन्तः तत्त्वसंशोधने प्रवृत्ताः तत्परतयैव वेदार्थं कल्पयन्ति । तथा वेदे स्वस्वभाषासदृशशब्ददर्शनात् तत्र प्राचीनस्वात्मीय-स्वदेशीयेतिहासादिकल्पनया वेदानामपि स्वात्मीयतामभिमन्यमानाः तत्प्रामाण्याङ्गीकारेण स्वात्मीयानामार्षेयवंशसम्भूतिमपि स्वीकुर्वन्ति ।

७- एवं बहुधा मतावलम्बनेन प्रवृत्तेषु स्वं स्वं मतमेव सत्यं प्रधानं चेति विवदमानेषु एतेष्वेव पुनः केचित् ' यद् दृष्टं तन्नष्टम् ' इति सर्वलोकप्रत्यक्षसिद्धेन न्यायेन सर्वस्यास्य जगतः असत्यत्वात् सद्वस्तुतत्त्वमेव नित्यसिद्धं मन्वानाः तादृश-सत्यवस्तुतत्त्वैकपरतया साक्षात् परम्परया वा सर्वेषां वेदानां अद्वितीयब्रह्मात्मवस्तुतत्त्वपर्यवसायितां तद्विज्ञानैकपरतां च दर्शयन्ति ।

८- तथा केचिदन्ये तु सत्यैकवस्त्वाविर्भूतत्वात् सर्वस्यास्य सत्यत्वभावनया यथा दृष्टं द्वैतवस्तुतत्त्वानुरोधेनैव सर्वं वेदार्थं समर्थयन्ति ।

९- एवं ' भिन्नरुचिर्हि लोकः ' इति न्यायात् तत्त्वभेदेन अन्यथाऽन्यथा व्याख्यानेऽपि ज्ञानोपासनाकर्मणां अन्यत-मस्य प्राधान्यं मन्वानाः केचित् तत्तत्परतयैव वेदार्थं योजयन्ति । तदेतत्सर्वमपि यथार्थमेव शास्त्रचिन्तकानां विदुषामभिमतं तत्त्वम् ।

१०- वस्तुतस्तु प्रत्यक्ष-परोक्षापरोक्षभूतानां आधिभौतिकाधिदैविकाध्यात्मिकतत्त्वानां प्रत्यक्षानुमानागमप्रमाणप्रधानानां ज्ञानोपासनाकर्मणां च सामरस्ययोग एव सर्ववेदसिद्धान्तार्थ इति-दैवरातः ।

तदेतदेव वेदस्यातिवैचित्र्यं महत्सन्तोषास्पदं च, यत् खलु सर्वेषामप्यानुकूल्येन समन्वयात् स्वस्वाभिमतानुरूपं नेतुं शक्यते वेदः इति, सोऽयं वेदः आदित्यादिसार्वभौमज्योतिर्विभूतिरिव यौगपद्येन सर्वत्रापि प्रकाशमानः सर्वेषामपि स्वात्मीयाद्य-भिमानास्पदीभूतः सर्वाश्रयभूतः दर्शनाकाङ्क्षार्हः सर्वाकाङ्क्षासम्पूरणसमर्थश्च भवति ।

अपि च आदिसृष्टिमारभ्य वसिष्ठादिमहर्षिमुखाद्वेदाविर्भावानन्तरं अद्ययावत् ब्राह्मणारण्यकोपनिषदादिरूपेण प्राचामृषीणां, भाष्यादिमुखेन यास्कसायनशङ्करप्रभृतीनामाचार्याणां, पुराणादिमुखेन व्यासादीनां च संवृत्तं वेदार्थोपव्याख्यानम्, तथाप्य-द्याप्यसमाप्तमेव, तथैव पुनर्नवनवतरविचारव्याख्यानतत्त्वसंशोधनाद्यास्पदीभूतः सएव वेदः सर्वेषां परमाश्रयं व्याख्यानाव-काशं च ददाति । सम्प्रति अस्मिन् भूमण्डले सर्वेष्वपि देशेषु प्रचलितं वेदार्थव्याख्यानं पुनः नूतनं नूतनं तत्त्वसंशोधनं च नाद्यापि पारं गतम्, मन्ये एवमेवाप्रलयं विचारे प्रवर्तमानेऽपि वेदार्थव्याख्यानं समापयितुं कल्पान्तरेऽप्यशक्यमेव भवेदिति । तदेतदेव वेदस्य परं माहात्म्यं कल्पनातीतमानन्त्यं चेति युक्तमुन्नीयते ।

अत एव वेदपुरुषस्य ब्रह्मणस्पतेः परं माहात्म्यमनुश्रूयते । तथा च गृत्समदार्षेयो मन्त्रवर्णः-' सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् । ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् । ' इति

(ऋ० २।२३।४) । हे ब्रह्मणस्पते वेदपुरुष ! त्वं त्वदाश्रितं जनं सुनीतिभिः सन्मार्गेण नयसि, त्रायसे च तेनैव, यः खलु तुभ्यं हृदयं ददाति तं परं पापप्रदोषादिकं न प्राप्नोति, त्वं वेदद्विषुणामीशद्विषुणां च तापकः, मन्युमीः– क्रोधादिवृत्तिशामकोऽसि, अतः हे बृहस्पते ! तव एतादृशं महत्तरं पूज्यं माहात्म्यमिति । एतेन वेदाश्रयात् सन्मार्गप्रवृत्तिः, आत्मरक्षा, पापादिदोषनिवृत्तिः, प्रतिबन्धकाज्ञानादिनिवृत्तिः, आत्मशान्तिः, इत्येवमादीनि फलानि भवन्तीति सम्पद्यते ।

किम् इतोऽप्यस्ति किञ्चिदधिकं वेदस्य सामर्थ्यम् ? ओम्, उपासकस्य सर्वतः परित्राणम् ' गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता ' इति वचनोदितम् सा वेदमाता गायत्री ज्ञानप्रदानेन उपासकं सर्वथा त्रायते । अत एव सा वेदमाता गायत्री ज्ञानादज्ञानाद्वा केनचित् परित्यक्तापि हिततमा सती मातेव नैनं परित्यजन्तं सा परित्यजति । ज्ञानोदयानन्तरमपि विज्ञानात्परित्यजन्तोऽपि नैव तां हृदयात् परित्यक्तुं शक्नुवन्ति । एकदा उपदेशतोऽन्तर्हृदये श्रोत्रमुखात्प्रविष्टा सती स्वमात्मानमुपस्पृशन्ती सा गायत्री सकृच्छ्रवणोच्चारणादिमात्रेण संस्कारावशिष्टा उपासकेन परित्यक्तापि मृतमप्येनं केवलं शरीराद्विमुक्तममृतमन्तरात्मानं न परित्यजति, स्वं परममर्थं तस्मिन् प्रकाशयितुं सेयं गायत्री मृतमप्येनमृतं भावयति, मृतमप्येनममृतमनुगच्छति, तमेनं पुनर्ब्रह्मसाक्षात्काराय प्रणयति । साक्षाद् ब्रह्मैव भावयति, ब्राह्मणमेव तं प्रज्ञानेन करोति । सेयं सत्या प्रतिज्ञा भगवत्याः वाचो देव्या वेदमन्त्रमुखेनोदिता—

' अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ इति, (ऋ० १०।१२५।५)

वेदमन्त्राणां अर्थविषये बहुधा मतभेदो दर्शितः । तत्र तत्त्वत्रयसामरस्यं यत्प्रतिज्ञातं तदेव किञ्चिद्विमृश्यते । ' अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।' इति (ऋ० १।१।१) ऋग्वेदारम्भेऽग्निः संस्तुतः । तस्यास्य अग्निशब्दस्य शक्तिस्तु योगाद्रूढेश्च केवले भौतिकेऽग्नावेव भवति तस्यैव प्रत्यक्षत्वात् सर्वेषाम् । न खलु देवतारूपः आध्यात्मकश्चाग्निर्न कस्यचिदपि दृश्यते । शक्तिग्रहमन्तरेण लौकिको वैदिकश्च व्यवहारो भवितुं नार्हति । तस्मात् शक्तिग्रहानुरोधेन प्रत्यक्षोऽयं भौतिकोऽग्निरेव ज्ञातुं शक्यो नान्यः, तथापि शास्त्रदृशा तत्त्वत्रयोपहितोऽग्निरेव वेदे ज्ञातव्यः प्राधान्येन ।

तद्यथा ' अग्निमीळे ' इत्यत्र न वेदो पुरःस्थितस्याग्नेः यज्ञे मन्त्रेण देवतात्वे सिद्धे साधितव्येऽपि प्रत्यक्षं भौतिकत्वं न हीयते, तच्च ' पुरोहितम् ' इति विशेषणेन गम्यते । तस्यास्य पुरस्थितस्यैव भौतिकाग्नेरेव वेदमन्त्रेण सिद्धं देवतात्वम्, तदेवाग्नेरधिदैवतं तत्त्वम् । तच्च ' यज्ञस्य देवम् ' इति विशेषणेन गम्यते । दर्शपूर्णमासादियज्ञेषु होतुः देवानामाह्वातुः तथा वषट्कारेण देवेभ्यो हविः प्रदातुः होतृनामकस्य ऋत्विजः ऋङ्मुखेन वाचिककर्मानुष्ठानाद्वाग्रूपत्वाच्च अग्निरूपत्वं प्रसिद्धम् । तच्च ' ऋत्विजं होतारम् ' इति विशेषणेन गम्यते । तत्रापि ऋत्विक् शब्दस्य प्रधानार्थत्वेन ऋत्विङ्मुखेन याजयितुः स्वयं यष्टुः यजमानस्यैव ग्रहणात् ' आत्मा यज्ञस्य पूर्व्यः ' (ऋ० ९।२।१०) ' तस्यैवं विदुषे यज्ञस्यात्मा यजमानः ' इति च (ना० उ० १९।८०) श्रुतेः अग्नेर्यजमानस्वरूपत्वं तच्चाग्नेराध्यात्मिकं तत्त्वम् । ' रत्नधातम- ' मिति विशेषणेन अग्नेरेव फलप्रदातृत्वं गम्यते । तच्च तत्त्वत्रयपूर्णं पारमैश्वर्यस्वरूपम् । ' फलमत उपपत्तेः ' (ब्र० सू० ३।२।३८) इति ईश्वरस्यैव फलप्रदातृत्वनिर्णयात् ।

एवमेकस्मिन्नेव मन्त्रे अग्निशब्दार्थस्य तत्त्वत्रयसामरस्यमेव प्रतिष्ठितम् । तस्माद्यथोपदेशं यथाश्रुतमेव गृहीतं तत्पूर्णं भवति ।

तत्त्वत्रयं ।

अथ जिज्ञासूनां हिताय विदुषां प्रमोदाय तत्त्वत्रयसामरस्यपूर्णमग्नेस्तत्परं तत्त्वस्वरूपं किञ्चित् स्पष्टीक्रियते । अत्र स्थूलोऽयं पार्थिवः प्रत्यक्षो बाह्यो भौतिकोऽग्निरिति सर्वत्र सुप्रसिद्ध एव, सोऽयमग्निः काष्ठलोष्ठाश्मादिसङ्घर्षणादुदितः काष्ठं कृष्णाङ्गारादिकं च पार्थिवं पदार्थजातमभिव्याप्तः सन् परिज्वलन्, यद्यपि परिच्छिन्नः काष्ठलोष्ठाद्युपाध्यनुरूपः स्थूलः सूक्ष्मः दीर्घः वर्तुलादिरूपश्चानुदृश्यते, तथापि तन्मूलं स्वरूपं तु अतिसूक्ष्मं पार्थिवं परमाणुमन्तरेण द्रष्टुमशक्यं समग्रायां पृथिव्यां व्याप्तमेव भवति । ' समिद्धो अग्निर्निहितः पृथिव्याम् ' इति (ऋ० २।३।१) श्रुत्युदितं युक्तिसहं प्रत्यक्षसिद्धं सर्वसम्मतमेव

अयमेव दिविस्थितः दिव्योऽग्निरित्युच्यते । स च आदित्यात्मकोऽस्यैव मूलभूतः । दिवि द्योतमानमादित्यज्योतिरेव यदा पार्थिवे काष्ठादौ प्रविष्टः सन् परिज्वलति स एवाग्निर्भवति । तदिदं प्रत्यक्षं काचमणेरादित्यतेजसैवाग्नेराविर्भावात् । तस्मात् सवितुरेवायमंशभूतः पार्थिवोऽग्निरिति स्पष्टम् । अत एव द्रव्ययज्ञे काष्ठादग्निं मन्थन्तोऽपि तदुदयार्थं सवितारमेव संस्तुवन्ति, प्रार्थयन्ते च सवितुरेवांशम् । तथा श्रुतिविधानात् । 'अग्नये मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह ।' इति (तै० सं० ६।३।५।९-१०) 'अभि त्वा देव सवितरिति सावित्रीमन्वाह' इति (ऐ० ब्रा० १।१६)।

तत्र अग्निमथने 'मन्थता नरः कविमद्वयन्तं' इति (ऋ०३।२९।५) स्पष्टमग्निमथनलिङ्गकं मन्त्रं विहाय किमर्थं सावित्रीमृचं स्तोतुं विहितम् ? सवितुः सकाशादेवाग्निरुत्पद्यत इति । 'तदाहुर्यदध्वर्युरग्नये मथ्यमानायानुवाचाहाथ कस्मात् सावित्रीमन्वाहेति सवितृप्रसूता ह्येष' इति (ऐ० ब्रा० १।१६) स्पष्टम् ।

'अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन् भागमीमहे (ऋ०१।२४।३), हे देव ! सवितः सर्वेषामीशानं त्वामभिलक्ष्य हे सदावन् ! तव भागं अंशरूपमग्निं इच्छामः इति । तस्मादयं दिव्योऽग्निः ।

अयमेवाशनिरूपेणान्तरिक्षेऽन्तर्हितो वैद्युतोऽग्निरिति कथ्यते । यदा तु अन्तरिक्षात्पतितोऽशनिः पृथिवीमुपस्पृशति स एवाग्निर्भवति । एवं पृथिवीमन्तरिक्षं द्युलोकं चाभिव्याप्तोऽग्निरेव भौतिकः । 'प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः' । (ऋ० ४।१४।१) 'आ प्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ।' इति (ऋ० ४।१४।२)।

अत एवैतास्तिस्रस्तन्वः अग्नेरिति श्रूयते । 'या ते अग्ने अयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा० स्वाहा' इति, (तै० सं० १।२।११।५-७। वा० य० ५,८) तदिदमग्नेर्भौतिकं तत्त्वम् । अत्र अग्नेर्भौतिकत्वे पार्थिवत्वेऽभ्युपगम्यमानेऽपि अस्ति किञ्चिद्वैशिष्ट्यमितरेभ्यः पार्थिवपदार्थेभ्यः । किं तत् ? आत्मसात्करणसामर्थ्यम् । प्रत्यक्षसिद्धमेवेदं अग्नेः स्पर्शेन सर्वमपि पार्थिवं पदार्थजातमग्निस्वरूपमेव भवतीति, साक्षादग्निरेव भवति । एवमेव अग्निशब्देन देवतात्माऽपि प्राह्यः । यस्मिन् खलु सर्वदेवताभ्यो हविर्हूयते सः सर्वदेवतान्तर्यामिरूप एव भवति, उक्तं आदित्याद्यन्तर्यामित्वमग्नेः, अत एव सर्वदेवतानां प्राथम्यमग्नेरेवानुश्रूयते । 'अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम' इति (ऋ० १।२४।२) । नहि केवले भौतिकेऽग्नौ प्रक्षिप्तं हविर्देवान्प्रतिगच्छति एतेन अग्निरेव सर्वासां देवताना मुखमिति सिध्यति । अत एव सर्वाभ्यो देवताभ्यो हविरग्निमुखे एव हूयते । 'यच्चिद्धि शश्वता तना देवंदेवं यजामहे । त्वे इद्धूयते हविः ।' इति (ऋ० १।२६।६) । एवमग्नेराधिदैवतं तत्त्वम् ।

अस्माकं सर्वेषां प्राणिनां शरीरान्तःस्थो वैश्वानर एवाध्यात्मिकोऽग्निः, येनान्तर्भुक्तमन्नं पच्यते । सोऽयं भौतिकोऽग्निरेव वैश्वानररूपेणोदितः 'अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः' इति मन्त्रवर्णात् । (ऋ० ८।४३।९) 'जन्मञ्जन्मन्निहितो जातवेदाः' इति च (ऋ० ३।१।२०)। चेतनात्मनो यत्रयत्र प्रादुर्भावः तत्रतत्र सर्वत्रापि जातवेदाः सर्वज्ञोऽग्निः प्रतिष्ठित इत्यर्थः । सर्वेषु बीजेष्वपि अग्निर्विद्यते । तस्मात् स्थावरजङ्गमानामात्मेति अभिप्रायः । 'समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्' इति । (ऋ० २।३।१) स्पष्टोऽर्थः । 'अग्ने विश्वतः प्रत्यङ्ङसि त्वम्' इति च (ऋ० १०।७९।५) एतेन पार्थिवाग्नेर्भौतिकात् देवताग्नेश्च न भिद्यते वैश्वानरोऽग्निरित्युक्तं भवति ।

अन्तरपि सोऽयमग्निस्त्रेधा प्रतिनिहितः 'ज्ञानाग्निर्दर्शनाग्निः कोष्ठाग्निरिति' च । (गर्भोप० १७।५) एवं अग्न्यादिशब्दैः तत्तदर्थानां आधिभौतिकादितत्त्वत्रयसामरस्येनैव यत् ज्ञानं भवेत् तदेव पूर्णम् । यद्यपि अग्न्यादिशब्देन भौतिकाग्न्यादिमात्रज्ञानेऽपि तद् ज्ञानमेव, तथापि तावता अग्न्यादेः स्वरूपतो व्याप्तिर्न ज्ञायते । तस्मात् तत्त्वत्रयसामरस्ययोगेनैव ज्ञानं सर्वत्रापि प्रधानम् ।

सवित्रादीनामपि एवमेवोह्यम् । 'प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ् विश्वं स्वर्दृशे ।' इति (ऋ० १।५०।५) ।

हे सवितः ! त्वं देवानां विशः प्रजाः सर्वा देवताः प्रति प्रत्यङ् अन्तः उदेषि, (तदधिदैवतम्) उत मानुषान् प्रत्यङ् उदेषि, चेतनात्मना रूपेण तदध्यात्मम् । तथा विश्वं सर्वमिदं जगत् प्रति प्रत्यङ् स्वर्लोके दिवि दृशे दर्शनाय प्रत्यक्षं उदेषि इति । तदधिभूतं प्रत्यक्षत्वात् । एवं तत्त्वत्रयसामरस्येनैव सवितुर्ज्ञानं पूर्णं भवति ।

परमपुरुषस्यापि तदेतत्समानम् । ' पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ।' इति (ऋ० १०।९०।२; वा० य० ३१।२), अस्यायमर्थः- अत्र भूतं, वर्तमानं, भाव्यं च सर्वमिदं जगत् यद् दृश्यते, तदिदं सर्वं पुरुष एव, पुरुषादेव आविर्भूतत्वात्, कार्यकारणयोरभेदाच्च । तदिदं भौतिकं तत्त्वं पुरुषस्य यद्विश्वरूपत्वम् । ' उतामृतत्वस्येशानः ' अपि च अमृतत्वस्यापि ईशानः दिव्येन स्वेनामृतत्वरूपेण प्रतिष्ठितः स पुरुष एव, तदेतत् आधिदैवतं पुरुषस्य परोक्षं तत्त्वं स्वरूपात्मकम् । ' यदन्नेनातिरोहति ' यत् खलु स पुरुषः अन्नेन अन्नमुखेन अतिरोहति सचेतनात्मकजीवरूपेणाविर्भवति सोऽपि पुरुष एव, तदिदमपरोक्षमाध्यात्मकं तत्त्वम् । एवं तत्त्वत्रयेऽपि स एक एव पुरुषोऽनुस्यूत इत्यर्थः ।

एतदेव पूर्णं ज्ञानम्, अन्यथा एकदेशीयज्ञानापत्तेः । ' स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषः (बृ० उ० १,४,७) ' इति वचनसिद्धन्यायात् । एवं सर्वत्राप्यवगन्तव्यम् ।

अत एवोपनिषत्सु एकस्यापि वस्तुतः अनेकतत्त्वयोगेनैव स्वरूपोपवर्णनं दृश्यते- तथाहि-वाङ्मनःप्राणानां तत्त्वनिर्वचनम्- ' अन्नमयँ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् इति ' (छां० उ० ६।५।४) इति त्रिकरणानां भौतिकत्वम् ' त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मने ऽकुरुत०, एतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ' इति आत्मन वाङ्मनःप्राणमयत्वं प्रतिज्ञातम् (बृ० उ० १,५,३) ततश्च ' त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ' इति, अधिलोकं तत्त्वम् । ' त्रयो वेदा एत एव वागेव ऋग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ' इत्यधिविद्यं तत्त्वम् । ' देवाः पितरो मनुष्या एत एव वागेव देवाः मनः पितरः प्राणो मनुष्याः ' इति अध्यात्मं तत्त्वम् । ' माता पिता प्रजैत एव मन एव पिता वाङ् माता प्राणः प्रजा ' इत्यधिप्रजं तत्त्वम् । ' विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यच्च किञ्च विज्ञातं वाचस्तद्रूपं० यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं०, यत्किञ्चाविज्ञातं प्राणस्य तद्रूपम्० ' इति अधिज्ञानतत्त्वम् । ' वाचः पृथिवी शरीरं, मनसो द्यौः शरीरम्, प्राणस्यापः शरीरम् ' इति च पृथक् पृथक् तत्त्वानि निर्दिष्टानि । तथा ' एते सर्वे एव समाः सर्वेऽनन्ताः ' इति दर्शितम् । एवं वाङ्मनःप्राणानां अधिलोकादितत्त्वयोगः । ' अधिलोकमधिज्यौतिष- (मधिविद्य) मधिप्रजमध्यात्मम् ' इति च पञ्चतत्त्वानां योगः अन्यत्र अन्यथा उपदिष्टः ।

क्वचित्तु पञ्चेन्द्रियाणां योगः तथा तेषां अधिदैवतं अधियज्ञं च तत्त्वमुपदिष्टम् । ' वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत् ' इति (ना० उ० १९।८०) । अन्यत्रैतेषामधिदैवतं तत्त्वमुपदिष्टम् । ' अग्निर्वाग् भूत्वा मुखं प्राविशद् वायुः प्राणो भूत्वा नासिके प्राविशद् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद् दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्०, चन्द्रमा मनो भूत्वा हृदयं प्राविशत् ' इति (ए० उ० १,२,४) । तथा च मन्त्रवर्णः- ' चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत । दिशः श्रोत्रात् । ' इति च (ऋ० १०।९०।१३; वा० य० ३१।१२) । एवं अधिभौतिकाधिदैवताध्यात्मादितत्त्वयुक्तानां वाङ्मनःप्राणचक्षुःश्रोत्ररूपाणां करणानां योगेनैवायमात्मा परमपुरुषरूपो ज्ञेयः उपासनीयो यजनीयश्चेति सम्पद्यते । अत्र अधिलोकाधिविद्याधियज्ञादितत्त्वानामपि तत्त्वत्रये एवान्तर्भावो ज्ञेयः, तत्र तत्त्वत्रयस्यैव प्राधान्यात् । ' स प्राणन्नेव प्राणो नाम भवति वदन्वाक् पश्यँश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येष ' इति (बृ० उ० १,४,७) इति एकैककरणयोगेनास्य ज्ञानोपासनादिप्रतिषेधः । ' स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्रा०.प्रयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयः ' इति च (बृ० उ० ४,४,५) । अपि च ' योऽसावादित्ये पुरुषः सोऽसावहम् । ' (वा० य० ४०।१७) ' स

यश्चायं पुरुषे यश्चासावादित्ये, स एकः ' इति (तै० भृगू० १०,४) ' स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात् तस्मात् पुरुषं पुरुषं प्रत्यादित्यो भवति तदप्येतदृषिणोक्तम् ' चित्रं देवानाम्० सूर्य आत्मा जगतस्तस्थुषश्चेति (तै० सं० १,४,४३,२) ; एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते० एतं सर्वेषु भूतेषु० एतद् ब्रह्मेत्याचक्षते स एष संवत्सर समानः चक्षुर्मयः श्रोत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा इति । ' (ऐ० आ० २,२,९) एवं सर्वत्रापि वेदेषु सर्वकरणयोगेन सर्वतत्त्वसामरस्येनैव पुरुषस्य ज्ञानोपासनायज्ञादिकं विहितमिति प्रतिज्ञातं सर्वं सुसम्पन्नम् ।

तथा च तृच भरद्वाजार्षेयं वैश्वानराग्नेयम्—

' अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु । अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ' ॥ ४ ॥

' ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः । विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ' ॥५॥

' वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरति दूर आधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ' ॥६॥ इति (ऋ० ६,९,४-६) । अस्यार्थस्तु एतावत्पर्यन्तमुपन्यस्त एव अग्न्यादीनां तत्त्वत्रयसामरस्यं, तथा आत्मनोऽपि सर्वेन्द्रिययोगेन ज्ञानोपासनायज्ञादिसिद्धिरिति ग्रन्थविस्तारभियोपसंह्रियते ।

एवं तत्त्वप्रयुक्तानां मन्त्राणां अग्न्यादिदेवतालिङ्गात् तत्र तत्र आग्नेयादिषु यज्ञीये कर्मणि विनियोगो विहितः ॥ न चैते मन्त्रास्तद्विनियोगोद्देशेन दृष्टाः, अपि तु तत्त्वदर्शेन दृष्टः, लिङ्गात्तेषां विनियोगः कल्पितो ब्राह्मणकल्पसूत्रादिभिः । तस्येदं प्रधानमुदाहरणम्—

" अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् । स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ।" इति (ऋ० १।१६४।३१ : वा० य० ३७।१७) दीर्घतमाः (ऋ० १।१५८।६) पतङ्गः (ऋ० १०,१७७,१) । अत्र 'अपश्यं' इति दर्शनक्रियापददर्शनेन सोमयागे महावीरदर्शने विनियोगः कल्पितः । तद्विनियोगानुरोधेनैव भाष्यव्याख्यानादिकं चतुर्ष्वपि वेदेषु विद्यते, तत्तदाचार्यैः प्रणीतम् । क्वचित् तात्त्विकं व्याख्यानमपि दृश्यते । तत्र हि महावीरमपश्यमिति अर्थेन तस्य महावीरस्यैव विशेषणानि गोपां इत्यादीनीति परिकल्पितानि । तत्तथैवास्तु, न च तन्निषिध्यते । तथापि केवलान्मन्त्रात् शब्दशः योऽर्थो निर्गलति स एव प्रधान इत्यभिमन्यते । वस्तुतस्तु अयं मन्त्रः सर्वात्मकपरवस्तुसाक्षात्कारेणोदितः, तदिदं ऐतरेयतैत्तिरीयशतपथादिब्राह्मणारण्यकोपनिषदादिवचनाद्यास्कनिरुक्ताच्च अवगम्यते ।

तथाहि " तस्य वाक्तन्तिर्नामानि दामानि०– तदुक्तमृषिणा अपश्यं गोपामिति एष वै गोपाः एष हीदं सर्वं गोपायति अनिपद्यमानमिति न ह्येष कदाचन संविशति, आ च परा च पथिभिश्चरन्तमिति आ च ह्येष परा च पथिभिश्चरति, स सध्रीचीः स विषूचीर्वसान इति सध्रीचीश्च विषूचीश्च वस्ते, इमा एव दिशः आ वरीवर्ति भुवनेष्वन्तरिति एष ह्यन्तर्भुवनेष्वा वरीवर्ति " इति (ऐ० आ० २।१।६) ।

" अपश्यं गोपामित्याह । प्राणो वै गोपाः । प्राणमेव प्रजासु वियातयति । अपश्यं गोपामित्याह । असौ वा आदित्यो गोपाः । स हीमाः प्रजा गोपायति । तमेव प्रजानां गोप्तारं कुरुते । अनिपद्यमानमित्याह । न ह्येष निपद्यते, इत्यादि० आ ह्येष वरीवर्ति भुवनेष्वन्तः । " इति (तै० आ० ४।७।१;५।६।४)

अपश्यं गोपामनिपद्यमानमिति एष वै गोपाः य एष तपति । एष हीदं सर्वं गोपायति० । स सध्रीचीः० इति सध्रीचीश्च विषूचीश्च दिशो वस्तेऽथो रश्मीन् , इत्यादि०— (शतपथ ब्रा० १४।१।४।९।१०)

" अपश्यं गोपामिति० आ वरीवर्ति भुवनेष्वन्तरिति एष महानात्मा सत्त्वलक्षणस्तत्परं तद् ब्रह्म तत्सत्यं तत्सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगन्धं तदमृतं तच्छुक्लं तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके तत्क्षेत्रं तज्ज्ञानात् क्षेत्रज्ञमनुप्राप्य निरात्मकम् ।

अथैष महानात्मा त्रिविधो भवति सत्त्वंरजस्तम इति । (यास्क० निरुक्ते० १४।३)

निर्गलितार्थस्तु—सत्त्वरजस्तमोगुणयोगेन सर्वस्यापि जगतः सृष्टिस्थितिलयकारणीभूतं तं परमात्मानमहमपश्यम् स च

दिगम्बरो ज्योतिर्वसनश्च सन् निर्विषयः सर्वेष्वपि भुवनेष्वन्तर्व्याप्तः प्रतितिष्ठति । स आदित्यप्राणात्मसर्वजगदधिष्ठानभूतः परमात्मैवेति । एतेन तत्त्वदृशा ऋषिभिर्दृष्टानां वेदमन्त्राणां अग्न्यादिलिङ्गेन तथा क्वचित् ' अपश्यं, पृच्छामि ' इत्यादिक्रियालिङ्गेन च, तदनुरूपे यज्ञीये कर्मणि विनियोगः कल्पितः इति सिद्धम् ।

अत्रेदं किञ्चित्पुनर्विचारास्पदम्–ऋङ्मन्त्राणां तथा भवतु तेषां तत्त्वदर्शेनोदितत्वात् । यजुषां तु यज्ञप्राधान्येनैवोदयात् अधियज्ञपरतैव युक्तेति वक्तव्यमापतति । अभ्युपगम्यते च सर्वैरपि मीमांसादिशास्त्रचिन्तकैः पूर्वाचार्याणां वेदभाष्यादिवचनानुसारेण ब्राह्मणादिवचनानुरोधेन च । तथैव ऋङ्मन्त्रवर्णोऽपि भवति– '' **यज्ञस्य मात्रां वि मिमीत उ त्वः** '' इति (ऋ० १०।७१।११) अधियज्ञमपि प्रधानं तत्त्वमेव, ज्ञानोपासनाकर्मणां यज्ञे एव पर्यवसानात् इति ।

सत्यमेवैतत्–नात्राधियज्ञतत्त्वं निषिध्यते, न च तन्निषेद्धुं शक्यं, नापि तन्निषेधमर्हति, तस्य वेदैकगम्यत्वाभ्युपगमात् । तथा चेद् यजुषां यज्ञार्थपरतैव प्रधानेत्युच्यताम्, तथा वक्तुं शक्यं तथापि न युक्तम् । कथमेतत् ? उच्यते; यज्ञस्य तत्त्वसिद्धत्वेऽपि तत्रानुपूर्व्यादिकल्पस्य तु कल्पितत्वमेवेति प्रतीयते । न च कल्पानुरोधेन मन्त्राविर्भावः ।

न खलु ऋषिभिर्दर्शपूर्णमासादिषु शाखाछेदनाद्यानुपूर्वीमनु कल्प्यैव ' **इषे त्वोर्जे त्वा** ' इत्यादयो मन्त्रा दृष्टाः; किंतु यजुर्मन्त्रा अपि केवलं तत्त्वदृशा समाधौ अन्तरनुभवेन दृष्टाः इत्येव सत्यम् ।

तथा दृष्टानां तेषां यज्ञादिषु विनियोगः कल्पितः, कर्मणां तु क्वचिदानुपूर्वी आवश्यकी, सा च यथायुक्तं कल्पितैव, अन्यथा यज्ञीयकर्मानुपूर्व्याद्यनुरोधेन मन्त्रदर्शने अभ्युपगम्यमाने कल्पस्यैव प्राथम्यात् मन्त्राणामपि बुद्धिपूर्वकत्वेन कल्पितत्वमेव स्यात्, तथा च ब्राह्मणादिकल्प एव यजुर्मन्त्रा अपि कल्पिता एव भवेयुः । न तु तथा भवितुं कल्पयितुं च युक्तम् ।

अपि च ' **इषे त्वेति शाखां छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टि** ' इति कल्पोक्तशाखाछेदनादिलिङ्गं लेशतोऽपि नास्ति ' इषे त्वेति ' यजुर्मन्त्रे, येन तत्परतयैव वेदाविर्भावोऽभ्युपगम्येत । तत्त्वार्थपरत्वे तु कल्पो यथा कथञ्चिदपि कल्पयितुं शक्यः । तथाकल्पितेऽपि न कश्चिद्विरोधः, नापि दोषप्रसङ्गः ।

न च यज्ञीयकल्पोऽत्र निषिध्यते, नापि निन्द्यते । अस्माभिरप्यनुष्ठीयते '**वचनात्प्रवृत्तिर्वचनान्निवृत्तिः**' इति न्यायात् । अधियज्ञतत्त्वं तु यजुर्मन्त्रेऽपि प्रतिष्ठितं नित्यसिद्धमेव, कल्पमात्रं तु कयाचिदानुपूर्व्या कल्पितमेवेति विवेकः । काण्डविभागपाठेऽप्येतत्समानं, तत्रापि यज्ञीयकर्मानुपूर्व्याद्यनुरोधेनैव काण्डग्रथनात् ।

अथ कथं पुनर्ब्राह्मणादिवेदवचनक्लृप्तं कल्पमनादृत्य अर्थान्तरमाद्रियेत ? तस्मात् कल्पानुरोधेनैव मन्त्रार्थः समुन्नेयः इत्येव युक्तम् । तथैव मन्त्राविर्भावात् । तथा चेत्–ब्राह्मणकल्पस्य एकविधत्वात् कथं कल्पसूत्रभेदेन विनियोगभेदो वेदमन्त्राणाम् ? वस्तुतस्तु ब्राह्मणादिवेदवचनानुरोधेन सर्वेषामपि एकविध एव कल्पः प्रधानो युक्ततरश्च, वेदविहितत्वात् । दृश्यते तु तैत्तिरीयादौ एकस्यामपि शाखायां एकरूपाणामपि मन्त्राणां आपस्तम्बबौधायनसत्याषाढादिकल्पसूत्रभेदेन विनियोगभेदः, न हि द्वित्राः त्रिचतुरा वा विधाः ब्राह्मणे विहिताः । कल्पभेदेऽपि मन्त्राणामेकविधत्वं स्वरूपं च न हीयते, प्रत्युत कल्पभेद इव मन्त्राणामपि बहुविधत्वं दृश्यते, तैत्तिरीयमैत्रायणीयवाजसनेय्यादिशाखासु, तद्यथा– ' **इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आ प्यायध्वमघ्न्या देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्माः** ॥ इति (तै० सं० १।१।१।१-५) ' **इषे त्वोर्जे त्वा वायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आ प्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्माः०** ' इति (वा० य० १।१) ।

सत्यम्; तत्तु शाखाभेदेन दर्शनभेदात् तथा मन्त्राणां बहुविधत्वेऽपि न कश्चिद्विरोधो दोषापत्तिश्च । विनियोगस्य तु श्रौतस्य स्मार्तस्य च कल्पितत्वादेवानेकविधत्वं कल्पनयैव प्राप्तं, मन्त्राणां तु कल्पितत्वं सर्वथाप्यसङ्गतमेव, तस्मात् न कल्पानुरोधेनैव वेदमन्त्रदर्शनं, नापि कल्पानुरोधेन वेदमन्त्रार्थकल्पनं प्रधानम् । तत्त्वार्थविमर्शस्तु कल्पविनियोगाद्यनुरोधमन्तरेण केवलानां मन्त्राणां यथाश्रुतमेव कर्तुं युक्ततर इत्युदीयते । तस्माद् यजुर्मन्त्राणामपि स्वतन्त्रेण तत्त्वार्थो वस्तुसिद्ध एव । स च कर्मादिविनियोगनिबन्धमन्तरेणैव विमर्शनीयः । तथा केवलानां मन्त्राणां तत्त्वार्थे विज्ञाते तदनुकरणेन विनियोगादिपरत्वेनाप्यर्थं कल्पयितुं शक्यं युक्तं चेति सिद्धम् ।

*

केवलं विनियोगपरत्वेनार्थकरणे प्रथमतः तत्रैव लक्ष्यवेधात् शुद्धमन्त्रार्थविमर्शनदृष्टिः कुण्ठिता दूरनिरस्ता च भवा। तस्माद् अर्थज्ञानपटवः तत्त्वार्थबुभुत्सवो विद्वांसः पक्षपातादिदृष्टिं परित्यज्य, स्वस्वाभिमताग्रहं विना, समदृशैव शास्त्रदृष्ट्या वेदार्थं स्वयं विमर्शितुमर्हन्ति भवन्त इति विज्ञप्तिः ।

सायनभाष्यविमर्शः ।

विदितमेवेदं सर्वेषां विदुषां सर्वत्र सुप्रसिद्धं च तत्र भवान् आचार्यः सायनः चतुर्णामपि वेदानामर्थं प्रकाशयामास भाष्यमुखेनेति । तत्रापि प्रथमतः प्रणीतं विशिष्टतरं तैत्तिरीयकृष्णयजुर्वेदभाष्यमेव सर्वतः प्राधान्येन वरीवर्ति । तदपि 'यज्ञस्य मात्रां वि मिमीत उ त्वः' इति (ऋ० १०,७१,११) मन्त्रवर्णात्, 'वेदा हि यज्ञार्थमभि प्रवृत्ताः' इति (वेदाङ्गज्यो०) स्मरणाच्च सर्वेषामपि वेदानां यज्ञार्थमेव प्रवृत्तेः, यज्ञे च तस्मिन् यजुर्वेदस्यैव प्राधान्याच्च, तथा अधीतस्वशाखाद्यभिनिवेशेन विशेषतः तदर्थप्रकाशनकौतूहलेन स्वनुष्ठितयज्ञादिकर्मकलापविज्ञानप्राचुर्याच्च प्रथमतो यजुर्वेदभाष्यं प्रणीतमिति प्रतीयते ।

भाष्यं च तदतिगम्भीरं महद्विस्तीर्णं आधियज्ञादितत्त्वविचारप्रचुरं विशेषतः ब्राह्मणकल्पसूत्राद्यनुरोधेन सुप्रसिद्धप्रकृतिविकृतिरूपदर्शपूर्णमाससोमादियज्ञीयविनियोगपरेण अर्थेन परिपूर्णं मीमांसादिन्यायपरिक्लृप्तं सर्वेषां शास्त्रचिन्तकानां सर्वथा विचारास्पदं प्रमाणभूतं च भवति ।

यद्यपि आध्यात्मिकैकविषयप्रचुरस्य वेदैकदेशस्य गद्यगाथादि ब्राह्मणरूपस्य क्वचिदल्पीयसो मन्त्ररूपस्यापि उपनिषद्भागस्य प्राचामाचार्याणां शङ्करदेशिकेन्द्रप्रभृतीनां भाष्यं विशिष्टतरतत्त्वार्थविचारप्रचुरं प्रसिद्धतरं वरीवर्ति, तथापि आमूलाग्रस्य पाठप्रवचनादिपरम्परया प्रचलितस्य सम्पूर्णस्य वेदस्य मन्त्रात्मकस्य संहिताग्रन्थस्य तथा ब्राह्मणभागस्यापि ब्राह्मणारण्यकोपनिषदादिग्रन्थस्य च सुप्रसिद्धं अग्रगण्यं सायनभाष्यमेव सर्वेभ्यः प्राथम्यं गौरवं चार्हतीति न पुनर्वक्तव्यम् ।

तच्च सायनभाष्यं ब्राह्मणारण्यकोपनिषन्निरुक्तव्याकरणकल्पसूत्रधर्मशास्त्रमीमांसादिवचनन्यायाद्युपबृंहितं, सरलतर–संस्कृतभाषानिबन्धनोपक्लृप्तं, अतिप्राचीनानां प्रसिद्धे संस्कृतसाहित्येऽप्यप्रसिद्धानां अलौकिकानां वैदिकशब्दानां अर्थावबोधायानुकूलं विशिष्टतरशब्दार्थव्युत्पत्तिप्रक्रियादिसहितं वेदार्थव्याख्यानप्रक्रियामार्गदर्शकं भवति ।

यद्यपि अस्मिन् सायनवेदभाष्ये प्रथमकल्पनया विरचिते केवलयज्ञादिविनियोगपरतया व्याख्यानेन एकदेशीयसङ्कुचितार्थकल्पनादिहेतोः तत्र न्यूनातिरेकादिदोषारोपणं केषांचित् प्राचां वैदिकानां, तथा आधुनिकानां लौकिकानां पाश्चात्यपण्डितानां चानिवार्यम्, तथापि अत्यन्तमप्रसिद्धार्थानां अलौकिकानां संस्कृतप्राकृतादिसर्वभाषाविलक्षणानां क्वचित् प्रसिद्धसंस्कृतसाहित्येभ्योऽपि विलक्षणस्वरूपाणां क्वचिद्विरुद्धार्थविभासकानां च वैदिकशब्दानां अर्थप्रकाशनाय आपाततः प्रदर्शितस्य यास्कनिरुक्तादेरवलम्बनेन प्रथमकल्पनया समाविष्कृतं सायनवेदभाष्यं वेदार्थव्याख्याने शब्दव्युत्पत्त्यादौ च सर्वेषां मार्गदर्शकमेव भवितुमर्हतीत्युन्नीयते ।

तत्र दोषारोपणं तु अज्ञानमूलकमेव । तद्यथा आपाततः शब्दमुखेन श्रुतानां विनायकादिदेवतानां प्रथमकल्पनया चित्रविग्रहादिरचनोत्तरं तत्र न्यूनातिरेकादिदोषारोपणं तु सामान्यजनानामपि सुलभतरम्, तद्वदेव सायनवेदभाष्येऽपीति मन्तव्यम् । अन्यथा अत्यन्तमप्रसिद्धे लोकविलक्षणे वेदे प्रथमकल्पनासङ्केतितसायनभाष्याभावे तत्र प्रयतमानानां विदुषामपि वेदव्याख्यानोपक्रमणं तु 'विनायकं प्रकुर्वाणो रचयामास वानरम्' इतिवत् हास्यास्पदमेवाभविष्यत् ।

सुप्रसिद्धं च 'विद्वानेव वि जानाति विद्वज्जनपरिश्रमम् ।' इति न्यायसिद्धं वचनम् । तस्मात् तदिदं समदृशः स्वयं विद्वांस एव विमर्शितुमर्हन्ति । एवमिह वेदानां सायनभाष्यस्यैव सर्वतः प्राथम्यात् वेदार्थव्याख्यानप्रक्रियादिमार्गदर्शकत्वाच्च विशिष्टतरगौरवार्हता स्वतःसिद्धैवेति प्रतिज्ञायते । अतएव इतः पूर्वं परं च सायनवेदभाष्याद्प्याधिक्येन विशेषतस्तत्त्वविमर्शनेन सङ्क्षेपतो विस्तरशश्च येन केनचिद् विद्वद्वरेण निपुणतरं वेदार्थप्रतिपादने कृते करिष्यमाणेऽपि तत्र यदृच्छा प्राप्तं महता पुण्येन प्रयासेन च सम्पादितं परमं सौभाग्यं प्रथमं तन्महद्यशश्च सर्वथापि सायनस्यैवाभवत् । न च तत्पुनरस्मिन्

कल्पे अन्येषां भवितुं शक्यमिति तदेव प्रशंसनीयम् ।

किम् ? इतोऽप्यस्ति कश्चिद्विशेषः सायने तद्वेदभाष्ये च । अथ किम् ? वेदवचनानुरोधेनाचरणं आचरणानुरूपमेव वेदव्याख्यानमित्येष एव विशेषः । तथथा-- वेदार्थप्रकाशनवत् भारतेऽस्मिन् भूमण्डले वैदिकधर्मप्राधान्यतः प्रसिद्धतरकर्नाटकविजयनगरसाम्राज्यप्रतिष्ठापनेन तत्र स्वयं प्रधानमन्त्रित्वपदवीमधिष्ठाय तत्सञ्चालनेन, तथा आचार्येन्द्रशङ्करभगवत्पादप्रतिष्ठापितस्याद्वैतमहात्मतत्त्वसिद्धान्तस्य पुनरुद्बोधनेन चेत्येवं प्रपञ्चपरमार्थोभयविधसाम्राज्यसञ्चालने ज्ञान-क्रियाशक्तिभ्यां सव्यसाचित्वमङ्गीकृत्य तत्र तदितिकर्तव्यतानिर्वहणेनोपप्राप्तां कृतकृत्यतापदवीमारूढः कीर्तिशेषः सन् रामराज्यादौ प्राचां वसिष्ठादिवदर्वाचीनानां विजयनगरराज्ये आचार्यः सायनो माधवः सर्वेषां मार्गदर्शी बभूवेति विशिष्टं गौरवास्पदं सर्वेषां भारतीयानाम्, ततोऽपि विशेषतः अभिमानास्पदमस्माकं वैदिकधर्मविद्यावलम्बिनाम् ।

एवमेव वेदार्थज्ञानप्रकाशने पूर्णसहानुभूत्या प्रोत्साहनेन यथोचितसहायप्रदानेन च आचार्यसायनस्य प्रेरणया तद्यशः पुण्यफलभागितामुपेतो जनताहितैषी श्रीकर्नाटकराज्यपीठमधिष्ठितः श्रीवीरबुक्कमहीपतिरपि धन्यवादार्हः चिरमनुस्मरणीय एव ।

तत्रापि विशेषस्तु यत् खलु वसिष्ठादिमहर्षीणां वेददर्शनादनन्तरं अद्ययावत् अस्मिन् भूमण्डले सम्भूतेषु तथा कीर्तिशेषेषु च सहस्रशो राजन्येषु भूपतिषु पुण्यपुरुषेषु श्रीबुक्कभूपतेरेवेदं अपूर्वमनन्यसाधारणं तद्वेदार्थप्रकाशनयशः महता भागधेयेनोपप्राप्तम् । तत्रापि पत्रिकाप्रकाशादिना राजकारणादिकमिव राजकीयप्रतिष्ठादिप्रयोजनमन्तरेण धनार्जनेन लौकिकैश्वर्याभिवृद्ध्यादिस्वार्थदृष्टिं विनैव केवलं जनताहिताय वैदिकतत्त्वज्ञानोदयैकध्येयसिद्ध्यर्थं स भूपतिः सायनमुखेन यद्वेदार्थप्रकाशनं कारयामासेति, तदिदमनुकरणीयमेव सर्वेषां राज्ञां विदुषां प्रजाजनानां च वैदिकधर्मविद्यापरायणत्वम् । तथा च वेदभाष्यादौ मङ्गलमुखेनोदितः स पुण्यश्लोकः ।

' यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः । आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् । कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ' (इति ऋग्वेदभाष्यभूमिकायाम्) ।

एवमिह वेदार्थप्रकाशने ब्राह्मणराजन्ययोः मित्रावरुणतेजः प्रभावपूर्णयोर्ज्ञानशक्ति–क्रियाशक्तिप्रधानयोः श्रीसायणाचार्य–बुक्कभूपयोः सहयोग एव प्रधानं कारणमिति प्रतीयते, तदिदं परं वैदिकं तत्त्वं लोके निदर्शनाय प्रत्यक्षीकृतं तयोस्तेन सहयोगेन । तथा च यजुर्मन्त्रवर्णः—

' सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥ ' इति
(तै० सं० ४,१,१०,९)

तस्यायमर्थः—' मे ' मम ' ब्रह्म ' ज्ञानशक्तिप्रधानं ब्राह्मं तेजः ' सꣳशितम् ' तपसा सम्यक् निशितम् । तथा तदनुगुणं ' वीर्यं बलं ' च ' सꣳशितम् ' ज्ञानप्रकाशनाय सन्नद्धम् । अपि च ' यस्य ' राज्ञः ' अहं पुरोहितोऽस्मि ' कार्यकर्ता नेताऽस्मि तस्य राज्ञोऽपि ' जिष्णु ' जयशीलं ' क्षत्रं ' क्रियाशक्तिप्रधानं क्षात्रं तेजः सम्यक् निशितम्, विश्वविजयाय सन्नद्धमिति यावत् । एतेन ब्रह्मक्षत्रयोः सहयोगेनैव सर्वं सेत्स्यतीति सम्पद्यते । एतन्मन्त्रोपव्याख्यानब्राह्मणमपि एतमेवार्थं स्पष्टीकरोति । ' ब्रह्मणैव क्षत्रꣳ सꣳश्यति, क्षत्रेण ब्रह्म, तस्माद् ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं, तस्माद्राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यम् ' इति । (तै० सं० ५,१,१०,८)

' ब्रह्मणैव ' ज्ञानरूपेण ब्रह्मतेजसैव ' क्षत्रं ' क्रियारूपं क्षात्रं तेजः तत्कार्यं च ' सꣳश्यति ' सम्यक् निशितं तीक्ष्णं भवति, तथैव ' क्षत्रेण ' क्रियाशक्तिरूपेण क्षात्रतेजसा ' ब्रह्म ' ज्ञानं तीक्ष्णं भवति । ' तस्माद् ब्राह्मणः ' विद्यामुखेन ज्ञानशक्तिप्रधानो विप्रः ' राजन्यवान् ' शासनमुखेन क्रियाशक्तियुक्तेन क्षत्रियेण राज्ञा सहितः ' अन्यं सर्वं ब्राह्मणं ' अति ' अत्येति राज्ञा सहयोगेन स्वाभीष्टक्रियानिर्वर्तनसमर्थः सन् सर्वान् ब्राह्मणानतीत्य सुप्रतिष्ठितः पूजार्हो भवतीत्यर्थः । तथैव ' राजन्यः ' क्षत्रियः क्रियाशक्तियुक्तः पुरुषः ' ब्राह्मणवान् ' ज्ञानशक्तियुक्तेन विप्रेण सहितः ' अन्यं राजन्यम् ' अन्यान् सर्वान् क्षत्रियान् अत्येति, ज्ञानशक्तिप्रकाशनेन सर्वराजश्रेष्ठो भवतीत्यर्थः ।

अत्र ‘ ब्राह्मणोऽस्य मुखमासीत् ’ इति श्रुतेः वेदवागुपासः परमपुरुषमुखस्थानीयो ब्राह्मणः, ‘ मुखादग्निरजायत, ’ (वा० य० ३१।१२) ‘ वाङ्म आसन् ’ (ना० उ०) ‘ अग्निर्मे वाचि श्रितः, आग्नेयो वै ब्राह्मणः ’ (तै० ब्रा० २,७,३) इत्यादि श्रुतिभ्यः । वेदवागादिमुखेन ज्ञानप्रकाशनसमर्थो ज्ञानशक्तिप्रधानो ब्राह्मणः इति सिध्यति । तथा ‘ बाहू राजन्यः कृतः ’ इति च परमपुरुषबाहुस्थानीयो राजन्यः, ‘ बाहुवोर्बलम्, इन्द्रो मे बले श्रितः, ऐन्द्रो राजन्यः ’ इति च बलक्रियादिमुखेन कर्तृत्वशक्तियुक्तः क्रियाशक्तिप्रधानः क्षत्रियः इति सिध्यति ।

एवं ज्ञानक्रिययोरिव ब्राह्मणराजन्ययोः सहयोगेनैव अस्मिन् लोके सर्वोऽपि प्रपञ्चव्यवहारः परमार्थश्च सिध्यति, तेन विशिष्टं लोकोत्तरं जनताहितं च भवति । तदेतत्सर्वं शतपथब्राह्मणे स्पष्टमनुश्रूयते- ‘ क्रतूदक्षौ वा अस्य मित्रावरुणौ । एतन्न्वध्यात्मम् । स यदेव मनसा कामयते इदं मे स्यादिदं कुर्वीयेति स क्रतुः । अथ यदस्मै तत् समृध्यते स दक्षः । मित्र एव क्रतुर्वरुणो दक्षः । ब्रह्मैव मित्रः क्षत्रं वरुणः । अभिगन्तैव ब्रह्म कर्ता क्षत्रियः ’ इति (शत० ब्रा० ४।१।४।१-६) ।

तथा च ऋङ्मन्त्रवर्णः- ‘ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि ’ इति (ऋ० ८,४२,३) नाभाकः काण्वः । तस्येदमुपव्याख्यानब्राह्मणम्- ‘ क्रतुं दक्षं वरुण सꣳशिशाधीति वीर्यं प्रज्ञानं मयि सꣳशिशाधीत्येव तदाह ’ इति (ऐ० ब्रा० १,१३,२८) ।

तस्यास्य प्रत्यक्षं निदर्शनं सायन-बुक्कभूपयोः सहयोगेन सङ्घटितं वेदार्थप्रकाशनं तथा वैदिकधर्मप्रतिष्ठापनं च अभूतपूर्वं जगद्धितकारणीभूतं मनुष्यमात्रस्य ज्ञानोदयेन शाश्वतसुखमयजीवनास्वादं च सत् तदिदमद्यापि वरीवर्ति, जागर्ति च सर्वत्र वैदिकतत्त्वज्ञानसुधारसवितरणार्थं, एवमेव उत्तरत्रापि प्रज्ञानरसं वितरन् आचन्द्रार्कं प्रतिष्ठास्यतीति महत् सौभाग्यमेवैतत् सर्वेषां मानवानां विशेषतो भारतीयानां वेदश्रद्धास्तिकानाम् ।

तस्मादस्माद्धि सर्वेषां मानवानां हितार्थं अज्ञाननिवृत्तये वैदिकतत्त्वज्ञानप्रकाशनेन कृतः तेषां महानुपकारोऽयमविस्मरणीयः । तथा तेषामेतादृशऋणापनोदनाय यथोचितसेवावलम्बनेन सम्पूर्णजीवितस्य क्षरणेनापि न पारयाम इति कृतज्ञतया वेदवचनानुसारेण तदध्ययनं तदर्थज्ञानं तथैवाचरणं तत्प्रचारणं च सर्वतः संवर्धयितुं न प्रमदितव्यम् ।

तथा च वेदमातुर्मुखेन परमपुरुषस्य तस्यास्य विश्वरूपस्य जनताजनार्दनस्य सेवावलम्बनमेवास्माकं सर्वेषां शरणमिति तदर्थमेवास्माभिः सर्वैरपि चिरमनुचिन्तनीयम् । तथा वेदाचार्याणां तेषां अन्तेवासिपरम्पराप्रवाहान्तःप्रवेशेन तदितिकर्तव्यतानिर्वहणदीक्षोपनिबद्धदृढपरिकरेण वेदार्थज्ञानाय तत्प्रचारणाय च अस्माभिः सर्वैरपि यावज्जीवं स्वस्वकर्तव्यपरायणतया-प्रयत्नशीलैर्भवितव्यं, तथा तत्परं ध्येयं साधयितुं न विस्मरणीयं, नापि प्रमदितव्यमिति च साञ्जलिबन्धा सविनयसद्धिया-प्रेमलरसपूर्णेयं विज्ञप्तिः ।

‘ ज्ञप्तिरियं ज्ञाननीव जनानां ज्ञापयतादिविकृतिमिह विहिताम् । ज्ञप्तिं लब्ध्वा जगति जनास्तां ज्ञानसुधारसतोऽत्र रमन्ताम् । ’ इति दैवरातीया अक्षरमाला ।

प्रस्तुतेऽस्मिन् तैत्तिरीयसंहितादीनां सायनभाष्ये अधियज्ञं तत्त्वं यज्ञीयकर्मानुष्ठानपद्धतिक्रमादिकं च साकल्येन सम्यक् उपन्यस्तमस्ति । तेन मीमांसादिज्ञानपूर्वकं यथाशास्त्रं यज्ञाद्यनुष्ठाने महानुपकारो भवति । तत्र सायनस्याधियज्ञविज्ञानसर्वस्वं प्रतिष्ठितमिति अनावृतमेव ।

तत्र केचिदेवमाहुः- सायनेन सारस्वतपाठक्रमेणैव यथास्थितानामेव संहितादीनां भाष्यं विरचितम् । यदि तत्र आर्षेयपाठक्रम एव युक्त इति सायनाभिमतं चेत्, तथा तेनैव क्रमेण संहितादिग्रन्थविभागात् भाष्यं प्रणेतव्यमासीत् । तेन सारस्वतपाठ एव सायनाभिप्रेतः ननु पुनरार्षेयकाण्डानुक्रमः इति प्रतीयत इति । अत्रोच्यते- नैषा वस्तुस्थितिः, नाप्येतद्युक्तिसहं वचनम् । कुतः ? काण्डानुक्रमस्य सायनेनाप्यभ्युपगतत्वात् ? कथम् ? तैत्तिरीयसंहिताभाष्यारम्भे ‘ यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजते याजयतेऽध्यापयति वा यातयामानि (अस्य) छन्दांसि भवन्ति ’ इति श्रुतिवचनपूर्वकं काण्डानुक्रमणिकाप्रमाणोदाहरणेन काण्डपाठस्योद्धृतत्वात् । ‘ शाखादिं याजमानं च होतॄन् हौत्रं च

दार्शिकम् । तद्विधीन् पितृमेधं च नवाहुः कस्य तद्विदः ' इत्यादि । एतेन आर्षेयकाण्डपाठक्रमः सायनस्याप्यभिप्रेत एवेति सिध्यति ।

सत्यम्; संहिताभाष्यारम्भे समुद्धृतः काण्डक्रमः सायनेनेति, भाष्यं तु सारस्वतपाठक्रमेण यथास्थितमेव विरचितं खलु ? ओम्, तत्तु ' स्थितस्य गतिश्चिन्तनीया, ' ' न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ' (भ० गी० ३।२६) इति न्यायेन ब्रह्मदेवनिर्णयानुसारेण अध्ययनादिपरम्पराप्रचलितपाठक्रमेण यथास्थितानामेव संहितादीनां भाष्यरचनया सारस्वत पाठोऽप्याहृतः, तथा– अपि सारस्वते पाठे ज्ञानमात्रमिहेष्यते ' इति वचनात् । काण्डज्ञानार्थं काण्डक्रमोऽप्युपदिष्टः, न हि तावता भाष्येण आर्षेयकाण्डक्रमं तथा तदध्ययनादिविधिं च निषेद्धुं शक्यते । ' काण्डे काण्डे व्रतचर्या ' इत्यादि सूत्रेणार्षेयपाठस्यैवोद्धृतत्वात्, काण्डविभागेन पाठक्रमेऽपि काण्डानुक्रमणिकादिसहितं यथास्थितमेव सायनभाष्यं यथायुक्त काण्डक्रमेण योजयितुं शक्यमेव । तस्मात् सायनभाष्यं काण्डक्रमे प्रातिकूलं न भवति, प्रत्युत सर्वथाप्यनुकूलमेव ।

तथापि पुनर्ब्रह्मसभानिर्णयानुरोधेन सायनादिभाष्यानुसारेण चिरन्तनपाठप्रवचनादिप्रवाहप्रचलितपाठक्रमेणैवाध्ययने का हानिः का च दोषापत्तिः ? यातयामतादोषाद्यनिवृत्तिरेव, तथा ब्रह्मनिर्णयादिसत्त्वेऽपि आर्षेयादिपरिशुद्धिमन्तरेण यातयामतादोषो ब्रह्मणापि न शक्यो निवर्तयितुम् । ' यातयामानि छन्दांसि भवन्ति ' इति श्रुतिवचनात् । ब्रह्मवचनेनैव तद्दोषनिवृत्तिर्भवितुमर्हतीति चेत्– किमर्थं पुनः ' ज्ञानमात्रमिहेष्यते ' इति तज्ज्ञानावश्यकता ?

अथ– ' आर्षेयछन्दोदैवतावित् ' इति आर्षेयादिज्ञानमात्रेण तदपि ब्रह्मवचनमेव । यातयामतादोषनिवृत्तेः किं पुनरार्षेयपाठाश्रयेण ? ' ज्ञानमात्रमिहेष्यते ' इति ज्ञानमात्रस्याभ्यनुज्ञातत्वात् । तत्र ज्ञानमात्रे तु अभ्यनुज्ञामात्रं न तु विधिः, विधिस्तु वेदव्रतादिपूर्वकं काण्डपाठक्रमेणाध्ययनमेव स्पृशति ।

अपि च सारस्वतपाठे काण्डविभागस्यैवाभावात् तज्ज्ञानं दुःसम्पाद्यमेव, अतएव समग्रवेदपारङ्गता अपि आर्षेयादिकं न जानन्ति, प्रत्युत स्वाधीतमव्यवस्थितमपि सुव्यवस्थितं युक्ततरमेवाभिमन्यन्ते । मन्त्रविनियोगावसरे यजुर्वेदिनां ऋष्यादिस्मरणपद्धतिरेव प्रायः न दृश्यते, क्वचित् आहुतिप्रदानानन्तरं देवतात्यागे ' मन्त्रोक्तदेवतायै इदं न मम ' इति उच्चरन्ति, तत्र प्रचलितपाठक्रम एव हेतुः ।

तस्मादत्र युक्तायुक्तविमर्शेन यथोचितमनुष्ठातुमर्हन्ति विद्वांसः, युक्ततरस्वीकारे एव गुणिनां गुणः प्रतिष्ठितः, यद्वक्तव्यं तदुक्तं, इतःपरं ' यथेच्छसि तथा कुरु ' इति भगवदुपदेशानुसारेण यथारुचि कर्तुमर्हन्ति वेदविद्यार्थिनो विद्वांसश्चेति, सोऽयं तेष्वेव समर्प्यते कर्तव्यानुसरणभारः । साम्प्रतिकेऽस्मिन् तत्त्वविमर्शके युगे तेषामपि– ' करिष्ये वचनं तव ' इति युक्तानुसरणप्रसङ्गोऽपि अचिरादेवागमिष्यतीति निश्चयात्, अनवरतं वेदैकचिन्तनेन स्थीयते [illegible]नां वेदविज्ञानभाग्योदयनिरीक्षणेन, इत्यास्तां तावदलमतिविस्तरेण ।

तैत्तिरीयके कृष्णयजुर्वेदे

आर्षेयपाठक्रमः ।

वस्तुतस्तु कृष्णयजुर्वेदे तैत्तिरीयशाखायां मन्त्रब्राह्मणसङ्करोपहितात् सारस्वतपाठादपि काण्डविभागेन आर्षेयपाठ एव युक्ततर इति प्रतिज्ञायते । सोऽयं पाठः सत्याषाढापस्तम्बबौधायनप्रभृतिभिराचार्यैः स्वीये गृह्यसूत्रे स्पष्टतरमुल्लिखितो भवति ।

काण्डानुक्रमणिका ।

तत्र ' प्राजापत्यं, सौम्यमाग्नेयं, वैश्वदेवं, स्वायम्भुवं चेति ' पञ्चकाण्डानि भवन्ति ।

(१) प्रथमं प्राजापत्यं काण्डम् ।

' पौरोडाशिकं याजमानं होतारः हौत्रं पितृमेधः इति सब्राह्मणानि सानुब्राह्मणानि प्राजापत्यानि ' इति सूत्रम् (बौ० गृ० सू० प्रश्नः ३।३) ।

काण्डानुक्रमणिकायामपि—

'शाखादिं याजमानं च होतॄन् हौत्रं च दार्शिकम् । तद्विधीन् पितृमेधं च नवाहुः कस्य तद्विदः । ' इति तस्यायमर्थः- शाखादिः (पौरोडाशिकं) याजमानं होतारः दार्शिकहौत्रं चेति चत्वारि, तेषां ब्राह्मणान्यपि चत्वारि, पितृमेधश्चेति नवप्रकरणानि प्राजापत्यानीत्यर्थः ।

तद्विवरणमपि कृतं तत्रैव—

" इषे प्रश्नः पुरोडाश्यमनुवाकं विनान्तिमम् । तृतीयस्यां × च प्रत्युष्टं पौरोडाशीयको विधिः ॥
विश्वरूपादयः षट् † च समिधो यजतो च षट् । निवीतशेषो देवा वै सामिधेनीरतःपरः ॥
इन्द्रो वृत्रं हत्वेत्येतद् दार्शिकं ब्राह्मणं विदुः । ममे+त्यत्र पयस्वतीरादिसन्त्वादयश्च षट् ॥
अनुवाकाश्च विख्यातमैष्टिकं याजमानकम् । यथा वै समृतित्यादि क्रमात्पञ्चानुवाककाः ॥
स‍ंश्रवावर्जकं पञ्च पाकयज्ञादि षड् भवेत् । याजमानस्यैष्टिकस्य विधिरेष उदाहृतः ॥
चित्तिः स्रुगादि होतारस्त्वनुवाकास्त्रयोदश । प्रश्नौ प्रजापतिर्ब्रह्मवादिनश्चेति तद्विधिः ॥
सत्यं प्रश्नो दार्शहौत्रं देवा वै नार्चिनादितः । चत्वारोऽपि निवीतामित्याद्याभिजयतीति ✱ च ॥
मनुः पृथिव्याश्चत्वारः स‍ंश्रवाह च तन्मतम् । पित्र्यः परेयुवांसकम् ॥ " इति

(२) द्वितीयं सौम्यं काण्डम् ।

' आध्वर्यवं ग्रहाः दाक्षिणानि सामिष्टयजूंषि अवभृथयजूंषि वाजपेयः शुक्रियाणि सवाः इति सब्राह्मणानि सानुब्राह्मणानि सौम्यानि ' इति सूत्रम् ।

काण्डानुक्रमणिका च—

अध्वरप्रभृतित्रीणि तद्विधिर्वाजपेयके । सवाः शुक्रियकाण्डे च नवेन्दोरिति धारणा ॥ इति

अध्वरो ग्रहाः दक्षिणानीति त्रीणि, तेषां ब्राह्मणान्यपि त्रीणि, वाजपेयः, तद्ब्राह्मणं, सवाः शुक्रियाणि (प्रवर्ग्यः) तद्ब्राह्मणं चेति नव सौम्यानि भवन्तीत्यर्थः ।

तद्विवरणम्- ' आप उन्दन्तु देवस्य प्रश्नावन्तिमवर्जितौ । पवमानो ब्रह्मसन्धत्तमेतौ ꙮ चाध्वराह्वया ॥
प्राचीनवंशं षट्प्रश्नास्त्रिभिः प्रजननं मुखैः । देवासुराः सप्रजापतिश्चत्वार्यध्वरो विधिः ॥
वर्जयित्वाऽददे प्रश्ने चतुरोऽन्त्यान् ग्रहाह्वयाः । उभये वै ब्रह्मवादिनः कत्येतौ ग्रहे विधिः ॥
बदु त्यमिति चारभ्य त्रयो दाक्षिणनामकाः ⊙ । उक्तेऽध्वरविधावन्तर्गतोऽभूद्दाक्षिणो विधिः
देवसवितरारभ्य वाजपेयाह्वयाश्च षट् । वाजपेयस्य देवा वै यथाद्यौ विधिर्मतः ॥
त्रिवृत्प्रश्नः सवाः प्रोक्तः, प्रवर्ग्यस्तु नमो वाचे परः प्रश्नश्च तद्विधिः ॥ इति

(३) तृतीयमाग्नेयं काण्डम्

'अग्न्याधेयमग्निहोत्रमग्न्युपस्थानमाग्निचयनं सावित्रं नाचिकेतं चातुर्होत्रीयं वैश्वसृजमारुणा इति सब्राह्मणानि सानुब्राह्मणान्याग्नेयानि ' इति सूत्रम् ।

काण्डानुक्रमणिका च—

' त्रिष्वग्न्याधेयपूर्वेषु ह्यग्नौ च सविधिद्वये । विधौ चैवाग्निहोत्रस्य सप्तस्वाग्निमृषिं विदुः ॥ ' इति

अग्न्याधेयपुनराधेयाग्न्युपस्थानानीति त्रीणि, अग्निः, (अग्निचयनं) अग्न्याधेयादित्रिकस्य ब्राह्मणं, अग्निचयनस्य ब्राह्मणमिति द्वयं, अग्निहोत्रब्राह्मणं चेत्येवं सप्त आग्नेयानि भवन्तीत्यर्थः । सावित्रादि काठकवचनान्यप्यत्रैव परिगणनीयानि

× तृतीयस्यां, प्रत्युष्टं इति कृत्स्नौ प्रश्नौ । † षडनुवाकाः । × ममनामेत्यस्मिन्ननुवाके । ✱ अभिजयतीत्यन्तम् ।
ꙮ एतावनुवाकौ ⊙ अत्रैव समिष्टयजूंषि अवभृथयजूंषि चान्तर्भावितानि ।

'काठकादिषु×हव्यवाट्' (ऋषिः) इति तत्रैव सङ्ग्रहणात्सूत्रोक्तेश्च ।

अथैषां विवरणम्—

'उद्धन्यमानं घर्मः शिरोऽग्न्याधेयाविमौ मतौ । कृत्तिकास्वग्निमित्यारभ्य च पञ्चानुवाककाः ॥
इमे वा एत इति च त्रयोऽग्न्याधेयको विधिः । भूमिर्भूम्नानुवाकोऽयं पुनराधेयनामकः ॥
देवासुराः परा वै च भूमिर्भूम्नेति चोत्तरम् । देवासुराग्नीषोमयोः पुनराधेयको विधिः ॥
उप प्रयन्तः सम्पश्याम्यनुवाकद्वयं तथा । अग्न्युपस्थानमाख्यातं मम नामेत्यृचश्च षट् ॥
अयज्ञादि त्रिकं पूर्वमग्न्युपस्थानको विधिः । अन्त्यान्विनाऽनुवाकान्स्वान् जीमूतस्येति च त्रयम् ॥
तुरीयमग्निकाण्डं स्यात् रुद्रान्त्यं तु न वर्जयेत् । मा नो हिंसीदस्मादूर्ध्वमाप्यायस्व सशान्तिकम् ॥
इममेवानुवाकान्ते ईयुष्टे ये च तादृशम् । प्रजापतिर्मनसोर्ध्वं ज्योतिष्मतीं च योजयेत् ॥
आयुषः प्राणमिन्द्रो दधीच एतेऽग्निकाण्डकाः । सावित्राणीति चत्वारः प्रश्ना अन्तिमवर्जिताः ॥
द्विचत्वारिंशकं ख्यातं गायत्रीति च वर्जितम् । यदेकेनादिकं प्रश्नत्रितयं त्रैंशिकं मतम् ।
इन्द्राय रोहितस्तेगानित्यादीर्दशिनीर्विना । (सावित्राणीत्यादिकमग्निचयनस्य ब्राह्मणमिति ज्ञेयम्)
संज्ञानमिह सावित्रं लोकोऽयं नाचिकेतकः । चातुर्होत्रो ब्रह्म वै च परे वैश्वसृजास्ततः ॥
भद्रं प्रश्नस्त्वारुणं स्यात्पञ्चैते चितिनामकाः । योऽयमङ्गिरसः प्रश्नः सोऽग्निहोत्रविधिः स्मृतः ॥
उदस्थाश्विना एतस्येत्येतौ चेह प्रवेशयेत् ।' इति ।

(४) चतुर्थं वैश्वदेवं काण्डम् ।

'राजसूयः पशुबन्धः इष्टयो नक्षत्रेष्टयो दिवश्येनयोऽपाघाः सात्रायणमुपहोमाः कौलिकी सूक्तान्यौपानुवाक्यं याज्या अश्वमेधः पुरुषमेधः सौत्रामणी अच्छिद्राणि पशुहौत्रं उपनिषदः इति सब्राह्मणानि सानुब्राह्मणानि वैश्वदेवानि ।' इतिसूत्रम् ।

काण्डानुक्रमणिका च—

'अवशिष्टानि यानि स्युः काण्डान्यन्यानि षोडश । विश्वान्देवानृषीन्स्वेषु विदुर्वेदविदो जनाः ॥
सब्राह्मणो राजसूयः पशुबन्धः सहेष्टिभिः । उपानुवाक्यं याज्याश्च अश्वमेधः सब्राह्मणः ॥
सात्रायणं चोपहोमाः सूक्तानि च सहेष्टिभिः । सौत्रामणी सहाच्छिद्रैर्होत्रं मेधश्च षोडश ॥' इति ।

राजसूयः तद्ब्राह्मणं पशुबन्धः काम्येष्टयः उपानुवाक्यं याज्याः अश्वमेधः तद्ब्राह्मणं सात्रायणं उपहोमाः सूक्तानि नक्षत्रेष्टयः सौत्रामणी अच्छिद्राणि पशुहौत्रं पुरुषमेधश्चेति षोडश वैश्वदेवानीत्यर्थः । काठकोक्ता दिवश्येन्यपाघनामका इष्टयः उपनिषदश्चात्रैव परिगणनीयाः, सूत्रे तथैव परिगणनात् ।

अथैतेषां विवरणम्—

'अनुमत्या इति प्रश्नो राजसूयो विनान्तिमम् । ऋतमेव परमेष्ठीत्यनुवाकश्च तादृशः ॥
अनुमत्यादयः प्रश्ना राजसूयविधिस्त्रयः । प्रजा वै सत्रमग्निश्च देवा वै ते सुरा इति ॥
वायव्यमन्त्यवर्ज्यं तु काम्याः पशव ईरिताः । प्रजापतिरिति प्रश्नत्रयमन्त्यान् विनेष्टयः ॥
अन्त्यान्विनोपानुवाक्यं तृतीयं काण्डमीरितम् । इषे त्वादिश्यपान्त्वान्तं प्रश्नानामन्तगामिनः ॥
अनुवाकास्तु याज्याख्या युक्ष्वाहीत्यपि तादृशः । अथाश्वमेधकाण्डस्य क्रमः साम्प्रतमुच्यते ॥
देवस्यादि * दशैकस्मै दशार्वाङ्गादितो दश । मेषस्त्वैकादश तथा पृथिव्यै च चतुर्दश ॥

× 'भद्रं च सह संज्ञानं लोकस्तुभ्यमिति क्रमात् । एते काठकसंज्ञाः स्युः पञ्चप्रश्ना न चेतरे ॥' (इति षड्विंशतिसूत्रे)
* प्रजननप्रश्ने 'देवस्य त्वा' इत्येकादशानुवाकमारभ्य ।

एता दशिन्य आख्याताः पञ्चादौ सात्रिका इति । महापृष्ठं जीमूतस्य × यन्मायेऽग्नेः समिध्य षट् ॥
